i

ISSN : 2278-036X

पूर्णप्रज्ञसंशोधनमन्दिरम्

नवदेहलीस्थकेन्द्रसर्वकारीयशिक्षणमन्त्रालयाधीनकेन्द्रीयसंस्कृतविश्वविद्यालयेन
(राष्ट्रियसंस्कृतसंस्थानेन) 'आदर्शशोधसंस्थानम्' इति सम्मानितम्

# प्रज्ञा

## पूर्णप्रज्ञसंशोधनमन्दिरशोधपत्रिका - १३

पूर्णप्रज्ञसंशोधनमन्दिरम्
पूर्णप्रज्ञविद्यापीठम्, डा. विश्वेशतीर्थस्वामीजीमार्गः,
कत्तरिगुप्पमुख्यमार्गः, बेङ्गलूरु-५६००२८

२०२२–२३

**प्रज्ञा – २०२२–२३**
**पूर्णप्रज्ञसंशोधनमन्दिरशोधपत्रिका – १३**

सम्पादकः- **डा. ए.वि.नागसम्पिगे**, निदेशकः पूर्णप्रज्ञसंशोधनमन्दिरम्, बेङ्गलूरु

उपसम्पादकः- **डा रङ्गनाथकट्टि**, उपनिदेशकः पूर्णप्रज्ञसंशोधनमन्दिरम्, बेङ्गलूरु

प्रकाशकः- **पूर्णप्रज्ञसंशोधनमन्दिरम्**
**पूर्णप्रज्ञविद्यापीठम्, डा. विश्वेशतीर्थस्वामीजीमार्गः**
**कत्तरिगुप्पमुख्यमार्गः,बेङ्गलूरु - २८**

पृ.सङ्ख्या - **८ + १००**

मूल्यम् - **१०० रूप्यकाणि**

**लावण्यमुद्रणद्वारा मुद्रितम् ।**

ISSN : 2278-036X

**POORNAPRAJNA SAMSHODHANA MANDIRAM**

Recognised as 'Adarsha Shodha Sansthan'
by Central Sanskrit University, (Rashtriya Sanskrit Samsthan),
Ministry of Education, Govt. of India, New Delhi

# Prajñā

Research Journal Vol. - XIII
of Poornaprajna Samshodhana Mandiram

*Publisher :*
Poornaprajna Samshodhana Mandiram
Poornaprajna Vidyapeetha, Dr. Vishveshatirtha Swamiji Road,
Katriguppa Main Road, Bangalore-560028

2022-23

**Prajñā** - Research Journal Vol. - XIII
of Poornaprajna Samshodhana Mandiram

*Editor* : **Dr. A.V. Nagasampige** Director, Poornaprajna Samshodhana Mandiram

*Co-editor* : **Dr. Ranganatha Katti** Dy.Director, Poornaprajna Samshodhana Mandiram

*Published by* : **Poornaprajna Samshodhana Mandiram**
Poornaprajna Vidyapeetha, Dr. Vishveshatirtha Swamiji Road,
Katriguppa Main Road, Bengaluru - 560 028.
Ph. : 080-26694026

First Edition : 2022

No. of Pages : viii + 100

Price : Rs. 200 /-

*Printed by* : **Lavanya Mudrana**, Bengaluru.

# अनुग्रहसन्देशः

सर्वेभ्यः दानेभ्योऽन्नदानं प्रशस्यते । अन्नेन तु क्षणिका तृप्तिः । यावदन्नं न जीर्यते तावत्पर्यन्तं तुष्टिः । परन्तु विद्यादानेनेहामुत्र च प्रदाता मोदते । अत्र वितता कीर्तिः अमुत्र तु देवानां सम्प्रीतिः । अत एवोक्तमभियुक्तैः 'अन्नेन क्षणिका तृप्तिः यावज्जीवं च विद्यया' इति । तत्रापि 'सा विद्या तन्मतिर्यया' इत्युक्तदिशा ब्रह्मविद्या विद्यानां विशिष्यते । एवं च ब्रह्मविद्यां तत्साधनीभूतशीक्षाव्याकरणाद्यङ्गविद्यां च प्रदातुः वितता कीर्तिः भगवतः प्रीतिश्च प्रजायते । एतादृशतत्त्वज्ञानप्रसारार्थमेवास्माभिः स्थापितेन पूर्णप्रज्ञसंशोधनमन्दिरेण 'प्रज्ञा'नाम्नीं शोधपत्रिकां नैकविद्वत्तल्लजविद्यार्थिजनतोषिणीं प्रतिसंवत्सरं प्रकाश्यमानां विलोक्य हृष्टान्तरा वयम् ।

विशिष्यास्यां शोधपत्रिकायां नैके विद्वांसः शोधविद्यार्थिनश्च वैदुष्यपूर्णशोधलेखनैः प्रज्ञायाः वैभवं समभिवर्धितवन्त इति विभावयामः । महता श्रमेण विद्यावारिधिछात्रैरधीतेषु विमृष्टेषु च विषयेषु शोधलेखनं प्रदत्तम् । गुणैकग्रहणतत्पराः विद्वांसः हंसक्षीरन्यायेन गुणानेव उपादाय परित्यज्य च दोषान् विद्यार्थिनां मार्गदर्शनं विधास्यन्तीति आशास्महे । शोधपत्रिकायामस्यां शोधलेखनप्रदातॄणां समेषां विदुषां प्रज्ञाभिवृद्धिं भगवति प्रार्थयामहे ।

**श्रीश्रीविश्वप्रसन्नतीर्थश्रीपादाः**
श्रीपेजावराधोक्षजमठः, उडुपि

## From the Editor's Desk

With the continous encouragement of the authorities of the Rashtriya Sanskrit Sansthan, New Delhi, we have engaged in publication of Research Journal and unpublished manuscripts' publication. Now 'Prajna - 2019-2020' is submitted to the learned scholars and readers. The current issue of our Research Journal is the 10th in the series.

Eminent scholars of the philosophy and Sanskrit literature have contributed creative and resourceful articles for this Journal. Very unexpectedly I found a research paper submitted by Late Prof. Badarinatha Shukla of Varanasi in 1998. Now I am extremely happy to publish the article which was to be published very earlier. Especially I express my heartfelt gratitude to internationally accredited scholars like Prof. M. Sivakumar Swamy, Prof. M.N. Narasimha Murthy, Dr Janardan Hegde, Dr. S. Jagannatha and Dr. T.V. Satyanarayana for their valuable contribution. I also record my appreciation and gratitude to Dr. Ranganatha Katti, Dr. Shankaranarayana Adiga, Dr. E.N. Srinivas, Dr. L. Sudheendra and Srinidhi Pyati for their research-oriented papers.

Vidyavaridhi (Ph.D.) students of our Institution were insisted to present research paper on their Vidyavaridhi (Ph.D.) subject and allied subjects of any branches of Indian philosophy and literature. Few students have presented research papers on various subjects here in this issue, of their interest. Most of the students have made good efforts in preparing the research paper in the standard format. It is needless to say that every student should follow the guidelines of National-level research methodology for the benefit of learned readers, and appraisal of scholars.

The source of inspiration behind this useful venture is our founder H.H. Sri Sri Vishvaprasannatirtha Swamiji, Senior Pontiff of Sri Pejavara Mutt, Udupi. To him, we owe all we have and all we will have. How can we repay him for his support and encouragement except through our gratitude and Pranamas, at his lotus feet!

I also record my gratitude to Prof. Ramakrishna Bhatt, Chairman, and other members of Managing Committee of Poornaprajna Samshohana Mandiram, for their kind support in our academic activities.

**Dr. A.V. Nagasampige**
Director, Poornaprajna Samshodhana Mandiram

# विषयानुक्रमणिका


1. शिक्षणक्षेत्रे संस्कृतसमाभिवृद्धौ नूत्नाः योजनाः
- प्रो. एम्.एन्. नरसंहमूर्तिः 1-4

2. साहित्यक्षेत्रे संस्कृताभिवृद्धौ नूत्नाः योजनाः
- डा. टि.वि. सत्यनारायणः 5-8

3. अग्निपुराणे कूर्मावतार–रामावतारयोः कथा -डा. नारायणः 9-17

4. भगवान् सृष्ट्याद्यष्टकर्तैव न त्रितयमात्रकर्ता -डा.रङ्गनाथकट्टि 18-22

5. विष्णुसहस्रनामस्तोत्रम् - डा. श्रीकान्त बायरि 23-27

6. चातुवर्ण्यव्यवस्थायाः प्रयोजनानि - के. अनन्तकृष्ण उप्पार्णः 28-29

7. भागवतोक्ता अणिमादिसिद्धयः - वेङ्कटनरसिंहाचार्यः 30-37

8. शास्त्रमुखम् - डा. ई.एन्.श्रीनिवासः 38-41

9. भाषाध्ययने आकांक्षायाः स्थानम् - सङ्गीता रमेशः 42-47

10. ब्रह्मणः सगुणत्वसमर्थनम् - डा. माधवाचार्यपाण्डुरङ्गी 48-52

11. भाषाधिगमे कौशलानां पात्रम् - आनन्दः सि.आर्. 53-57

12. वेदाङ्गानि - विनयकुमारः 58-64

13. श्रीकाशीश्रीनिवासचार्यकृतटीकासंवलितस्य
सङ्ग्रहरामायणमहाकाव्यस्य युद्धकाण्डस्य च परिचयसङ्क्षेपः
- श्रीकृष्णाचार्यः श्री. कोर्लहळ्ळि 65-73

14. सर्ववेदान्तप्रत्ययाधिकरणसारः - भीमसेन गुत्तल 74-76

15. बाणात् सुबन्धुः प्राक्तनः - कृष्णप्रसादः 77-79

16. सिद्धान्तकौमुदी-व्याख्यायां सुखबोधिन्यां वासरूपसूत्रविचारः
- शिवगुहन् एस्. 80-86

17. शब्दकौमुदीग्रन्थस्य सिद्धन्ताकौमुद्या सह तोलनम्
- जी.कार्त्तिकेयन् 87-93

18. प्रत्यक्षज्ञानविषये काण्टन्यायमतयोः समीक्षा- श्रीनिधिप्याटि 94-99


* * *

# शिक्षणक्षेत्रे संस्कृतसमाभिवृद्धौ नूत्नाः योजनाः

- प्रो. एम्.एन्. नरसंहमूर्तिः
अद्वैतवेदान्तविभागः,
राष्ट्रियसंस्कृतविद्यापीठम्,तिरुपतिः

विदितमेवैतत् समेषां संस्कृतज्ञानां यत् अद्यत्वे संस्कृतस्य यादृशं स्थानं लब्धव्यमासीत्तन्न लब्धमिति । तत्र कारणानि बहूनि सन्ति । परं प्राशासनिकदृष्ट्या इच्छाशक्तेरभावः, अधिकारिणां पीतदृष्टिर्वा प्रधानं कारणम् । इदं तु भारते सर्वत्र परिदृश्यमानं कारणम् । तत्तद्देशभेदेन अन्यान्यपि कारणानि स्युरेव । तत्र तत्र प्रान्ते प्रान्तीयभाषायाः शिक्षणे प्राधान्यं देयमित्यत्र नास्ति कस्यापि विमतिः । परन्तु कुत्रचित् प्रान्तीयभाषाभिमाने इतरभाषाद्वेषः, विशिष्य संस्कृतभाषाद्वेषः न युक्तः, अध्थापि तथा दृश्यते । यश्च संस्कृताभिवृद्धौ प्रतिबन्धको भवति तादृशप्रतिबन्धकापनयने संस्कृतज्ञैः संस्कृताभिमानिभिश्च प्रद्वेषकरवातारणनिर्मूलने कश्चन प्रयासस्तु विधेयः । यद्यप्ययं सफलो भविष्यत्येवेति न विश्वासः, कुत इति चेत् निद्राणं जागरयितुं प्रभवामः न तु निद्राभिनयितारं किल । इदानीं सर्वप्रथमतया संस्कृतानुकूलवातावरणनिर्माणं तु कार्यम् । सामान्यजनेषु (**General Public**) संस्कृतविषये श्रद्धा यद्यपि वर्तते तथाऽपि संस्कृताध्ययनेन किं प्रयोजनमिति प्रष्टृणां कृते किं वक्तव्यम् । भौतिकरूपेण आर्थिकरूपेणैव प्रयोजनं लभ्यते चेत् सर्वेऽपि संस्कृतं प्रत्याकृष्टा भवन्ति । तत्तु न सुलभसाध्यम् । संस्कृताध्ययनेन व्यक्तित्वविकसनं भवति । संस्कृतेः रक्षणं भवति इति यत्किमप्युच्यते चेत् तदा तद्विरुध्य विचारः (**counter argument**) भवति, किमसंस्कृतज्ञाः संस्कृतिरहिताः, उत व्यक्तित्वरहिताः इति । अतः एतादृशं यत्किमपि न संस्कृताभिवृद्धौ साहाय्यकं भवति । व्यावहारिकदृष्ट्या पश्यामश्चेत् शालासु पञ्चमकक्ष्यातः आरभ्य संस्कृते एकं पत्रमनिवार्यतया भवति चेत् संस्कृतस्य शालास्तरीया अभिवृद्धिः स्यात् । अनन्तरं महापाठशालासु तथा विश्वविध्यालयेषु संस्कृतस्य संस्कृतमाध्यमेन अध्ययनमध्यापनमनिवार्यं भवेत् । आङ्ग्लमाध्यमेन संस्कृताध्ययनं सर्वथा निवारणीयम् । तथा भाषाया अभिवृद्धिः कथञ्चित् सम्भवति । सर्वापेक्षया संस्कृताध्येतृणां कृते उद्योगावकाशः कल्पनीयः । अयं च सर्वकारद्वारा एव कार्यः । तदर्थं राजकीयनेतारः प्रचोदनीयाः । यद्यपि संस्कृतभारतीपक्षतः संस्कृतस्य सर्वप्रियत्वसम्पादने बहु प्रयत्यते तथाऽपि सः प्रयासः संस्कृतविषये जनसामान्येषु जागृतिजनने

साहाय्यकोऽभूत् न तावता सन्तोष्टव्यम् । संस्कृतवाङ्मयस्य विशिष्य शास्त्राणां संरक्षणे महान् उद्यमः करणीयः अस्ति ।

**कर्नाटके संस्कृताभिवृद्धिः -**

प्रायशः भारते सर्वत्र संस्कृतस्य स्थितिः एकरूपैव दृश्यते । कर्नाटकेऽपि तादृशी एव स्थितिः । कर्नाटके सर्वकारपक्षतः यावत् प्रोद्बलं देयमासीत् तावन्न दत्तमेव । अथापि अत्र संस्कृताध्येतारः बहवः श्रद्धया अध्ययनं विधास्यन्ति । महान्तः विद्वांसः अत्र जाताः । इदानीमपि दृश्यन्ते । संस्कृतस्य विषये प्राशासनिकपक्षतः काचिदुपेक्षा एव प्रदर्श्यमाणा आसीत् । संस्कृतशिक्षणसम्बद्ध-प्राशासनिककार्याणि प्रौढशिक्षणमण्डल्यामासीत्, येन च संस्कृतस्य पुरोगतिः कुण्ठिता जाता । इदमिदानीं कर्नाटकसर्वकारेण एकः संस्कृतविश्वविद्यालयः समुद्घाटितः ।

**साम्प्रदायिकपाठशालाः -**

कर्नाटके प्रायशः १७७ पाठशालाः सन्ति । तत्र बह्व्यः पाठशालाः मठैः तथा विशिष्टसंस्थाभिश्च चाल्यन्ते । तदर्थं सर्वकारद्वारा धनमपि दीयते । तत्र पाठशालाः, गुरुकुलानि, विद्यापीठानि तथा महाविद्यालयाः अन्तर्गताः । आसु संस्थासु प्रथमातः आरभ्य साहित्यपर्यन्तं शिक्षणं दीयते, कुत्रचिदेव विद्वन्मध्यमा तथा विद्वदुत्तमकक्ष्याश्च चाल्यन्ते यत्र नैकशास्त्राणामध्यापनं भवति । संस्कृतस्य संरक्षणे अभिवृद्धौ एतासां महद्दायित्वं (योगदानं च) वर्तते । यदि संस्कृतस्याभिवृद्धिः भवितव्या तर्हि एतादृशसंस्थानां परिपोषणम् आर्थिकसाहाय्यञ्च आवश्यकमस्ति । अयमेव प्रधानोंऽशः । द्वितीयोंऽशः अस्ति यत् बह्व्यः पाठशालाः सन्ति यत्र संस्कृतशिक्षणनाम्ना केवलं सर्वकारीयधनं गिलन्ति न किमपि संस्कृतस्याध्यापनम् अध्ययनं वा तत्र प्रचलति । एतादृश-संस्थाद्वारा सर्वकाणीयधनव्ययमात्रं भवति न संस्कृतस्य रक्षणं न वा अभिवृद्धिः भवति । अतः समग्रे कर्नाटके संस्कृतस्य विषये प्राशासनिकं कार्यं संस्कृतविश्वविद्यालयान्तर्गतं कर्तव्यम् । संस्कृतविश्वविद्यालयेन एका समितिः (**squad**) निर्मेया । यया च समित्या पाठशालानां सर्वेक्षणं कार्यम् । यत्र पाठशालायाश्चालनार्थमपेक्षितभवनादिकं (**Infrastructure**) अस्ति न वा, श्रद्धया अध्ययनाध्यापनादिकं भवति न वा इति वीक्ष्य यत्र तत्कार्यं न सम्यक् चलति तस्याः संस्थायाः आर्थिकसाहाय्यं स्थगनीयम् । तद्धनराशिः अन्यत्र संस्थासु यत्र सम्यक्कार्यं प्रचलति तत्र प्रोत्साहनार्थं देयम् । तदैव संस्कृतनाम्ना धनस्य दुर्विनियोगं कुर्वतां भीतिः भवेत् ।

कर्नाटके ये च संस्कृतमहाविद्यालयाः सन्ति यत्र प्रथमातः विद्वदुत्तमपर्यन्तमध्यापनं भवति

तत्राध्यापकानां नियुक्तिविषये झटिति दृष्टिः प्रसारणीया । प्रायशः दश संस्कृतमहाविद्यालयाः सन्ति, सर्वे च ते विश्वविद्यालयद्वारा मान्यतां प्राप्नुयुः । संस्कृतपरीक्षोत्तीर्णानां कृते यदा उद्योगावकाशः अधिको भवति तदा संस्कृताध्ययनाय छात्राः आकृष्टाः भवेयुः । तदर्थं पाठ्यक्रमे कश्चन विपरिणामः आवश्यकः । विद्वन्मध्यमास्तरे आङ्ग्लभाषायाः अध्ययनमनिवार्यं भवेत् । एवमेव ऐच्छिकविषयेषु अवश्यं गणकयन्त्रं (**Computer**), योगः तथा मातृकाशास्त्रं (**Manuscriptology**) योज्यते चेत् पिपठिषूणां छात्राणां कृते सौकर्याय भवति । तदध्ययनेन तादृशक्षेत्रेऽपि उद्योगप्राप्तिः भवेत् । किं च संस्कृताध्येतॄणां कृते छात्रप्रवृत्तिविषये किञ्चिदालोचनीयम् । एतदर्थं दानिनः अन्वेषणीयाः ये च संस्कृतविषये श्रद्धालवः वर्तन्ते । विश्वविद्यालयेन सायन्तनकक्ष्याणां तथा कनिष्ठावधिकक्ष्याणां (**Short term course**) विषयेऽपि चिन्तनं कर्तुं शक्यते, येन च छात्राः लाभान्विताः भवेयुः सर्वथा अधिकाधिकछात्राकर्षणे यद्यदावश्यकं तत्सर्वं कर्तव्यम् । सर्वापेक्षया संस्कृतस्य कृते सर्वकारद्वारा अधिकाधिकधनराशिसम्पादनाय नैके प्रयासाः विधेयाः ।

**शोधकार्यम् -**

संस्कृतक्षेत्रे संशोधनं कर्तुमस्ति महानवकाशः । विशिष्य दर्शनानां विषये बहु संशोधनं कर्तुं शक्यते । मातृकारूपेणोपलभ्यमानानां दार्शनिकग्रन्थानाम् आधारेण दर्शनसम्बन्धि संशोधनं भवितुमर्हति । किं च वैज्ञानिकदृष्ट्या प्राक्कालिकविज्ञानाभिवृद्धिविषये संशोधनायास्ति विपुलोऽवकाशः भारद्वाजविमानशास्त्रविषये वा भवतु, वैदिकगणितविषये वा भवतु चरकसुश्रुतादिप्रदर्शितायुर्वेदविषये वा भवतु प्राक्कालीनशस्त्रचिकित्साविषये वा भवतु, दृग्गाणितमाधारीकृत्य ज्योतिःशस्त्रे वा भवतु दर्शनेषु तत्र तत्र उपलभ्यमानानामुदाहरणानां (यथा दावाग्निदग्धानां वेत्रबीजानां काननकदलीजनकत्वम्, मेघस्याधस्ताद् उङ्ड्यमानानां बलाकानां विना रेतः सेकं गर्भधारणम् इत्यादीनाम्) वैज्ञानिकदृष्ट्या अध्ययनं कर्तुं शक्यते । योगशास्त्रेऽपि बहुधा शोधकार्यं कर्तुं शक्यते ।

**ग्रन्थप्रकाशनम्-**

एवमेव कर्नाटके **O.R.I.** मैसूरुमध्ये उपलभ्यमानानां बहुमूल्यग्रन्थानां प्रकाशनमत्यावश्यकम् । केषाञ्चित् गृहेषु बह्व्यः मातृकाः उपलभ्यन्ते । ताः सङ्ग्राह्याः । कर्नाटकसंस्कृतविश्वविद्यालयेन मातृकाप्रकाशनार्थमेव काचित् परियोजना कर्तव्या । तदर्थं प्रत्येकतया धनराशिः देयः । एवमेव संशोधनकेन्द्राणां कृतेऽपि एतदर्थं प्रोत्साहनं देयम् । संस्कृतविश्वविद्यालयेन

मैसूरुनगरस्थप्राच्यसंशोधनसंस्थया सह सम्मील्य कार्यं कर्तुं शक्यते । विशिष्य समग्रे, कर्नाटके यः कोऽपि संस्कृतसम्बद्धः कार्यक्रमः भवति तेन सह विश्वविद्यालयस्य परोक्षरूपेणापरोक्षरूपेण वा सम्बन्धः स्यादेव । संस्कृतविश्वविद्यालयश्च बालग्रहपीडितश्च न स्यात् । उत्तमवैदुष्यपूर्णानां नियुक्तिः तत्र भवेत्, येन संस्कृताभिवृद्धये महानुपकारः स्यात् ।

आयुर्वेदेन शरीरस्य, योगेन चित्तस्य, दर्शनादिना लब्धज्ञानेन बुद्धेः स्वास्थ्यप्राप्तिरिति सर्वात्मना अभिवृद्धये कारणान्येतानि त्रीण्यपि संस्कृते एव वर्तन्त इत्यतः संस्कृतस्याभिवृद्ध्या समाजस्यैव महान् लाभो भविष्यति इत्यतः तादृशस्य संस्कृतस्याभिवृद्धये सर्वेषां यत्नो भूयादित्याशास्महे ।

*****

# साहित्यक्षेत्रे संस्कृताभिवृद्धौ नूत्नाः योजनाः

- डा. टि.वि. सत्यनारायणः एम्,ए. पि.एच्.डि.
विश्रान्त उपनिदेशकः, ओरियण्टल् रिसर्च् इन्स्टिटयूट्,
मैसूरु विश्वविद्यालयः, मैसूरु

उपर्युक्तविषयावगाहनेन इदमवगम्यते यत् भारते समृद्धं संस्कृतसाहित्यमासीत् । एतज्ज्ञानं लब्धुमेव विदेशीया अपि भारतमागत्य महता प्रयासेन अत्रस्थानां विदुषां परिचयं लब्ध्वा तेषां सहवासेन संस्कृतमधीत्य अत्रस्थपण्डितैः रचितानां विविधशास्त्राणां सम्यग् ज्ञानं सम्प्राप्य स्वदेशेष्वपि संस्कृतसाहित्यस्य प्रचारं प्रसारं च ग्रन्थरचना - बोधनद्वारा कृतवन्तः । परमधुना एतानि साहित्यानि विरलप्रायाणि दृश्यन्ते । सुलभेन ग्रन्था नैवोपलभ्यन्ते । प्राचीनसंस्कृतसाहित्य-ग्रन्थसंरक्षकप्राचीनग्रन्थालया अपि अङ्गुलिगणना वर्तन्ते । तेष्वपि ग्रन्थालयेषु पुस्तकसंरक्षण-कार्याणि ताळपत्र-खर्गजहस्तप्रतीनां संरक्षणानि नैव सम्यक् कृतानि दृश्यन्ते । अस्मद्देशीयविद्वद्भिः विदेशीयपण्डितैश्च लिखिताः ग्रन्था अनायासेन नैवोपलभ्यन्ते । जनेष्वपि अध्ययनासक्तिः संशोधनप्रवृत्तिश्च न्यूनतमा वर्तते । आधुनिकाङ्ग्लभाषाध्ययनकारणेन संस्कृतभाषामाध्यमद्वारा अध्ययनानि अध्यापनानि अतीव विरलानि । राष्ट्रियविचारगोष्ठीषु राष्ट्रियविचारकार्यगारेषु विश्व-संस्कृतसम्मेळनादिष्वपि पण्डिताः स्वस्वसंशोधनप्रबन्धान् स्वयं चिन्तनप्रबन्धांश्च संस्कृतभाषया नैव रचयन्ति नैव भाषन्ते च । आङ्ग्लभाषयैव प्रबन्धान् सज्जीकुर्वन्ति पठन्ति च । वादविवादान् आङ्ग्लभाषयैव कुर्वन्ति । एवं स्थिते संस्कृतभाषायाः व्यापकप्राचीनसाहित्यपरिचयः कथं भवति? निरर्गलतया संस्कृतेन भाषितुं मिथः व्यवहर्तुं संल्लपितुं कथं साध्यन्ते ? संस्कृतसम्मेळनं संस्कृतविचारगोष्ठी राष्ट्रियसंस्कृतकार्यागाराणि इति वदन्ति । किन्तु तत्र विना संस्कृतम् इतरभाषयैव व्यवहाराः दशीदृश्यन्ते । पाठशालमहाविद्यालयादिषु स्नातकोत्तरसंस्कृतविभागादिषु च अध्ययन-कार्याणि आङ्ग्लमाध्यमेन उत प्रान्तीयभाषामाध्यमेन प्रचलन्ति सन्ति । एवं स्थिते संस्कृतस्य संरक्षणं संस्कृतस्य प्रचारः प्रसारश्च कथं सुलभो भवति ? संस्कृतभाषापरिसरं विना कथं जनानां संस्कृतग्रन्थाध्ययने चिन्तनेषु च प्रवृत्तिर्भवति ? यदि विचारगोष्ठीषु यः कोऽपि विद्वान् संस्कृतभाषयैव प्रबन्धं पठति चेत् मिथः संल्लपितुं सन्नद्धश्चेत् स एव तत्र अस्पृश्यप्रायो भवति । इतरेऽपि अयमाङ्ग्लभाषां नैव जानाति । आधुनिकयुगस्यायं नार्ह इत्येवं मन्वते । एवं चेत् संस्कृताध्ययनपरम्परा संस्कृतलेखनपरम्परा कथं जीवति भारते ? संस्कृतभाषया लेखनानि कुर्वाणा

जना अतीव विरलास्सन्ति । संस्कृतभाषया लेखनवाचनं चेद् जना नैव जानन्ति । अतः माऽस्तु संस्कृतभाषया इति ज्ञात्वा एते विद्वांसः संस्कृतेतरभाषाः शरणं गच्छन्ति । एतादृश्यां स्थितौ संस्कृतस्य व्यापकाध्ययनं ज्ञानलाभश्च कष्टप्राय एव खलु । अतः एषु विषयेषु अस्माभिः व्यापकचिन्तनानि करणीयानि । संस्कृतसाहित्यग्रन्थान् शास्त्रदर्शनग्रन्थान् संस्कृतभाषया अध्यापन-कर्तारः जना अतीव विरलास्सन्ति । तेषां सङ्ख्या अत्यन्तं क्षीणाऽस्ति । संस्कृतभाषया प्रबन्धरचयितारः लेखनलेखकाः संस्कृतभाषया वक्तारः सल्लापका अपि दुर्लभाः विद्यन्ते । एवं सति कष्टातिकष्टेन संस्कृतभाषाभिवृद्धिः प्रभवेत् खलु । अत एव संस्कृताभिवृद्धौ नूतनाः योजनाः समालोचनीयाः । विशेषतः संस्कृताभिवृद्धिः प्रचारः प्रसारश्च साहित्यद्वारैव भवेत् । अन्यो मार्गो नास्ति । अत एतद्विषये नूतनाः योजनाः कथं भवेयुरिति मनसि समुत्पन्नानि आलोचनानि बहिर्वदामि ।

१. विशेषतः सर्वत्र संस्कृतक्षेत्रेषु संस्कृताध्ययनानि अध्यापनानि च संस्कृतमाध्यमेनैव भवेयुः । नूतनविषयपरिचायनार्थं प्रादेशिकभाषाः संवरणीया यद्यपि तथापि संस्कृतमाध्यमः अवश्यं भवेदेव । साहित्यसम्बन्धीनि संशोधनानि संस्कृतद्वारैव भवेयुः । संस्कृतेनैव संशोधनलेखनानि चिन्तनप्रबन्धाश्च तिष्ठेयुः । अर्थबोधनार्थं प्रादेशकिभाषामाध्यमः परं पुनरपि संस्कृतमाध्यमेनैव सर्वेषां विषयाणां परिचयः करणीयः । एतदर्थं चिन्तनमन्थनानि अध्यापकेषु विद्वत्सु प्रचलेयुः ।

२. साहित्यिकग्रन्थानां मूलग्रन्थाध्ययनं तत्र देवनागरीलिपिस्थसंस्कृग्रन्थानामध्ययनेनैव भवेत् ।

३. भारते देशे प्राचीनकालात् एतावत्पर्यन्तं विविधभाषासु कृतानि संशोधनग्रन्थरत्नानि स्वतन्त्रग्रन्थाः कष्टातिकष्टेन समुपलभ्यन्ते । अतः एतादृशग्रन्थानां प्रापणाय प्रयत्नाः करणीयाः ।

४. भारतदेशात् विदेशान् गत्वा तत्रैव उषित्वा विद्वद्भिः तत्तद्देशभाषासु संस्कृतसाहित्यग्रन्थाः रचितास्सन्ति खलु । समागत्य अत्र पाठशालादिषु स्थित्वा संस्कृताध्ययनं कृत्वा विविध-भाषासु व्याख्याग्रन्थान् अनुवादग्रन्थान् रचितवन्तः । तेषु ग्रन्थेषु भारतस्य ज्ञानसम्पत्तेः विदुषां पाण्डित्यस्य ज्ञानविज्ञानानां च सम्बन्धिनः बहवो विषयाः निरूपिताः । अधुना एतादृशग्रन्थाः सम्यक् नैवोपलभ्यन्ते । अनेके ग्रन्था अप्रकटिताः सन्ति । एते सुलभेन

यथा प्राप्येरन् तथा प्रयत्ना उपायाश्च करणीयाः । अप्राप्यग्रन्थानां पुनर्मुद्रणार्थमपि प्रयत्नाः स्वीकरणीयाः ।

५. विदेशीयाः जनाः पुरा भारतमागत्य अत्र स्थितं ज्ञानं विज्ञानं च लब्ध्वा भारतीयविदुषां वैदुष्यं च दृष्ट्वा ज्ञात्वा सम्प्राप्य च अतीव मुदिताः गौरवेण अभिमानेन सहृदयेन च भारतस्य ज्ञानसम्पत्तिं भारतीयविदुषां पाण्डित्यं प्रावीण्यं ज्ञानोपदेशसहृदयत्वं च प्रशस्य ग्रन्थान् लिखितवन्तः । प्रबन्धांश्च रचितवन्तः । प्रवासकथनग्रन्थान् लब्धानुभवकथनग्रन्थान् भारतीयप्राचीनविज्ञानविषयकग्रन्थान् च लिलिखुः । एते ग्रन्थाः अधुना नैवोपलभ्यन्ते । वयमधुना एतादृशसंस्कृतग्रन्थाः कुत्र कुत्र सन्ति लभ्यन्ते वा इति तत्र तत्र देशान् गत्वा तादृग्रन्थांश्च सङ्गृह्य तत्प्रकाशनानि कुर्यास्म ।

६. विदेशेषु नानादेशभाषासु संस्कृतभाषासाहित्यस्य विविधप्रकारस्य अनुवादाः कृतास्सन्ति । केचन विदेशीयाः संस्कृतेनैव स्वतन्त्रग्रन्थान् रचितवन्तः । एतेऽपि ग्रन्थाः अधुना नैवोपलभ्यन्ते । तादृशग्रन्थोपपत्त्यर्थम् अन्वेषणानि संस्कृतज्ञैः करणीयानि । यदि ते लभ्येरन् तदा तादृशग्रन्थान् सङ्गृह्य अधीत्य तत्तद्ग्रन्थोपरि सुलभसंस्कृतेनैव ग्रन्थान् रचयेयुः । जनान् च बोधयेयुः ।

७. भारते विदेशेषु च संस्कृतभाषायाः साहित्यक्षेत्रे विविधज्ञानविज्ञानविषयक्षेत्रेषु अध्ययनानि अध्यापनानि च पाठशालासु महाविद्यालयेषु विश्वविद्यालयेषु संशोधनालयेषु च समभवन् । अधुना अनेके विद्यालयाः प्रणष्टाः । अतः एते के के ? एते कुत्र कुत्र आसन् ? के के विषयाः अध्ययनारूढाः । कानि कानि संशोधनानि कृतानि इत्यादिविषयान् अधीत्य संशोध्य सम्पाद्य सुलभसाहित्यशैल्या विद्वांसः ग्रन्थान् लघुलघुप्रबन्धांश्च लिखेयुः संस्कृतभाषया । तदा एतेषां परिचयः सम्यग् भवति । एतद्द्वारा संस्कृताभिवृद्धिरपि भवति । सोत्साहेन एतादृशसाहित्यकार्याणि झटिति भवेयुः ।

८. ज्ञानविज्ञानक्षेत्रे पुरा भारतीयसंशोधकमुनिभिः विज्ञानिभिः अनेकानि इदंप्रथमतया संशोधनानि प्रकाशनानि च कृतानि । गणित-भूगोल-भौतिक-रसायन-प्राणिशास्त्र-सस्यशास्त्र-वास्तुशास्त्र-खगोलशास्त्र-ज्यौतिषशास्त्र-भूगर्भशास्त्र-लोहशास्त्र-खनिजशास्त्र-तन्त्रमन्त्रयन्त्र-विज्ञानेषु च अस्माकं भारतीया नूतनानि संशोधनानि इदंप्रथमं कृतवन्तः । तदनुसृत्य विदेशीयविज्ञानिनः अमूल्यापूर्वसंशोधनानि चक्रुः । परमधुना भारतीयविज्ञानिनां नामान्येव

अस्मदीया जनाः नैव जानन्ति । विदेशीया एव सर्वाणि वैज्ञानिकसंशोधनानि कृतवन्तः भारतीया नैव चक्रुरिति मिथ्या अवजानन्तः विदेशीयानेव प्रशंसन्तस्सन्ति । एतादृशसन्दर्भे अस्मदीयभारतीयचिन्तनशीलविज्ञानज्ञानपण्डितैः कथं नूतनाः आविष्काराः कृताः । विश्वं प्रति एतेषां भारतीयविदुषां योगदानानि कानि इति संशोधनानि करणीयानि । ततः संस्कृतभाषया मनोज्ञसुलभसाहित्यशैल्या लघुलघुग्रन्थान् संस्कृतज्ञाः रचयेयुः उपन्येसेयुः बोधयेयुः प्रचारयेयुः । प्रसारयेयुः ।

९. अधुना समग्रे विश्वे अनेके नूतनाः वैज्ञानिकाविष्काराः सम्भूतास्सन्ति । गणकयन्त्रद्वारा क्षणेनैव सर्वान् विश्वजनीनान् ज्ञातुं शक्यन्ते । गणकयन्त्रस्य अन्तर्जालमाध्यमेन प्राचीनविषयान् इदानींतननूतनाविष्कारानपि वयं सुलभं ज्ञातुं समर्था भवेम । अतः इदानींतननूतनाविष्काराः ज्ञानविज्ञानक्षेत्रेषु के के सञ्जाताः । तैः समाजजनतायै के के उपयोगाः सम्भवन्ति । देशविदेशीयपण्डितैः संस्कृतस्य क्षेत्रे नूतनानि योगदानानि कानि कानि कृतानि इत्यादिकं ज्ञातुम् अध्ययनान्वेषणानि अस्माभिः करणीयानि । ततः इदानींतनजनेभ्यः नूतना विषयाः यथा रोचन्ते तथा संस्कृतभाषायामपि लघुलघुग्रन्थाः संरचनीयाः । प्रत्यक्षप्रदर्शनानि सज्जीकरणीयानि । वस्तुप्रदर्शनानि प्रकल्पनीयानि । विविधदृश्य-श्रव्यमाध्यमद्वारा एतेषां प्रसाराः प्रचाराश्च संस्कृतसाहित्यद्वारा करणीयाः । तदा संस्कृताभिवृद्धिः निरन्तरं भविष्यत्येव ।

१०. एतादृशकार्याणि एक एव संस्कृतज्ञः पुरुषः कर्तुं न शक्तः । साङ्घिकरूपेण एतद्भवेत् । अतः पाठशालासु महाविद्यालयेषु विश्वविद्यालयेषु च निरन्तरं व्यापकाध्ययनानि अध्यापनानि च अध्यापकाः उपन्यासकाः प्रवाचकाः प्राध्यापकाः विमर्शकाः अध्ययनशीलाः संस्कृतज्ञाः कुर्युः ।

११. संशोधनालयेषु, विविधासु सङ्घसंस्थासु संस्कृतसाहित्याध्ययनावकाशाः प्रकल्पनीयाः । नूतनविषयाविष्कारसंस्कृतग्रन्थाः संरचनीयाः तत्तत्क्षेत्रविद्भिः । विचारगोष्ठीः कार्यागाराणि च समायोजयेयुः तज्ज्ञाः । तद्द्वारा संस्कृतसाहित्यस्य व्यापकप्रचारः प्रसारः भवति । यदि समुत्सुकाः संस्कृतासक्ताः संस्कृतसाहित्याध्ययनपराः जनाः एतान् विषयान् अवजानन्ति तदा अनायासेन संस्कृताभिवृद्धिः भविष्यत्येव । अतः वयं सर्वे संस्कृतसाहित्योद्यमनरा भवेम ।

*****

# अग्निपुराणे कूर्मावतार-रामावतारयोः कथा

**डा. नारायणः**
व्याख्याता, द्वैतवेदान्तविभागः
राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः
E-mail : nspm12@gmail.com

"**इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्**"[१] इत्यस्ति भगवद्वचनम्। स्पष्टमेवानेन वचनेन रामायण-भारत-पुराणानां संस्कृत-वाङ्मयेऽनुत्तमशास्त्रत्वं प्रतीयते। भारतं पुराणानि च भगवता बादरायणेन प्रणीतानीत्यत्र नास्ति विप्रतिपत्तिः[२]। रामायणं तु वाल्मीकिप्रणीत-मित्यस्ति प्रथा। ततो भिन्नं प्राचीनतमञ्चास्ति किञ्चिन्मूलरामायणं भगवत्प्रणीतमित्यभि-प्रयन्ति मध्वाचार्याः[३]। न चोपलभ्यते । नाप्युपलब्धमाचार्यकाले वा। न चाप्याचार्योल्लिखित-प्रमाणमन्तराऽन्यत्प्रमाणं पश्यामः मूलरामायणे प्रमाणयितुम्। एवं बादरायणेनाष्टादशपुराणानि प्रणीतानीत्यस्ति प्रथा, प्रमाणञ्च। परमिदानीमुपलभ्यमानेषु शताधिकपुराणेषु बादरायणस्याष्टादशपुराणानि कानीति निर्णयो दुश्शक एव। तत्राग्निपुराणमेवोदाहरणं भवति।

द्विविधमग्निपुराणं वर्तते। एकं तु मुद्रितं प्रसिद्धं चाग्निपुराणम्। अपरममुद्रितं प्राचीनकोशेषु उपलभ्यमानम्।[४] यदिदानीं मुद्रितं तदाश्रित्यायं प्रबन्धोऽनुवर्तते।

अग्निपुराणे द्वितीयाध्यायादारभ्य षोडशाध्यायपर्यन्तं भगवदवताराणां कथाः निरूप्यन्ते। तृतीये कूर्मावतारकथा, पञ्चमाध्यायादेकादशाध्यायपर्यन्तं रामकथा च प्रतिपाद्येते।

वेदोपबृंहकाणि खलु इतिहासपुराणानि[५]। वेदार्थस्तु परमपुरुषो हरिरेव। अतः सर्वाण्यपि पुराणानि प्रायः भगवन्महिमाप्रतिपादकानि तदर्थमन्यदपि प्रतिपाद्यते। ब्राह्माद्यष्टादशपुराणेषु रामायणभारतकथा अपि तत्र तत्र निरूप्यन्ते। न तेषां परस्परसंवादोऽनुभूयते सर्वत्र। क्वचिन्महाभारतरामायणे पुराणानुसारं योजनीये। क्वचिच्च पुराणानि विस्तरग्रन्थानुसारं निर्णेयानि च भवन्ति। एवं वेदेतिहासपुराणानि परस्परसापेक्षाण्येव स्वार्थं प्रकाशयन्ति। एतदेव मनसि निधायाऽत्राग्निपुराणस्थकूर्मरामावतारयोः कथा विवेचनीया।

## O कूर्मावतारकथा विविधपुराणेषु

क्षीरसमुद्रमथनप्रसङ्गे खलु भगवान् स्वीयं कूर्मरूपं प्रकटीचकार। क्षीरसमुद्रमथनकथा तु मत्स्य-ब्राह्म-पद्म-विष्णु-भागवत-देवीभागवत-ब्रह्मवैवर्त-वराह-स्कान्दपुराणेषु पठ्यते।[६]

एवं महाभारतेऽपि। क्षीरसमुद्रमथनकथायां बहवोंऽशाः परस्परं सुविरुद्धाः प्रतिपाद्यन्ते पुराणेषु। क्षीरसमुद्रमथनं कदाऽसीत् ? मन्दरपर्वतः समुद्रं केन कथमानीतः? मथनसमुद्भूतं कालकूटविषं कोऽवाऽपिबत् ? इत्याद्यंशेषु पुराणानि विवदन्ते। परन्तु कूर्मरूपिणा हरिणा मन्दरपर्वतोऽधारि इत्यत्र नास्ति पुराणेषु विवादः। क्वचिदियं कथा कूर्मावतारनिरूपणायैव प्रवृत्ता। क्वचिच्च शिवस्य नीलकण्ठत्वं प्रतिपादयितुं लिङ्गोद्भवकथां वा प्रतिपादयितुं च । पाद्मपुराणस्य ब्रह्मखण्डे - उत्तरखण्डे चेयं कथा निरूप्यते। स्कान्दे पुनः वैष्णव-दक्ष-अम्बिका-माहेश्वरखण्डेषु। क्विचिदमृतप्राप्त्यर्थं क्वचिच्च श्रीप्राप्त्यर्थं च श्रूयते मथनोद्यमः। न तयोस्तथा विरोधः प्रतीयते। मन्वन्तरभेदेनापि तद्योजयितुं शक्यते।

### o अग्निपुराणे कूर्मावतारकथा

अग्निपुराणे तु त्रयोविंशतिश्लोकेषु कूर्मावतारकथा निगद्यते। दुर्वाससः शापेन दैत्यैः पराजिताः देवाः निःश्रीकास्समभवन्। ते च ब्रह्मादिभिस्सह हरिं शरणं जग्मुः। विष्णुप्रेरितास्ते असुरैस्सह सन्धानं कृत्वा क्षीरसागरं ममन्थुः। सागरे निमज्जमानं मन्दरं बभार भगवान् कूर्मरूपेण। मथनोद्गतं कालकूटाख्यविषमपिबच्छिवः। तेन सः नीलकण्ठस्सम्बभूव। तत्रोद्भूता लक्ष्मीः भगवन्तमुपगता। तथा च देवाः सश्रीकास्समभवन्। ततः अमृतकलशधारिणः धन्वन्तरेरा-विर्भावः, अमृतं पाययितुं भगवता स्त्रीरूपधारणम्। माययाऽमृतं पीतवतः राहोः शिरच्छेदनम्। हरप्रार्थनया पुनः स्त्रीरूपधारणम्। हरवीर्यस्खलनम्। तत्र तत्र लिङ्गोद्भवश्चेति कथा एकैक-श्लोकेन निरूपिता।

नात्र पूर्वोक्तविरोधानां परिहारः क्वापि दृश्यते।

### o महाभारततात्पर्यनिर्णये कूर्मकथा

आचार्यमध्वविरचिते महाभारततात्पर्यनिर्णये दशमाध्यायस्याष्ट-विंशतिश्लोकेषु (४-३१) समुद्रमथनकथा निरूपिता। कथेयं भारतपुराणगतसमुद्रमथनकथानां सारसंग्रहरूपा वर्तते। तात्पर्यनिर्णयस्य कथाया एते विशिष्टाः निर्णयात्मकाश्चांशा भवन्ति।

१) द्विः क्षीरसमुद्रमथनमासीत्, रैवतमन्वन्तरे, वैवस्वतमन्वन्तरे चेति। अनेन समुद्रमथन-कालस्य निर्णयो जातः।

२) मन्वन्तरद्वयेऽपि गरुडस्योपर्येव भगवान् मन्दरमारोप्य समुद्रमानिनाय। सः गरुड एव रैवतमन्वन्तरे सुपर्णनामकः। वैवस्वते तु गरुड एवानन्तबलवत्वात् अनन्तनामकोऽपि।

एतेन –

**अनन्तोढो मन्दरस्तु यदा वैवस्वतान्तरम्।**
**अमृतार्थं सुपर्णोढो रैवतस्यान्तरो मनोः।।**

इत्यस्याऽचार्योदाहृतब्राह्मवचनस्याप्यभिप्रायः गरुड एव द्वयोः मन्वन्तरयोः समुद्र-मथनप्रसङ्गे मन्दरं दधारेति।

३) क्षीरसागरमध्ये कूर्मरूपी भगवान् मथनभाजनमासीत्। अन्येन रूपेण देवेषु, अपरेण च दैत्येषु सन्निहितोऽभवत्। शैलस्योपरि बृहद्रूपेण संस्थितस्सः नागराजमप्याविशद् देवानां हितकाम्यया।

इत्येवमादिनिर्णयाः समस्तेतिहासपुराणग्रन्थाधारेणाऽचार्यैः प्रकट्यकारिषत।

**O रामायणकथा**

संस्कृतवाङ्मये विलसन्ति बहून्यार्षप्रणीतत्वेन प्रथितानि रामायणानि। वाल्मीकि-रामायणम् – अध्यात्मरामायणम् – आनन्दरामायणम् – वासिष्ठरामायणं चेति। तन्मूलानि चार्वाचीन–प्रणीतानि रामायणानि गीर्वाणवाण्यां देशीयभाषासु चोपलभ्यन्ते बहूनि। प्रायः पुराणेष्वपि सर्वेषु दशावतारवर्णनप्रसङ्गे वंशानुचरित–निरूपणप्रसङ्गे च रामकथा सङ्गृह्यते। महाभारतेऽप्यस्ति रामकथा।

**चरितं रघुनाथस्य शतकोटि प्रविस्तरम्।**
**येषां वै यादृशी बुद्धिस्ते वदन्त्येव तादृशम्।।** (पद्म.पु.पाताल.१–१४)

इति शतकोटिग्रन्थात्मकमन्यदप्यस्ति मूलरामायणमिति प्रवदन्ति। तदेव च सर्वेषां रामायणाना–मुपजीव्यं स्यात्। न चेदानीं तदुपलभ्यते। परन्तु तपःपावितचेतसा प्राचेतसमुनिनाऽऽदिकविना विधिनिदेशानन्तरं यत्प्रणीतमादिकाव्यं तद्वाल्मीकिरामायणं सर्वमान्यमित्यत्र नास्ति विवादः। यां च कथां नारदः उपदिदेश प्राचेतसाय सैव कथा तेन चतुर्विंशतिसहस्रश्लोकेषु प्रपञ्चितेत्यत्र वाल्मीकिरामायणमेव प्रमाणम्। **"चतुर्विंशत्सहस्राणि श्लोकानामुक्तवानृषिः"** इति। किन्तूपलभ्यमाने रामायणे सन्त्यधिकाः श्लोकाः। ते पुनः प्राक्षिप्तास्स्युः।

एवं रामायणं यथा प्रसिद्धमादिकाव्यं यथा प्रसिद्धश्चाऽदि–कविर्वाल्मीकिः तथा विवाद–

बहुलं रामायणं विवादविषयो वाल्मीकिः। किञ्च सन्ति बहूनि वाल्मीकिविरचितानि रामायणानि आनन्दाद्भुतादीनि। किमेको वाल्मीकिररचयद्बहूनि रामायणानि उताऽसन् बहवो वाल्मीकयः ? यथा ये वेदान् विव्यासुः ते सर्वेऽपि व्यासाः, तथा यो तपोनिरतः वल्मीकेनाच्छादितः स सर्वोऽपि वाल्मीकिरथ वा यः स्वबुद्धिगोचरां रामकथां निबबन्ध सः सर्वोऽपि इत्येवं शङ्का- स्समुद्भवन्ति। तथापि यथा लोके वाल्मीकिरामायणं प्रथितं नान्यत्तथेत्येकं तु समाधानमस्त्येव। अन्यच्च वाल्मीकिप्रणीतत्वेन प्रथितेषु रामायणेषु प्रधानकथा एकैव। यत् न्यूनमधिकं वा सुविरुद्धं दृश्यते तत्परित्याज्यमेव। यच्चापि परस्परमविरुद्धं कथञ्चित् मूलकथानुनेयं तद्ग्राह्यमित्यगतिका गतिः।

**O वाल्मीकिरामायणम्**

वाल्मीकिरामायणे सप्तकाण्डास्सन्ति। ते च बाल-अयोध्या-अरण्य-किष्किन्धा-सुन्दर-युद्ध-उत्तरकाण्डाः। तेषां काण्डानां सारसङ्ग्रह एव दृश्यतेऽग्निपुराणे। आहत्य पञ्च-चत्वारिंशदुत्तर-षट्शतसर्गाः वाल्मीकिरामायणे सन्ति।

**O अध्यात्मरामायणम्**

अत्रापि सप्तकाण्डास्सन्ति। सप्तसु काण्डेषु आहत्य पञ्चषष्टिसर्गाः (६५) तेषु चाऽहत्य चतुस्सहस्राधिकश्लोकाश्च। अत्रोपदिष्टाध्यात्मतत्त्वातिरिक्तः कथाभागः प्रायः वाल्मीकि-रामायणानुसारी एव। अस्य च रामायणस्य माहात्म्यं ब्रह्माण्डपुराणस्योत्तरखण्डेऽस्ति इति मुद्रिताध्यात्मरामायणे तत्प्रकाशितम्। इदमेव च रामायणं श्रीरामचरितमानसस्याऽकरमिति ज्ञायते । एतच्च भगवता बादरायणेन प्रणीतमित्यप्यस्ति प्रथा।

**O आनन्दरामायणम्**

आनन्दरामायणमपि वाल्मीकिप्रणीतमिति प्रसिद्धम्। अस्मिन् रामायणे दशकाण्डा-स्सन्ति। सार-यात्रा-भाग-विकास-जन्म-विवाह-राज्य(पूर्वभागः)-राज्य(उत्तरभागः)-मनोहरपूर्णकाण्डाः ते भवन्ति। प्रथमे सारकाण्डे एव वाल्मीकिरामायणस्य सर्वाऽपि कथा प्रायः संक्षेपेण निरुप्यते। वाल्मीकिरामायणविरुद्धाः केचनांशा अत्र दृश्यन्ते। उपक्रमे एव कौसल्यादशरथयोः पुत्रः राम एव तवान्तक इति विधिबोधितः रावणः दशरथं संहर्तुं प्रयतत इत्यादिकथाभागः विद्यते। अयं वाल्मीकिरामायणस्यात्यन्तं विरुद्ध एव। द्वितीयादिकाण्डेषु रामराज्याभिषेकानन्तरप्रसङ्गाः निरूप्यन्ते।

**आदौ रावणमर्दनं द्विजगिरा तीर्थाटनं सीतया**
**साकेते दशवाजिमेधकरणं पत्न्या विलासाटनम्।**
**स्त्रीपुत्रग्रहणं स्नुषार्थमटनं पृथ्व्याश्च संरक्षणं**
**रामार्चादिनिरूपणं दयितया स्वीयं स्थलारोहणम्॥**

कथेयं दशसहस्राधिकश्लोकैः नवोत्तरैकशतसर्गेषु निरूपिताऽस्ति।

**O अद्भुतरामायणम्**

दशकण्ठ-सहस्रकण्ठरावणयोः संहारकथाऽत्र विद्यते। सीतामाहात्म्यमेवात्र प्रधानतया निरूप्यते। दशकण्ठरावणस्य हन्ता श्रीरामः सहस्रकण्ठरावणसंहारेऽशक्त आसीत्। ततस्सीता महाकालीरूपेण तस्य संहारमकरोदित्यादिकथा सप्तविंशतिसर्गेषु प्रतिपाद्यते। इदमपि वाल्मीकि रचितमिति प्रसिद्धम्।

**O पुराणेषु रामायणकथा**

बहुषु पुराणेषु रामकथाः विक्षिप्य वर्णिताः दृश्यन्ते। कूर्मकथेव रामकथाऽपि दशावतार-निरूपणप्रसङ्गे क्वचित् निरूप्यते। क्वचिच्च वंशानुचरितवर्णनप्रसङ्गे। अप्रकटितवह्निपुराणे त्रिसप्तत्यध्याया-दारभ्य एकाशीत्युत्तरैकशताध्यायं यावत् (७३ तः १८१) नवाधिकैकशता-ध्यायेषु (१०९) सविस्तरं रामकथा दृश्यते। अन्यत्र कूर्म-मत्स्य-गरुड-ब्रह्माण्ड-विष्णु-मार्कण्डेय-ब्रह्मवैवर्त-स्कान्दादिपुराणेषु अत्यल्पस्वध्यायेषु रामकथा संक्षिप्यते।[७] पद्मपुराणे तु पातालखण्डे उत्तरखण्डे च सा प्रतिपाद्यते। स्कान्दे पुनः शिवलीलानिरूपणावसरे तत्र तत्र निरूप्यते।

**चरितं रघुनाथस्य शतकोटिप्रविस्तरम्।**
**येषां वै यादृशी बुद्धिस्ते वदन्त्येव तादृशम्॥**

इति पाद्मवचने रामायणस्य विस्तारवैचित्र्ये प्रदर्शिते।

**O अग्निपुराणे रामायणम्**

द्विविधमग्निपुराणमुपलभ्यते। अप्रकाशितेऽग्निपुराणे १८१ अध्यायास्सन्ति। तत्र १०९ अध्यायेषु रामकथा विस्तारितेत्युक्तमेव पूर्वत्र। प्रकाशिते चाग्निपुराणे ३८३ अध्यायास्सन्ति। तत्र तु सप्ताध्यायेषु रामायणस्य सप्तकाण्डाः क्रमशः निरूप्यन्ते। द्विविधयोरप्यग्निपुराणयोः

रामकथा वाल्मीकिरामायणानुसारिणी। यदप्रकटितमग्निपुराणं तदुपपुराणमित्येव भाति। यतः पुराणान्तर-प्रतिपादिताग्निपुराणविषयानुक्रमस्तावन्न दृश्यतेऽप्रकटिताग्निपुराणे। दृश्यते च प्रकटिताग्निपुराणे प्रायः। न सर्वथा।

अतः प्रकाशिताग्निपुराणस्थरामकथैवात्र स्वीक्रियते। सप्ताध्यायेषु या चात्र रामकथा निरूप्यते सा सर्वाऽपि प्रायः वाल्मीकिरामायणाविरुद्धैव। एतच्च कथोपक्रमोपसंहाराभ्यां स्पष्ट-मवगम्यते। तथा हि -

**रामायणमहं वक्ष्ये नारदेनोदितं पुरा।**
**वाल्मीकये यथा तद्वत्पठितं भुक्तिमुक्तिदम्॥** (अ.पु.५.१)

इत्युपक्रान्ता कथा उपसंह्रियतेऽनेन वचनेन -

**वाल्मीकिर्नारदाच्छ्रुत्वा रामायणमकारयत्।**
**सविस्तरे य एतच्च श्रुणुयात्सदिवं व्रजेत्॥** (अ.पु.११.१३)

तेनास्य रामायणस्य वाल्मीकिरामायणस्य चोभयोः मूलं नारदोपदिष्टमेवेति। किञ्चात्र कथानिरूपणक्रमोऽपि वाल्मीकि-रामायणमनुसरति। तथाऽप्यत्र केचनांशा विवेचनीयाः।

षष्ठेऽध्यायेऽयोध्याकाण्डकथानिरूपणसन्दर्भे -

**अयोध्यालङ्कृतिं दृष्ट्वा ज्ञात्वा रामाभिषेचनम्।**
**भविष्यतीत्याचचक्षे कैकेयीं मन्थराऽसती॥** (६.७)

इति रामराज्याभिषेचनवार्तां श्रुत्वा मन्थरा कैकेयीं तद्विषयमाह। किमाहेति तु प्रसिद्ध एव वचनविषयः। परन्तु अष्टमश्लोकः भवति -

**पादौ गृहीत्वा रामेण कर्षिता सापराधतः।**
**तेन वैरेण सा रामं वनवासं च काङ्क्षति॥** (६.८)

इति कदाचिद्रामेण सा पादग्रहणपूर्वकं कर्षिता तज्जनितावमानेन रामं द्विषन्ती सा रामायाभि-षेचनं न भवेदिति कैकेयीमबोध-यदित्युक्तम्। प्रायः नायं विषयः वाल्मीकिरामायणेऽस्ति।

किञ्च कथासंक्षेपकरणेऽत्र मूलकथाभिप्रायाः पूर्वापरीकृताः दृश्यन्ते। अत्रैव मन्थराप्रसङ्गे-

**कैकेयि त्वं समुत्तिष्ठ रामराज्याभिषेचनम्।**
**मरणं तव पुत्रस्य मम ते नात्र संशयः॥** (६.९)

**कुब्जयोक्तं च तच्छ्रुत्वा एकमाभरणं ददौ।**
**उवाच मे यथा रामस्तथा मे भरतः सुतः॥** (६.१०)

एतावत्पर्यन्तं वाल्मीकिरामायणानुगुणान्येव वाक्यानि। किन्तु-

**उपायं तं न पश्यामि भरतो येन राज्यभाक्।**
**कैकेयीमब्रवीत्क्रुद्धा हारं त्यक्त्वाऽथ मन्थरा॥** (६.११)

अनन्तरं मन्थरा बहुधा प्रयत्नेन कैकेय्याः मनसि भेदभावनामुत्पादयतीत्यत्राग्रे पञ्चदश-श्लोकपर्यन्तं निरूप्यते। यद्यपि 'उपायं तं न पश्यामि भरतो येन राज्यभाक्' इति वाक्यं कैकेय्या मनसि भेदभावोत्पादनानन्तरमेव दृश्यते वाल्मीकिरामायणे। अत्र तु पूर्वमेव तदुक्तमिति कथानिरूपणेऽप्यनौचित्यं दृश्यते।

वाल्मीकिरामायणे सुन्दरकाण्डे प्रत्यभिज्ञानतया सीतोक्तः काकप्रसङ्गः ३८ अध्याये निरूप्यते स च प्रसङ्गः चित्रकूटप्रवेशसमनन्तरमेव घटितः स्यात्। अतोऽत्र -

**भरद्वाजं नमस्कृत्य चित्रकूटगिरिं ययुः।**
**सीतायै दर्शयामास चित्रकूटञ्च राघवः॥** (६.३४,३५)

इत्येवं चित्रकूटप्रवेशमुक्त्वा सपदि काकप्रसङ्गः निरूप्यते। परन्तु काकप्रसङ्गनिरूपणपरोऽयं श्लोकः प्रक्षिप्त इवाऽभाति। एकं तु कारणं वाक्यस्वरूपमेव -

**नखैर्विदारयन्तं तं काकं तच्चक्षुराक्षिपत्।**
**ऐषिकास्त्रेण शरणं प्राप्तो देवान् विहायसः॥** (६.३७)

केवलमनुक्रमणिकानिरूपणपर इव भात्ययं श्लोकः। यद्यप्येतादृशवाक्यानि बहून्यत्रोपलभ्यन्ते। तथैव एतदपि इति वक्तुं शक्यते। तथाऽपि अस्य प्रक्षिप्तत्वे कारणान्तरमप्यस्ति। उत्तरत्र सुन्दरकाण्डकथिानरूपणपरे नवमेऽध्याये -

**उवाच मां यथा रामो नयेच्छीघ्रं तथा कुरु।**
**काकाक्षिपातनकथां प्रातर्याहि हि शोकहा॥** (९.३१)

इति पुनः काकप्रसङ्गः प्रस्तुतः। अत्यन्तं संक्षेपेण रामायणकथां निरूपयितुं प्रवृत्तमिदं पुराणं न क्वापि पुनरुक्तिं कुर्यात्।

किष्किन्धाकाण्डकथानिरूपकेऽष्टमाध्याये द्वितीयः श्लोकः-

**सप्ततालान्विनिर्भिद्य शरेणैकेन पश्यतः।**
**पादेन दुन्दुभेः कायं चिक्षेप दशयोजनम्।।** (८.२)

वालिसंहारशक्तिः रामेऽस्ति वा न वेति सन्दिग्धस्य सुग्रीवस्य सन्देहनिवारणाय सुग्रीवापेक्षया प्रथमं दुन्दुभिकायप्रक्षेपणं ततोऽपि सन्देहापरिहारे सप्ततालविनिर्भेद इति वाल्मीकि-रामायणकथा परन्त्वत्र पूर्वापरीभावः स्पष्टं ज्ञायते।

एवं विविधपुराणेषु निरूपितकथासु पूर्वापरीभावपरस्परविरोधाश्च द्योतन्ते। ते च कथं परिहार्याः इत्यत्र आचार्यमध्वविरचितः महाभारततात्पर्यनिर्णयः मार्गदर्शको भवति।

**पादटिप्पण्यः**

१. इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्।
बिभेत्यल्पश्रुताद्वेदः मामयं प्रतरिष्यति।।
(भारते १.१.८१, वायुपुराणे १.२०१, ब्रह्माण्डे १.१.१८१)

२. अष्टादशपुराणानि कृत्वा सत्यवतीसुतः। पश्चाद् भारत... (आदि. अनुक्रम)

३. पञ्चरात्रं भारतं च मूलमुकरामायणं तथा।
तथा पुराणं भागवतं विष्णुवेद इतीरितः।। इति नारदीये (गी.भा.२.७२)

४. अष्टादशपुराणदर्पण, पृ.सं. २०८, २१५.

५. विस्ताराय तु वेदानां स्वयं नारायणप्रभुः।
व्यासरूपेण कृतवान् पुराणानि .......। (ब्राह्म.पु.१.१५)

६. मत्स्यपुराणम् - २५१ तमे अध्याये, ब्राह्मपुराणम् - १०६ तमे अध्याये,
पद्मपुराणम् - ब्रह्मखण्डे ८ अध्याये, उत्तरखण्डे २३१ अध्याये,
विष्णुपुराणम् - प्र. ९ अध्याये, भागवतम् - ८ स्कन्दे, ७ अध्याये,
देवीभागवतम् - ९ स्कन्दे, ४१ अध्याये, ब्रह्मवैवर्तपुराणम् - प्र.ख.३८ अध्याये,
वराहपुराणम् - ४ अध्याये,

स्कान्दपुराणम् – वै.खं., दक्षखण्डे १५ तः २० श्लोकाः, अम्बिकाखण्डे ११३,११४ श्लोकौ, माहेश्वरखण्डे ९–११ श्लोकाः

७. कूर्मपुराणे – २०, २१ अध्यायौ

मत्स्यपुराणम् – १२ अध्याये

गरुडपुराणम् – १४७ अध्याये

ब्रह्माण्डपुराणम् – मध्य.भा.उपो.२० अध्याये

पद्मपुराणम् – पातालखण्डे – १ तः२० श्लोकाः, उत्तरखण्डे–२६९–२७१ अध्यायाः

ब्रह्मखण्डे – ८,९ अध्यायाः

विष्णुपुराणम् – ४ अंश. ४ अध्याये

देवीभागवतम् – ३ स्कन्दे, २८ तः ३० अध्यायाः

मार्कण्डेयपुराणम् – १११ अध्याये

वह्निपुराणे – ७३ तः १८१ अध्यायाः

ब्रह्मवैवर्तपुराणम् – प्रकृ.खं. १४ अध्याये

स्कान्दपुराणम् – ब्रह्मखण्डे २३ अध्यायः, नागरखण्डे ९३ तः ९६ श्लोकाः

***

**परिशीलितग्रन्थाः**

१) अग्निपुराणम् – चौखम्बा संस्कृत प्रतिष्ठान, २००४.

२) अष्टादशपुराणानि – नाग् प्रकाशनम्, १९८४ तः २००४.

३) वाल्मीकिरामायणम् – गीता प्रेस्, गोरखपुर, १९९३.

४) अध्यात्मरामायणम् – गीता प्रेस्, गोरखपुर, क्र.सं.७४

५) आनन्दरामायणम् – चौखम्बा संस्कृत प्रतिष्ठान, १९९२.

६) अद्भुतरामायणम् – चौखम्बा संस्कृत प्रतिष्ठान, २००३.

७) वासिष्ठरामायणम् – चौखम्बा संस्कृत प्रतिष्ठान, १९९२.

८) अष्टादशपुराणदर्पण – ज्वालाप्रसादमिश्रा, १९९५.

९) श्रीमन्महाभारततात्पर्यनिर्णयः (बन्नञ्जे गोविन्दाचार्यव्याख्योपेतः)२००९.

१०) आचार्यमध्वकृतिषु पुराणानां स्थानं स्वरूपञ्च– डा. नारायणः,२००९.

# भगवान् सृष्ट्याद्यष्टकर्तैव न त्रितयमात्रकर्ता

— डा. रङ्गनाथकट्टि
उपनिदेशकः, पूर्णप्रज्ञसंशोधनमन्दिरम्, बेङ्गलूरु

जगदिदं चित्र-विचित्र नैकचेतनाचेतनजातसहितमिति तत्रभवन्तः भवन्तः महान्तः जानन्त्येव। एतादृशबहुचित्रजगत्सर्जनादेव भगवान् महिमामहीधरो हरिरनन्तगुणः सर्वोत्तमः परशक्तिरिति च प्रथितोऽस्ति। तथा चोक्तं द्वादशस्तोत्रे श्रीमदान्दतीर्थभगवत्पादैः -

'बहुचित्रजगद्बहुधाकरणात् परशक्तिरनन्तगुणः परमः'[१] इति ।

अत एव ब्रह्मसूत्रे प्रथमसूत्रे 'ब्रह्म जिज्ञास्यं गुणपूर्णत्वात्' इत्युक्त्वा तत्रासम्भावनाशङ्कायां, ब्रह्मणि गुणपूर्णत्वमेवासम्भावितमिति असम्भावनाशङ्कायां तन्निरासकतया जीवादिभेदकं विश्वकर्तृत्वाख्यं लक्षणं द्वितीयसूत्रे सूत्रकारैरुक्तम्। एतदेवाभिप्रेत्योक्तं जन्माधिकणप्रारम्भ एव श्रीव्यासतीर्थश्रीमच्चरणैः चन्द्रिकायाम्-

जिज्ञासाकारणीभूतगुणपूर्तिप्रसिद्धये ।
जीवादिभेदकं विष्णोर्विश्वकर्तृत्वमुच्यते ॥[२] इति ॥

अत्र जन्माधिकरणे 'ॐ जन्माद्यस्य यतः'[३] इति सूत्रे जन्मादिपदेन सृष्ट्याद्यष्टकं ग्राह्यम्। तथा हि। 'यतो वा[४]' इति श्रुतौ सृष्ट्यादिचतुष्टयं 'यतो वा इमानि भूतानि जायन्ते'[५] इत्यनेन सृष्टिः, 'येन जातानि जीवन्ति'[६] इत्यनेन स्थितिः, 'यत् प्रयन्ति'[७] इत्यनेन संहारः 'अभिसंविशन्ति'[८] इत्यनेन मोक्षः इत्याहत्य सृष्ट्यादिचतुष्टयं प्रतिपादितम्। 'य आत्मानमन्तरो यमयति'[९] इत्यत्र नियमनं, 'त्वं मुक्तिदो बन्धदोऽतो मतो नस्त्वं ज्ञानदोऽज्ञानदश्चापि विष्णो' इत्यत्र ज्ञानाज्ञानबन्धादयः। एवं चाऽहत्य सृष्ट्याद्यष्टकर्तृत्वं भगवतः लक्षणत्वेन विवक्षितमिति सूत्रकाराणां, भाष्यकाराणां श्रीमदानन्दतीर्थभगवत्पादानां चाऽशय इति तात्पर्यचन्द्रिकायां श्रीव्यासराजगुरुसार्वभौमाः कथयन्ति ॥

परन्तु इदं न सहन्तेऽद्वैतिनः। ते च (ॐ जन्माद्यस्य यतः -ब्र.सू.१.१.२)' इति सूत्रे जन्मादिपदेन सृष्ट्यादित्रितयमेव विवक्षितम् इत्याचक्षते। उक्तं च शाङ्करभाष्ये— 'जन्मस्थितिभङ्गं समासार्थः' इति 'यतो वा' इत्यादिवाक्ये जन्मस्थितिप्रलयानां क्रमदर्शनात् इति ।

नैतच्चारु। 'यतो वा.....'[१०] इत्यादिवाक्ये सृष्टि-स्थिति-संहार-मोक्षाणां चतुर्णां श्रवणात्। 'अभिसंविशन्ति'[११] इत्यनेन मोक्षस्याप्युक्तत्वात्। न च 'अभिसंविशन्ति' इत्येतदपि (न केवलं

यत्प्रयन्ति इत्यन्तमेव किन्तु) प्रलयपरमित्युच्यते । 'यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति'[१२] इत्यत्र 'यतः' 'येन' इति यच्छब्दस्य द्विरिव अत्र 'यत्' इत्यस्य द्विवारमश्रुतेः इति चेन्न । 'प्रयन्ति' इत्यनेन पौनरुक्त्यापत्तेः । तस्माद् 'अभिसंविशन्ति' इत्यस्य मोक्षपरत्वमेवाभ्युपेयम् । ननु 'प्रयन्ति' इत्यनेन सुषुप्तौ ब्रह्मप्राप्तिरुच्यते इति चेन्न । तथा सति चतुष्ट्वापरिहारात् । सृष्टि-स्थिति-संहारापेक्षयाऽधिकस्य सुषुप्तौ ब्रह्मप्राप्तेरङ्गीकारात् । तथा च 'उत्पत्तिस्थितिभङ्गमेवोच्यते' इति वचनं त्यक्तं स्यात् । तस्मात् सृष्ट्याद्यष्टकमेव जन्मादिपदार्थ इत्यगतिकागत्या सर्वैरवश्यमभ्युपेयमेव ।

**जन्मादिपदेन सृष्ट्याद्यष्टकमेव विवक्षितमित्यत्र युक्तयः**

'ॐ जन्माद्यस्य यतः ॐ'[१३] इति सूत्रे जन्मादिपदेन सृष्ट्याद्यष्टकमेव विवक्षितं सूत्रकाराणाम् । विषयेऽस्मिन् नैका युक्तयः प्रदर्शिताः चन्द्रिकाचार्यैः तात्पर्यचन्द्रिकायाम् । याश्चन्यैः प्रयत्नशतेनापि अपोढुं न शक्याः ।

१. सूत्रकृदेव स्कान्दपुराणे-

> उत्पत्तिस्थितिसंहारा नियतिर्ज्ञानमावृतिः ।
> बन्धमोक्षौ च पुरुषात् यस्मात् स हरिरेकराट् ।।[१४]

इति सृष्ट्याद्यष्टकर्तृत्वमेव भगवतः लक्षणमिति स्पष्टमाचष्ट । तस्मात् सूत्रगतेन जन्मादिपदेन सृष्ट्याद्यष्टकमेव ग्राह्यम् । एतेन, जन्माद्यष्टकस्य प्रामाणिकत्वेऽपि सूत्रकारेणाष्टकं विवक्षितमित्यत्र सूत्रकारीयं किमपि ज्ञापकं नास्ति' इति शङ्का परास्ता । भाष्योदाहृतस्कान्दपुराणवचनस्यैव ज्ञापकत्वात् ।

२. विचारविधायकेषु 'तद् विजिज्ञासस्व' 'तद् ब्रह्म' हत्यादिवाक्येषु सर्वेषु अष्टकर्तृत्वमेवाभिहितम् । तस्मात् भाष्योदाहृतस्कान्दपुराणवचनानुसारेण जन्मादिपदेन सृष्ट्याद्यष्टकमेव ग्राह्यम् ।

३. मुमुक्षुभिस्तावद् भगवान् विशिष्य अष्टकर्तृत्वेनावश्यं ज्ञेयः यथा तथाऽन्यकर्तृत्वेनावश्यं ज्ञेय इति नियमो नास्ति । तथा चोक्तं म.भा.तात्पर्यनिर्णये-

> 'सृष्टिरक्षाहृतिज्ञाननियत्यज्ञानबन्धनान् ।
> मोक्षं च विष्णुतस्त्वेव ज्ञात्वा मुक्तिर्न चान्यथा ।।'[१५] इति ।

तस्मादत्र जन्मादिपदेन सृष्ट्याद्यष्टकमेव ग्राह्यम् ।

४. विषयोपपादकगुणपूर्तिप्रसिद्धये जीवाद् भेदकं जन्मादित्रितयहेतुत्वाख्यं लक्षणं द्वितीयसूत्रेऽभिहितम् । एतादृशलक्षणविशिष्टतया भगवतः ज्ञानं तु मोक्षाख्यप्रयोजसिध्यर्थ-मित्यवश्यमङ्गीकार्यम् । तथा च भगवान् मोक्षदाता इत्यायातम् । भगवतः मोक्षदत्वं च बन्धकत्वं विनाऽयोगात् स एव बन्धदाता इत्यप्यङ्गीकरणीयम् । मोक्षबन्धयोश्च तद्धेतुज्ञानाज्ञानदत्वं विनाऽनुपपत्तेः अन्ततस्त्रि(बन्ध-ज्ञान-अज्ञान)हेतुत्वमवश्यमभ्युपगन्तव्यं भवति ।

ननु तर्हि सृष्ट्यादिसप्तकमेवाङ्गीक्रियताम् । किमर्थं नियमनाभ्युपगमः । दीपस्तम इव ज्ञानं बन्धकाज्ञानं स्वभावादेव हन्ति किमीश्वरेण इति न च वाच्यम् । दीप-ज्ञानादिस्वभावस्यापि अस्मन्मते भगवन्नियतत्वात् । तथा चोक्तम् - 'द्रव्यं कर्म च कालश्च स्वभावो जीव एव च । यदनुग्रहतः सन्ति न सन्ति यदुपेक्षया ।।'[१६] इति । एवं च प्रकृतोपयोगितया सृष्ट्याद्यष्टकोक्तिरिति इति सिद्धम् ।

५. अपि च भवद्भिरपि सृष्ट्यादित्रितयकारणत्वं भगवतः किमर्थमुच्यते ? जन्मकारणत्व-मात्रेणालम् । तथा सति स्थितिहेतुरन्यः स्यादिति शङ्का प्रसरेत् । तत्परिहारार्थं सृष्टि-स्थिति-लयकर्ता एक एवेति ज्ञापनार्थम् अनेकलक्षणसूचनार्थं वा त्रितयोक्तिरिति वक्तव्यम् । एवमेवा-स्माभिरपि सृष्ट्याद्यष्टकर्ता एक एवेति ज्ञापनार्थम् अनेकलक्षणसूचनार्थं चाष्टकोक्तिरित्युच्यते । सृष्ट्यादित्रितयमात्रोक्तौ मोक्षादिहेतुरन्यः स्यादिति शङ्का स्यात् ।

६. प्रथमसूत्रे गुणपूर्णत्वाद् ब्रह्म जिज्ञास्यमित्युक्तम् । गुणपूर्णत्वमेवासम्भावितं ब्रह्मणीति असम्भावनाशङ्कायां तन्निरासकतया विश्वकर्तृत्वाख्यं लक्षणं वक्तुं द्वितीयसूत्रं प्रवृत्तम् । तथा च त्रितयकर्तृत्वापेक्षया सृष्ट्याद्यष्टकर्तृत्वमेव भगवत लक्षणमिति वक्तुमुचितम्, येन गुणपूर्णत्वासम्भावनाशङ्कानिरसनं च स्यात् ।

### सृष्ट्यादित्रितयमात्रकर्तृत्वशङ्का तन्निरासश्च

एतदुपरि परो ब्रूयात् 'जन्माद्यस्य यतः'[१७] इति सूत्रे जन्मादिपदेन सृष्ट्यादित्रितयमात्रकर्तृत्वं विवक्षणीयम् । तस्य चेतनाचेतनसमस्तप्रपञ्चसाधारणत्वात् । ज्ञानादयस्तु चेतनमात्रसाधारणाः नाचेतने उपपादयितुं शक्याः । तस्मात् सृष्ट्याद्यष्टकं न भगवतः लक्षणमिति ।

तन्न । चेतनाचेतनात्मकेऽस्मिन् जगति, यस्य वस्तुनः सृष्ट्याद्यष्टके यावत् सम्भवति तावद्धेतुत्वस्य अङ्गीकारात् । सर्वस्मिन् वस्तुनि सृष्ट्याद्यष्टकेन भवितव्यमिति न नियमः । एतदभिप्रायेणैवोक्तं तत्त्वसङ्ख्याने श्रीमदाचार्यैः—

'सृष्टिः स्थितिः संहृतिश्च नियमोऽज्ञानबोधने ।
बन्धो मोक्षः सुखं दुःखमावृतिर्ज्योतिरेव च ।
विष्णुनाऽस्य समस्तस्य समासव्यासयोगतः ।।'[१८] इति ।

अयमेवाभिप्रायः भागवततात्पर्येऽपि वर्णितः -

'सृष्टिस्थित्यप्ययेहानियति-दृशि-तमो बन्धमोक्षाश्च यस्माद्
अस्य श्रीब्रह्मरुद्रप्रभृतिसुरनरद्वीशशत्र्वात्मकस्य ।
विष्णोर्व्यस्ताः समस्ताः ...................... ।।[१९] इति ।

अपिच पूर्वमीमांसायाम् अपि यथाशक्त्यङ्गानुष्ठानाधिकरणे यत्र यावच्छक्यं तत्र तावन्मात्राङ्गोपेतता, इत्ययमेवाभिप्रायः वर्णितः ।।

**नियमनादीनां जन्मादित्रितयान्तर्भावशङ्का तन्निरासश्च**

ननु सृष्ट्यादित्रितयमात्रकर्तृत्वमभ्युपगम्यताम् भगवतः । नियमनादिकर्तृत्वं पृथक् किमर्थमङ्गीकरणीयम् ? नियमनादीनां जन्मस्थितिभङ्गोपेतत्वेन जन्मादित्रितय एवान्तर्भावसम्भवात् । तथा चोक्तं शाङ्करभाष्ये--- 'अन्येषामपि भावविकाराणां त्रिष्वेवान्तर्भावः'[२०] इति ।।

नैतद् युक्तिसहम् । स्वस्वव्यापारेषु प्रवृत्यादिरूपाणां नियमनादीनां विनाशादेरिव जन्मादिमत्त्वेऽपि जन्मादिभ्यो भेदानुभवात् । यथा विनाशस्य जन्मस्थितिमत्त्वेऽपि ताभ्यां भङ्गस्य पार्थक्यं, यथा वा स्थितेः जन्मभङ्गवत्त्वेऽपि ताभ्यां पार्थक्यं तथा नियमनादीनां तत्त्रितयवत्वेऽपि तेभ्यो भेदानुभवात् ।

अपि च भवद्भिरपि उत्पत्त्यादित्रितयमात्रकारणत्वं यद् भगवत उच्यते तन्न युक्तम् । उत्पत्तिकारणत्वे उक्ते ध्वंसस्याप्युत्पत्तिमत्त्वेन ध्वंसकारणत्वस्यापि लब्धत्वेन तस्यापि पृथगवक्तव्यत्वात् । तथा च त्रितयकर्तृत्वं त्वत्पक्षेऽप्यनुपपन्नम् ।

**मोक्षकारणमिति पृथगभिधानमनुचितमिति शङ्का तन्निरासश्च**

ननु भगवतः संहारकारणत्वे मोक्षकारणत्वमेव लब्धम् । मोक्षस्य बन्धध्वंसरूपत्वात् । तथा च पृथक् तदभिधानमनुचितम् इति चेन्न । तथा सति ध्वंसकारणत्वेऽभिहिते उत्पत्तेरपि प्रागभावनिवृत्तिरूपत्वेन ध्वंसत्वेन उत्पत्तिकारणत्वस्यापि लब्धत्वेन भवद्भिर्यदङ्गीकृतं त्रितयकारणत्वं तदपि न स्यात् ।

ननु उत्पत्तिः प्रागभावस्य ध्वंसः न तु उत्पद्यमानस्य । तथा च उत्पद्यमानस्य ध्वंसः भङ्गपदार्थोऽन्यो वाच्य इति चेत् तर्हि मोक्षोऽपि बन्धस्य ध्वंसः, न तु बद्धस्य ध्वंस इत्यङ्गीकुर्मो वयम् । बद्धस्य विशिष्टस्यास्मन्मते पदार्थान्तरत्वेन तद्ध्वंसोऽप्यतिरिक्तो नाशपदार्थः मोक्ष-पदार्थश्चान्य इति सिध्यति ।

अथवा, मोक्षस्तावदिष्टप्राप्तिरनिष्टनिवृत्तिरूपः परमपुरुषार्थः । एतन्नाशपदेन नोच्यते । तस्मान्मोक्षस्य पृथगभिधानं युक्तम् ।

**अज्ञानकारणत्वं पृथङ् न वाच्यमिति शङ्का तन्निरासश्च**

ननु तथाऽप्यज्ञानकारणत्वं न पृथग् वाच्यम् । अज्ञानस्य बन्धरूपत्वेन बन्धकारणत्वोक्त्यैव अज्ञानकारणत्वस्यापि लब्धत्वादिति चेन्न । अस्मन्मते 'अज्ञानं तु न बन्धः, किन्तु बन्धकम् । तस्माद् बन्धकारणस्य अज्ञानस्य न बन्धरूपत्वं, न वाऽज्ञानकार्यस्य बन्धस्य अज्ञानरूपत्वमिति सिद्धम् । एतदभिप्रायेणैव उभयकारणत्वं (बन्धकारणत्वमज्ञानकरणत्वं) पृथगुक्तमिति ज्ञेयम् । तथा च सृष्ट्याद्यष्टकर्तृत्वमेव भगवतः लक्षणं न त्रितयमात्रकर्तृत्वमिति सिद्धम् । एवंरीत्या सूत्रकाराणां भाष्यकाराणां चाऽऽशयाविष्करणे चन्द्रिकाचार्या एव समर्था इति विदितमेव समेषां विदुषाम् । चन्द्रिकाचार्याणामेतादृशीं सूत्रार्थवर्णनवैखरीं दृष्ट्वैवोक्तं नारायणाचार्यैः राघवेन्द्रविजये -

'व्याससूत्रपदार्थोपन्यासमाकर्ण्य मान्यपि ।
व्यासराजस्य भजते दासतां को न कोविदः ।।'[२१] इत्यलमधिकेन ।

**अधष्टिप्पण्यः**

१. द्वा.स्तो.४.३ २. ता.चन्द्रिका. अ.१, अधि.२
३. ब्र.सू.१.१.२ ४. तै.उ. ३.१ ५. तै.उ. ३.१
६. तै.उ. ३.१ ७. तै.उ. ३.१ ८. तै.उ. ३.१
९. बृ.माध्यन्दिनपाठः १०. तै.उ. ३.१ ११. तै.उ. ३.१
१२. तै.उ. ३.१ १३. ब्र.सू.१.१.२ १४. ब्र.सू.भा.उ.स्कान्दवचनम्
१५. म.भा.ता.नि. १.८२ १६. न्या.सु.उदा.श्रुतिवचनम्
१७. ब्र.सू.१.१.२ १८. भा.तात्पर्यम् १.१.१
१९. राघवेन्द्रविजयकाव्यम् -सर्ग.१.श्लो...

*****

# विष्णुसहस्रनामस्तोत्रम्

**डा. श्रीकान्तबायरि**

सहायकसंशोधकः - पूर्णप्रज्ञसंशोदनमन्दिरम्

(एतत्संस्थायां विद्यमानासु आसु हस्तलिखित मातृकासु (मातृकासङ्ख्या १६५२, ११८, ३८२, १३३६, ३७८१, १९३८, २६६६, ४३६) भाष्ये 'रचिता हरिपादयोः' इत्येतदनन्तरं अधोलिखितो ग्रन्थभागोऽधिको वर्तते । अस्य ग्रन्थभागस्यास्मदुपलब्धे तारकब्रह्मानन्दसरस्वती-विरचितविवृतिमातृकात्रयेऽपि विवृतिस्तु न दृश्यते । विवृत्यन्ते 'प्रक्षेपकालुष्यनिरासहेतोः' इत्युक्त्या अस्य भागस्य प्रक्षिप्तत्वमभिप्रेत्य तैः विवृतिरुपेक्षितेति प्रतिभाति ।।)

**भाष्येऽधिकः पाठः**

एकैकनामस्तवनस्यापि फलविशेषसाधनत्वं सर्वपलसाधनत्वं च प्रतिपादयतः विष्णु-धर्मेष्वध्यायैकदेशस्य सहस्रनामव्याख्याने पाठः । सहस्रनामसङ्कीर्तनाशक्तस्य कतिपय-नामसङ्कीर्तनादपि समस्तपुरुषार्थः सिध्यतीति तद्दर्शयितुमाह— (वि.ध.अ.४१)

एकस्यैव समस्तस्य ब्रह्मणो द्विजसत्तम ।
नाम्नां सहस्रं लोकानामुपकारकरं शृणु ।। १० ।।

निमित्तशक्तयो नाम्नां भेदिन्यस्तदुदीरणात् ।
विभिन्नान्येव साध्यन्ते फलानि द्विजसवम ! ।। ११ ।।

यच्छक्तिनाम यत्तस्य तत्तस्मिन्नेव वस्तुनि ।
साधकं पुरुषव्याघ्र ! सौम्यक्रूरेषु वस्तुषु ।। १२ ।।

वासुदेवाच्युतानन्तसत्याजपुरुषोवमैः ।
परमात्मेश्वराद्यैश्च स्तुतो नामभिरच्युतः ।। १३ ।।

निमित्तभावं भगवान्विमुक्तेर्यात्यधोक्षजः ।
तथान्यकार्य.......सिद्धेर्यद्यत्तत्तन्निशामय ।। १४ ।।

धर्मगुब्धर्मकृद्धर्मी धर्मात्मा धर्मकृच्छुचिः ।
शुचिषद्विष्णुर्यज्ञाङ्गः पुष्कराक्ष अधोक्षजः ।। १५ ।।

शुचिश्रवाः शिपिविष्टो यज्ञेशो यज्ञभावनः
नाम्नामित्येवमादीनां समुच्चारणतो नरः ।। १६ ।।

धर्मं महान्तमाप्नोति पापबन्धक्षयं तथा ।
द्रविणप्राप्तये ब्रह्मन् ! देवनामानि मे शृणु ।। १७ ।।

एषां समुच्चारणतो वित्तमाप्नोति भक्तिमान् ।
श्रीदः श्रीशः श्रीनिवासः श्रीनिधिः श्रीनिकेतनः ।। १८ ।।

श्रियः पतिः श्रीपरमः नीमान् श्रीवत्सलाञ्छनः ।
नृसिंहो दुष्प्रशमनो जयो विष्णुस्त्रिविक्रमः ।। १९ ।।

स्तुतः प्रयच्छते चार्थमेवमादिभिरच्युतः ।
कामः कामप्रदः कान्तः कामपालस्तथा हरिः ।। २० ।।

आनन्दो माधवश्चैव कामसंसिद्धये जपेत् ।
रामः परशुरामश्च नृसिंहो विष्णुरेव च ।। २१ ।।

त्रिविक्रमश्चैवमादि जप्यं नाम जिगीषुभिः ।
विद्यामभ्यस्यता नित्यं जप्तव्यः पुरुषोत्तमः ।। २२ ।।

दामोदरं बन्धगतो नित्यमेव जपेन्नरः ।
केशवं पुण्डरीकाक्षं पुष्कराक्षं तथा जपेत् ।। २३ ।।

नेत्रबाधासु सर्वासु हृषीकेशं भयेु च ।
(धन्वन्तरिं गरुत्मन्तं मणिराजं च कौस्तुभम् ।।)
अच्युतं चामृतं चैव स्मरेदोषघकर्मणि ।। २४ ।।

भ्राजिष्णुमग्निं भानुं च जपेदालम्बनस्थितः ।
स......माभिमुखो एच्छन् संस्मरेदपराजतम् ।। २५ ।।

पाताले नरसिंहं च जले क्रोडतनुं स्मरेत् ।
चक्रिणं गादिनं चैव शार्ङ्गिणं खड्गिनं तथा ।। २६ ।।

क्षेमार्थे च प्रयाणे च दिक्षु प्राच्यादिषु स्मरेत् ।
अजितं चाधिकं चैव सर्वं सर्वेश्वरं तथा ।। २७ ।।

संस्मरेत्पुरुषो भक्त्या व्यवहारेषु सर्वदा ।
नारायणं सार्वकालं क्षुतप्रस्खलनादिषु ।। २८ ।।

ग्रहनक्षत्रपीडासु देहबाधायवीषु च ।
दस्युवैरिनिरोघेषु सिंहव्याघ्रादिसङ्कटे ।। २९ ।।

अन्धकारेऽतितीव्रे च नरसिंहमनुस्मरेत् ।
तरत्यखिलदुःखानि तापार्तो जलशयिनम् ।। ३० ।।

गरुडध्वजानुस्मरणाद्विषवीर्यं प्रशाम्यति ।
स्नाने देवार्चने होमे प्रणिपाते प्रदक्षिणे ।। ३१ ।।

कीर्तयेद्भगवन्नाम वासुदेवेति नित्यशः ।
स्थापने वित्तधान्यादेरवध्याने ज दुष्टजे ।। ३२ ।।

कुर्वीत तन्मयो भूत्वा अनन्ताच्युतकीर्तनम् ।
नारायणं शार्ङ्गधरं श्रीधरं पुरुषोवमम् ।। ३३ ।।

वामनं खड्गिनं विष्णुं दुस्स्वप्नेषु च संस्मरेत् ।
एकार्णवे हि पर्यङ्गशायिनं च हरिं स्मरेत् ।। ३४ ।।

वाय्वग्निगृहदाहेषु प्रवृद्धिमुपलभ्य च ।
विद्यार्थी मोहविभ्रान्तिवेगघूर्णितमानसः ।। ३५ ।।

मनुष्यो मुनिशार्दूल ! तदाश्वशिरसं स्मरेत् ।
.....भद्रं समृद्ध्यर्थी सीरकर्मणि कीर्तयेत् ।। ३६ ।।

जगत्सूतिमपत्यर्थी स्तुवन् भक्त्या न सीदति ।
जप्तव्यस्सुप्रजार्थं तु देवदेवश्च सत्तम ! ।। ३७ ।।

दम्पत्योरात्सम्बन्धे विवाहार्थं पुनः पुनः ।
श्रीशं सर्वाभ्युदयिके कर्मण्येवं प्रकीर्तयेत् ।। ३८ ।।

अभष्टार्थेष्वशेषेषु विशोकं च सदा स्मरेत् ।
मरुत्प्रतापाग्निजलबन्धनादिु मृत्युषु ।। ३९ ।।

स्वतन्त्रपरतन्त्रेषु वासुदेवं जपेद्बुधः ।
सर्वार्थशक्तियुक्तस्य देवदेवस्य चक्रिणः ।। ४० ।।

यद्वाभिरोचते नाम तत्सर्वार्थेषु कीर्तयेत् ।
सर्वार्थसिद्धिमाप्नोति नाम्नामेकार्थता यतः ।। ४१ ।।

सर्वाण्येतानि नामानि परस्य ब्रह्मणोऽनघ ।
एवमेतानि नामानि देवदेवस्य कीर्तयेत् ।। ४२ ।।

यं यं काममभिध्यायन् तं तमाप्नोत्यसंशयम् ।
सर्वान् कामानवाप्नोति समाराध्य जगद्गुरुम् ।। ४३ ।।

तन्मयत्वेन गोविन्दमित्येवं दाल्भ्य ! नान्यथा ।
तन्मयो वाञ्छितान् कामान् तथैवाप्नोति मानवः ।। ४४ ।।

निमित्तशक्तिः सा तस्य सर्वशक्तेर्महात्मनः ।
वाङ्मनःकायिकं दोषं यच्च कुर्वन् प्रयात्यधः ।। ४५ ।।

स्वरूपशक्तिभेदस्य मतिभेदकृतं तु तत् ।
स शान्तो निर्मलः शुद्धो ब्रह्मभूतो जगद्गुरुः ।। ४६ ।।

कर्मभिर्नामभिर्जीवैर्दृश्यते दाल्भ्य ! नान्यथा ।
यथा हि गङ्गासलिलं शीतमत्यन्तनिर्मलम् ।। ४७ ।।

एकं विज्ञायते नैकं लोकैः कर्मविभेदतः ।
एकस्वरूपमप्यात्मा पुण्यापुण्यविभेदिभिः ।। ४८ ।।

भ्रान्तिज्ञानान्वितैर्मिश्रसितासितविचेष्टितैः ।
दृश्यते नैकधा दाल्भ्य ! प्राणिभिर्भिन्नबुद्धिभिः ।। ४९ ।।

तापार्तैस्तापशमनं पीतं प्रीत्यातिशीतलम् ।
कफदोषान्वितेनातिप्रीतियुक्तै रिरंसुभिः ।। ५० ।।

स्त्रीयोगाद्द्वेषमाप्नोति प्रीत्या प्रीतिसमन्वितः ।
मध्यस्थबुद्ध्या चैवात्र नातिशीतातितापिभिः ।। ५१ ।।

गम्यते तत्परं ब्रह्म रिपुबुद्ध्या तथापरैः ।
आत्मपुत्रसुहृद्भ्रातृपरबुद्ध्या च नैकदा ।। ५३ ।।

प्राणिभिः कर्मवैषम्यभिन्नबुद्धिभिरव्ययः ।
तद्ब्रह्म गृह्यते दाल्भ्य ! परमार्थं निबोध मे ।। ५४ ।।

भूतेन्द्रियान्तःकरणप्रधानपुरषात्मकम् ।
अपरं ब्रह्मणो रूपं परं दाल्भ्य ! निशामय ।। ५५ ।।

अहेयमक्षरं शुद्धमनुभूतिनिरञ्जनम् ।

विष्ण्वाख्यं परमं ब्रह्म यद्वै पश्यन्ति सूरयः ।। ५६ ।।

इति विष्णुधर्मे (वि.ध.४१) अध्यायैकदेशः । एवमेव नारायणाख्यं परं ब्रह्म ध्येयम् ।

आलोड्य सर्वशास्त्राणि विचार्य च पुनः पुनः ।
इमेकं सुनिष्पन्नं ध्येयो नारायणः सदा ।
तज्ज्ञानान्मोक्ष इत्येतत्सर्वं ज्ञानार्थमेवेति सिद्धम् ।।

श्लोकं वाप्यनुगृह्णाति जपन्तं मधुसूदनम् ।
अपि पादं पठेन्नित्यं न चान्यद्भारते भवेत् ।।

तस्मादेवमुक्तो भगवतैव—

अत्रोपनिषदं पुण्यां कृष्णद्वैपायनोऽब्रवीत् ।
भारताध्ययनात्पुण्यादपि पादमधीयतः ।।

श्रद्दधानस्य पूयन्ते सर्वपापान्यशेषतः ।
शमादिसम्पत्सुयुतैर्ध्येयो यः पुरुषोत्तमः ।
तस्मै नमोऽस्तु कृष्णाय संसारक्लेशहारिणे ।।

।। इति नीमतपरमहंसपरिव्राजकाचार्यनीगोविन्दभगवत्पूज्यपादशिष्येण श्रीशङ्करभगवत्पादाचार्येण विरचितं श्रीविष्णोर्दिव्यसहस्रनामभाष्यं सम्पूणम् ।।

# चातुवर्ण्यव्यवस्थायाः प्रयोजनानि

- के.अनन्तकृष्ण उप्पार्णः
शोधच्छात्रः

चातुर्वर्ण्यव्यवस्था अनादिकालतः प्रवृत्ता अस्ति । अनेकेषु स्मृतिग्रन्थेषु, पुराणादिषु इयं व्यवस्था दरीदृश्यमाणा अस्ति । भगवद्गीतायां चतुर्थाध्याये त्रयोदशतमः श्लोकः तत्र प्रमुखः भवति ।

चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः ।
तस्य कर्तारमपि मां विद्ध्यकर्तारमव्ययम् ।। (भ.गी.४.१३)

अस्मिन् विषये बुद्धिजीविन इति ख्याताः आधुनिकविमर्शकाः विवदन्ते । एषा पद्धतिः, ब्राह्मणैः तदनुयायिभिः क्षत्रियैश्च समाजे निम्नवर्गं वञ्चयित्वा स्वार्थसाधनार्थं प्रवर्त्यत इति ते वदन्ति । अस्मिन् आधुनिकयुगे सर्वेऽपि जनाः केवलं स्वहिते रताः न पुनः राष्ट्रस्य समाजस्य हिते । आधुनिकयुगे प्रभूतधनदाः नैका वृत्तयः सन्ति । तदर्थं स्वकुलक्रमागतां वृत्तिं परित्यज्य अन्यासु वृत्तिषु प्रवर्तन्ते । सर्वेऽपि अनायासेन धनं यस्या वृत्याः सेवनेन लभ्यते तामेव चिन्वन्ति । अतः देशरक्षणे योद्धारः आरक्षकपुरुषाश्च भवितुं नेच्छन्ति यतः श्रमसाध्याः वृत्तयस्ताः । कृषिक्षेत्रेऽपि आधुनिकाः युवानः नोत्सहन्ते । पल्लीं परित्यज्य पत्तनं प्राप्य सुलभां वृत्तिं चिन्वन्ति ।

चातुर्वर्ण्यव्यवस्थायाः यथावत् अनुष्ठाने यद्यपि क्लेशः अनुभूयते । सर्वेऽपि कुलक्रमागतामेव वृत्तिं स्वधर्मरूपेण अनुसरेयुः इति शासनसम्भवात् स्वातन्त्र्यं नष्टं भवति । निम्नवर्गेऽस्य जनस्य उत्तमोद्योगेषु अवकाशः निराकृतः भवति । एवमेव उच्चवर्गीयस्य जनस्य कृष्यादिषु निम्नवर्गीयवृत्तिषु प्रवेशः शास्त्रेण शासनेन वा निराकृतः भवेत् । अतः उच्चवर्गीयाः अपि जनाः स्वाभिरुचिविरुद्धामेव वृत्तिं कुर्युः ।

परन्तु आधुनिकवर्णव्यवस्थया सम्प्रदायागताः अनेके उद्योगाः नष्टाः स्युः । विंशतितमशतमाने जागतिकयुद्धानन्तरं जनसङ्ख्या तीव्रतया वर्धमानाऽस्ति । एतेषां बहुसङ्ख्याकानां प्रजानां विभिन्ना उद्योगावकाशाः अन्वेष्टव्याः सञ्जाताः । साम्प्रदायिका उद्योगाः बहुभिः परित्यक्ताः । अनया स्थित्या इदानीन्तनदिवसेषु कृष्यादिषु कष्टसाध्येषु उद्योगेषु युवानः न प्रवर्तन्ते । अतः आहारधान्यानां उत्पत्तिः न्यूना जायते । धान्यादिकं अन्येभ्यः देशेभ्यः आयातीक्रियते । जनाः परावलम्बिनः जाताः । एवं चातुर्वर्ण्यव्यवस्थायाः परित्यागेन क्लेशः अनुभूयमानः दरीदृश्यते । निरुद्योगसमस्या च बाधते ।

इदानीं चातुर्वण्यवस्थामेव चिन्तयामः । चातुवर्ण्यव्यवस्थाधारेण उद्योगकरणे सर्वेषामपि उद्योगः

पूर्वमेव निश्चितः भवति । आधुनिकविद्यायाः लाभाय बहुधनव्ययः करणीयः । निर्धनानां तत्र प्रवेशः नास्ति । उद्योगलाभनिश्चयोऽपि नास्ति । उन्नतविद्यावाप्तये प्रायः त्रिंशद्वर्षपर्यन्तम् अध्ययनं करणीयम् । विंशतिवर्षीया युवानः स्त्रियो वा तावत्पर्यन्तम् अविवाहिताः तिष्ठन्ति । अनया प्रवृत्या मनोविकारः जायते । तेन च बहवः अनर्थाः समाजे जायन्ते । चातुर्वर्ण्यव्यवस्थाश्रयणे च अस्य अवकाशः नास्ति । स्वीयां कुलक्रमागतां वृत्तिमाश्रित्य सुखेन जीवन्ति । निरुद्योगसमस्याऽपि नास्ति । श्रमसाध्यामपि वृत्तिम् आश्रित्य सुखेन जीवन्ति । तेष्वपि कश्चन बुद्धिमान् उन्नताध्ययनं कृत्वा उत्तमोद्योगं प्राप्तुं शक्नुयात् ।

ब्राह्मणादयः समाजस्य शोषणं कुर्वन्ति, निम्नवर्गं इतोऽपि दीनं कुर्वन्ति इति तु असाधुवादः । यतः तेषामपि समाजरक्षणबद्धता शास्त्रेणैव विहिता ।

ब्राह्मणस्य च देहोऽयं क्षुद्रकामाय नेष्यते ।
कृच्छ्राय तपसे चैव प्रेत्यानन्तसुखाय च ।। इति ।। (भाग.११.१७.४२)

एवमेव क्षत्रियाणां विशां च देशरक्षणे व्यापारे च बद्धता अस्त्येव । एवं च सर्वेषां जनानां स्वीयवृत्तेः पूर्वमेव निश्चितत्वेन तत्र कौशलसम्पादनेन तस्यां एव वृत्यां ते चतुराः भवेयुः । प्रभूतं धनं च आर्जयेयुः सुखेन जीवेयुश्च । एतस्य निदर्शनत्वेन विजयनगरसाम्राज्यादिकालीनस्य इतिहासस्य अवलोकनं कर्तुं शक्यत्वेन वादोऽयं साधुतरः एव ।

चातुर्वर्ण्यव्यवस्थाविषये श्रीमन्मध्वाचार्याः गीतातात्पर्ये नारदीयं वचनं उदाहरन्ति ।

स्वाभाविको ब्राह्मणादिः शमाद्यैरेव भिद्यते ।
योनिभेदकृतो भेदः ज्ञेय औपधिकस्त्वयम् ।। (गीतातात्पर्यम् -४.१३)

वर्णाश्रमव्यवस्था प्रधानतया जीवस्वरूपसम्बन्धिनी भवति । अयं ब्राह्मणादिव्यवहारः योनिभेदकृतः औपाधिक एव । शमादिसम्पन्नः शूद्रोऽपि ब्राह्मणतुल्यः भवति । इमां वर्णाश्रमव्यवस्थां आसृष्टि पालयति देशेऽस्मिन् समाजसौहार्दं न नष्टम् इति इतिहासादिभ्यः ज्ञायते । यथा वसिष्ठादीनां विप्राणां गौरवं तथा व्यासविधुरधर्मराजादीनां अपि मान्यता श्रूयते । जन्मतोऽविप्राः अपि शमदमादिसाधनसम्पत्त्या नूनं विप्रा भवेयुः । एवं च शूद्रादिष्वपि शमादिमन्तः उन्नतस्थानं प्राप्तुमर्हन्ति । अतः चातुर्वण्यव्यवस्थायाः पालनेन समाजस्वास्थ्यं भज्येतेति वादः न युक्तः । उद्योगस्थिरता सर्वेषां च उद्योगः, लोकस्य अभिवृद्धि, सर्वेषां च सुखमयं जीवनं अनया पद्धत्या भवितुमर्हति । अतः चातुर्वर्ण्यव्यवस्थायाः इदानीन्तनदिवसेषु अप्रस्तुतत्वं नास्ति । *****

# भागवतोक्ता अणिमादिसिद्धयः

- वेङ्कटनरसिंहाचार्यः
शोधच्छात्रः, पूर्णप्रज्ञसंशोधनमन्दिरम्

मान्याः विदितमेवेदं तत्रभवतां भवतामध्यात्मबन्धूनां यत् - सर्वेषु पुराणेषु श्रीमद्भागवतं पुराणं सर्वोच्चं स्थानं लभत इति । तथा चोक्तम् - 'पुराणेषु च सर्वेषु श्रीमद्भागवतम् परम्' (.......) इति । पुराणतिलकमिदं परापरतत्वप्रकाशनेऽध्यात्मदीपायमानं सत् कं जनं न रञ्जयेत् । अष्टादशसहस्रश्लोकैः द्वादशस्कन्धैश्च भूषितोऽयं ग्रन्थः प्रमेयैरपूर्वैः विदुषां समेषामपि दुरधिगमश्चकास्ति । ग्रन्थेऽस्मिन् द्वितीयस्कन्धः एकादशस्कन्धश्च विदुषां विद्वत्ताया निकषायमानौ इत्युक्ते नातिशयोक्तिः ।

प्रकृते भागवतस्य एकादशस्कन्धे पञ्चदशाध्याये याः सिद्धय उक्ता तन्निरूपणमस्य लेखनस्य लक्ष्यम् । भागवते एकादशस्कन्धस्य पञ्चदशाध्याये 'सिद्धयोऽष्टादश प्रोक्ताः'[१] इति श्लोके अष्टादशसिद्धयः प्रोक्ताः । ताश्चाधोनिर्दिष्टरीत्या वर्तन्ते ।

१. अनूर्मिमत्त्वम् २. दूरश्रवणम् ३. दूरदर्शनम्
४. मनोवेगः ५. कामरूपत्वम् ६. परकायप्रवेशः
७. स्वच्छन्दमृत्युता ८. देवैः सह विहारः ९. यथासङ्कल्पसिद्धिः
१०. अप्रतिहताज्ञम् ११. त्रिकालज्ञत्वं १२. परचित्ताद्यभिज्ञता
१३. अग्निस्तम्भः १४. अर्कस्तम्भः १५.जलस्तम्भः
१६. विषस्तम्भः १७. शस्त्रास्त्रशापादीनां प्रतिस्तम्भः
१८. अपराजितत्वं

१. अनूर्मिमत्वम् - अनूर्मिमत्त्वं नाम १. अस्ति २. जायते ३. वर्धते ४. परिणमते ५. अपक्षीयते ६. नश्यति इति षडूर्मिनिमित्तकक्षुत्पीडादि दुःखाभावः इति केचिद् व्याचक्षते ।

२. दूरश्रवणम् - सहस्रयोजनव्यवहित पशु-पक्षिणां सम्भाषणश्रवणशक्तिः ।

३. दूरदर्शनम् - सहस्रयोजन-व्यवहित-पदार्थदर्शनशक्तिः ।

४. मनोवेगः - मनसो यावान् जवः (वेगः) तावान् -वेगः स्थूलशरीरस्यापि भवति चेत् सा मनोजवसिद्धिः

५. कामरूपत्वम् - गजादिप्राणिरूपं यद् यद् प्राप्तुमिच्छति तत्तत्प्राणिरूपावाप्तिः कामरूप-सिद्धिः ।

६. परकायप्रवेशः - स्वीयशरीरमेकत्र स्थापयित्वा पुष्पात् पुष्पान्तरं भ्रमरः यथाऽनायासेन गच्छति तथाऽनायासेन परशरीरप्रवेशः परकायप्रवेशसिद्धिः ।

७. स्वच्छन्दमृत्युता - योगी यदा विनाऽऽयुःक्षयं मृत्युमभिलषति तदा तदवाप्तिः स्वच्छन्दमृत्युतासिद्धिः ।

८. देवैः सह विहारः - यदा योगी देवोद्यानेषु देवैः सह विहर्तुमिच्छति तदा सुरस्त्रियः विमानेन तत्पुरत उपतिष्ठन्ति । ताभिः साकं योगी विहरति । इयमेव देवैः सह-क्रीडासिद्धिरित्युच्यते ।

९. यथासङ्कल्पसिद्धिः - योगी यथा यथा सङ्कल्पयेत् तथा तथा सङ्कल्पितान्नपानाद्यभीष्टं प्राप्नोति । इत्ययमेव यथासङ्कल्पसिद्धिरिति कथ्यते ।

१०. आज्ञाऽप्रतिहतिः - यथा हरेराज्ञायाः (इच्छायाः) प्रतिहतिर्नास्ति तथा योगिनः आज्ञाया अपि प्रतिहतिर्न सम्भवति । भूमिष्ठाः पुरुषाः प्राणिनश्च तदाज्ञानुसारेण प्रवर्तन्ते । इयमेव आज्ञाऽप्रतिहति सिद्धिरिति कथ्यते ।

११. त्रिकालज्ञत्वम् - यस्मिन् युगे यो योगी जातः तस्मिन् युगे स्थितवस्तुविषये विना वेदादिकं योगसामार्थ्यात् कालत्रयेऽपि ज्ञानिता, त्रिकालज्ञत्वसिद्धिः । न तु अतीतानागतासर्युगस्थ-पदार्थज्ञानम् ।।

१२. परचित्ताद्यभिज्ञता - परेषां शरीरेषु अनाविष्टः सन्नेव परचित्तगतज्ञानं परचित्ताभिमतासिद्धि-रिति कथ्यते ।

१३. अग्निस्तम्भः १४. जलस्तम्भः १६. विषस्तम्भः १७. शस्त्रास्त्राशापादीनां स्तम्भः - अग्नि-सूर्य-जल-विष-शत्रुभिः व्याघ्रादिमृगैश्च, ब्रह्मास्त्रभिन्नशस्त्रास्त्रैश्च स्वीयशरीरेऽविकारत्वं यथा भवेत् तथा अग्न्यादिदेवताशक्तिस्तम्भनं, सहनं वाऽग्न्यादिसिद्धयः' इति ज्ञेयम् । आभिः सिद्धिभिः सम्पन्ना योगिनः जले जलचरणां मत्स्यादीनां यथा कोऽप्युद्रवः न भवति तथाऽग्न्यादिभिरपि योगिनः कोऽपि उपद्रवः न भवति ।

१८. अपराजयः - मनुष्यैः पराजयाभावोऽपराजयः । एवमाहत्य अष्टादशसिद्धयो भवन्ति । तथा चोक्तं भागवते-

'सिद्धयोऽष्टादश प्रोक्ता धारणायोगपारगैः ।
तासामष्टौ मत्प्रधाना ता एव गुणहेतवः ।। ३ ।।'[२] इति ।

अणिमा महिमा मूर्तेर्लघिमा प्राप्तिरिन्द्रियैः ।
प्राकाश्यं श्रुतदृष्टेषु शक्तिः प्रेरणमीशिता ।। ४ ।।

गुणेष्वसङ्गो वशिता यत्कामस्तदवाप्स्यति ।
एते मे सिद्धयः सौम्याष्टावौत्पत्तिका मताः ।। ५ ।।

अनूर्मिमत्त्वं देहेऽस्मिन् दूरश्रवणदर्शनम् ।
मनोजवः कामरूपं परकायप्रवेशनम् ।। ६ ।।

स्वच्छन्दमृत्युर्देवानां सहक्रीडानुदर्शनम् ।
यथासङ्कल्पसंसिद्धिराज्ञाऽप्रतिहतागतिः ।। ७ ।।

त्रिकालज्ञत्वमद्वन्द्वं परचित्ताद्यभिज्ञता ।
अग्न्यर्काम्बुविषादीनां प्रतिस्तम्भोऽपराजयः ।। ८ ।।

भागवतात्पर्ये श्रीमदाचार्यैः एतासां नामनिर्देशपूर्वकं सङ्ग्रहः कृतः - 'अनूर्मिमत्त्वम्' इत्यादिना ।

**अणिमाद्या अष्टसिद्धयः**

अणिमा महिमा मूर्तेर्लघिमा प्राप्तिरिन्द्रियैः ।
प्राकाश्यं श्रुतदृष्टेषु शक्तिः प्रेरणमीशिता ।। ४ ।।
गुणेष्वसङ्गो वशिता यत्कामस्तदवाप्स्यति ।
एते मे सिद्धयः सौम्याष्टावौत्पत्तिका मताः ।। ५ ।।[३]

इति श्लोके अणिमाद्यष्टसिद्धयः कथिताः ।

१. अणिमा २. महिमा ३. लघिमा ४. प्राप्तिः ५. प्राकाश्यं ६. ईशिता ७. वशित्वं ८. प्राकाम्यम्

१. अणिमा - अणिमासिद्धिसम्पन्नाः सर्षपतुल्यसूक्ष्मपरिमाणोपेतशरीरधारणे समर्था भवन्ति । स्वस्थूलशरीरस्याणुत्वापादने समर्था भवन्तीत्यर्थः ।
२. महिमा - महिमासिद्धिसम्पन्नाः महत्परिमाणोपेतशरीरधारणे समर्था भवन्ति ।

३. लघिमा - लघिमासिद्धिमतां स्थूलशरीरे अतीवलघुता भवति । यया तेषां शरीरं पिपिलिकाऽपि वोढुं प्रभवति ।

४. प्राप्तिः - इन्द्रियैः दूरदेशस्थविषयप्राप्तिः प्राप्तिनामिका चतुर्थी सिद्धिः ।

५. प्राकाश्यम् - श्रुतेषु दृष्टेषु वस्तुषु वेदादिषु तदर्थादिषु च प्राकाश्यं प्रकाशवत्वं (ज्ञानवत्वं) पञ्चमी सिद्धिः ।

६. ईशिता - परकीयशक्तिप्रेरणमीशितृत्वम् ।

७. वशित्वम् - सर्ववस्तुसम्बन्धकृतलेपाभावेन सर्ववशीकरणं वशित्वम् ।

८. प्राकाम्यम् - प्रकर्षेण कामितार्थावाप्तिः प्राकाम्याख्याऽष्टमी सिद्धिः ।

ननु प्रकर्षेण कामितार्थप्राप्तिर्हि प्राकाम्यम् । ततश्च अणिमादिसिद्धेरपि कामितार्थप्राप्तिरूपत्वादणिमादेः पृथक्प्राकाम्याभावेन सिद्धीनामष्टत्वकथनमसङ्गतमिति चेन्न । यद्यद्विषयभोगेन यो य आनन्दः भवति तत्तद्विषयभोगं विना तदानन्दकामनायां तदानन्दप्राप्तिरेव प्राकाम्याख्याऽष्टमी सिद्धिः । अतः अणिमादिसप्तसिद्धिभ्य इयं पृथक् सिद्धिः । चूतफलभक्षणादिजन्यानन्दो मे स्यादिति यदा कामयते तदा चूतफलभक्षणाभावेऽपि स आनन्दौ भवतीति फलितार्थः ।

ननु पूर्वं 'सिद्धयोऽष्टादश प्रोक्ताः'[४] इति श्लोके अष्टादशसिद्धयः कथिताः । 'अणिमा महिमा .....'[५] इति श्लोके तु अष्टसिद्धयः कथिताः । अतः पदस्परं विरोध इति चेन्न । प्रधानभूताः सिद्धयोऽष्टैव । याभिरप्रधानभूता अष्टादशसिद्धयो जन्यन्ते । तथा च अष्टसिद्धिस्वेव अष्टादशसिद्धयोऽन्तर्गता इति ज्ञेयम् ।

अनूर्मिमत्वसिद्धिः प्राकाम्यसिद्धावन्तर्भवति । तथा हि– अनूर्मिमत्त्वं षडूर्मिनिमित्तकक्षुत्पिपासादिदुःखराहित्यम् । तच्च विना भोगं प्रकर्षेण आसमन्तात् काम्यमानत्वात् प्राकाम्यमेव । दूरश्रवण-दूरदर्शन-त्रिकालज्ञत्व-परचित्ताभिज्ञताख्याः चतस्रः ज्ञानसिद्धयः, प्रकाशविशेषरूपतया प्राकश्यसिद्धावन्तर्भवन्ति । कामरूपत्वसिद्धिः अणिमा-महिमा-लघिमासु त्रिष्वपि सिद्धिष्वन्तर्भवति । अग्निस्तम्भ-सूर्यस्तम्भ-जलस्तम्भ-विषस्तम्भ-शस्त्रादिस्तम्भाः सर्ववशीकरणरूपवशित्वसिद्धावन्तर्भवन्ति । मनोजव-कामरूप-परकायप्रवेश-स्वच्छन्दमृत्युत्व-देवैः सहक्रीडा-यथासङ्कल्पसिध्याख्याख्याः षट्सिद्धायः, तत्तत्सम्बन्धरूपप्राप्तावन्तभवन्ति । आज्ञाऽप्रतिहति-अग्निस्तम्भ-जलस्तम्भ-सूर्यस्तम्भ-विषस्तम्भ-शस्त्रशापादिस्तम्भ-अपराजयाख्याः सप्तसिद्धयः

परकीयशक्तिप्रेरणरूपे ईशित्वेऽन्तर्भवन्ति । एवमष्टसिद्धिभ्योऽष्टादश-सिद्धयस्ताभिश्चापरिमिता अन्यसिद्धयो जायन्ते । तथा चोक्तं भागवतात्पर्ये श्रीमन्मध्वाचार्यैः -

'अनूर्मिमत्त्वसिद्धिस्तु प्रकाम्यान्तर्गता स्मृता ।
दूरश्रुतिर्दूरदृष्टिस्त्रिकालज्ञत्वमेव च ।
परचित्ताद्यभिज्ञानं प्राकाश्यान्तर्गतानि च ।
अणिमादित्रयान्तश्च कामरूपत्वमिष्यते ।
अग्न्यर्काम्बुविषादीनां प्रतिस्तम्भो वशित्वगः ।
मनोजवः कामरूपं परकायप्रवेशनम् ।
स्वच्छन्दमृत्युता देवैः सह क्रीडेष्टसाधनम् ।
प्राप्तावन्तर्गतान्याहुराज्ञाऽप्रतिहतिस्तथा ।
अग्निस्तम्भो रविस्तम्भ उदकस्तम्भ एव च ।
विषस्तम्भस्तथा शस्त्रशापादिस्तम्भ एव च ।
ईशित्वान्तर्गतान्याहुरपराजयमेव च ।
एवमष्टादशाष्टभ्यो जायन्ते सिद्धयः क्रमात् ।
अष्टादशभ्यस्त्वन्यास्तु जायन्ते सिद्धयोऽमिताः ।।[६] इति ।।

एवमणिमादिसिद्धिभिः साकमष्टादशसिद्धीनां परिगणने आहत्य षड्विंशतिसिद्धयः भवन्ति । गरिमसिद्धेरपि परिगणने सप्तविंशतिसिद्धयो भवन्ति । एताः सिद्धयः देवेतरेष्वेव । देवनां तु केवलमष्टसिद्धयः याश्च तेषु निस्सीमकाः । एतास्वष्टसिद्धिष्वेवाष्टादशसिद्धयोऽप्यन्तर्भवन्ति । एताः सिद्धयः, इन्द्रेश-वायु-श्री-विष्णुषु उत्तरोत्तरं क्रमेणधिका इति ज्ञेयम् । परिपूर्णाः सिद्धयः विष्णावेकस्मिन्नेव नान्येषु' इति भागवतात्पर्योदाहृते ऐश्वर्याख्ये ग्रन्थेऽभिहितम् ।

'इति षड्विंशतिः प्रोक्ता गरिम्णा सह सप्त वा ।
विंशतिश्च सुरेभ्योऽन्यत् देवेष्वष्टैव सिद्धयः ।
एता निस्सीमकास्तेषां देवानामष्टसिद्धयः ।
अतोऽष्टादशसिद्धीनां तदन्तर्भाव इष्यते ।
देवेष्विन्द्रेशवायुश्रीविष्णूनामुत्तरोत्तरम् ।
सिद्धयः परिपूर्णास्तु विष्णोरेकस्य नान्यगाः ।।' इति इत्यैश्वर्ये ।।[७]

**गरिमासिद्धेः पृथग् अग्रहणे कारणम्**

ननु बहुस्थलेषु अष्टमहासिद्धिपरिगणनावसरे गरिमासिद्धिरपि गृह्यते । तथा चोक्तममरसिंहेनामरकोशे

**'अणिमा महिमा चैव गरिमा लघिमा तथा ।**
**प्राप्तिः प्राकाश्यमीशित्वं वशित्वं चाष्टसिद्धयः ।।'** इति

तस्मात् 'अणिमा महिमा....'[८] इति श्लोके कस्माद् गरिमासिद्धिः न पृथग्गणिना ? न च महिमग्रहणेन तस्यापि ग्रहणमिति वाच्यम् । आकाशादेर्महिमत्वेऽपि गुरुत्वाभावात् पर्वतादौ महिमत्वाभावेऽपि गुरुत्वभावात् इति शङ्कायामेवं समाहितं श्रीमदाचार्यैः -

**'गरिम्णः सैव हेतुः स्यात् महिमाहेतुधारणा ।**
**प्रायोऽष्टसिद्धिकथनेष्वयं न पृथगुच्यते ।।'** इति ।

महिमाख्यसिद्धेः हेतुभूता या धारणा सैव गरिमाख्यसिद्धेरपि हेतुः । एवं च एकसाधनजन्यत्वादेकत्वविवक्षया अष्टसिद्धिकथनावसरे पृथङ्नोच्यते प्रायः बहुग्रन्थेषु । अत्र धारणानाम - अपरोक्षज्ञानिनः तत्तदधिष्ठानगतभगवद्रूपविशेषानुस्मरणम्' इति ज्ञेयम् ।

कतिपयग्रन्थेषु प्राप्तिप्राकाश्ययोरेकधारणाहेतुकत्वेन प्राप्तिग्रहणेनैव प्राकाश्यग्रहणसिद्धिरिति तयोरेकत्वविवक्षया गरिमासिद्धिं पृथग् गणयन्ति । भागवते तु तयोरैक्यविवक्षया गरिमासिद्धिः पृथङ्नोक्तेति ज्ञेयम् । तथा चोक्तं भागवततात्पर्ये-

**'प्राप्ति-प्राकाश्ययोश्चापि धारणैकाऽपि सम्भवेत् ।**
**अत ऐक्येन तामुक्त्वा गरिमाणं पृथक् क्वचित् ।।'** इति ।।

**'सिद्धयोऽष्टादशप्रोक्ता धारणायोगपारगैः ।**
**तासामष्टौ मत्प्रधाना अष्टैव (ता एव) गुणहेतवः ।।'**[९]

इत्यत्र 'अष्टैव गुणहेतवः' इत्यस्य 'अणिमाद्यष्टसिद्धय एव गुणभूतानाममुख्यानां अनूर्मिमत्त्वादिसिद्धीनां हेतवः । ताश्च मय्येव(कृष्ण एव) प्राधान्येन सन्ति । अन्येषूपचारतः सन्तीति भागवततापर्ये श्रीमदाचार्यैः व्याख्यातम् ।

अत्रान्ये व्याख्यातारः 'दशैव गुणहेतवः' इति पाठान्तरं स्वीकृत्य व्याख्यातवन्तः ।

अष्टादशसिद्धीनां मध्ये अष्टौ सिद्धयः मत्प्रधानाः मत्प्राप्त्यैकप्रयोजनाः । अन्यास्तु दशसिद्धयः गुणहेतव एव - विषयानुभवहेतवः एव पुनः संसारहेतव इति व्याख्यातवन्तः वीरराघवाचार्याः ।

अष्टादशसिद्धीनां प्रधानः स्वामी अहमेव । योगिषु मदिच्छयैव ताः लेशमात्रेण वर्तन्ते । साकल्येन पुरुषप्रयत्नसाध्या दशैव इति भागवतव्याख्यायां शुकदेवोऽकथयत् ।

अष्टादशसिद्धिषु मध्ये आद्या अष्टसिद्धयः मय्येव मुख्यतः स्वभावतः सन्ति । मत्स्वरूपशक्त्युत्थत्वात् अमायिक्यः । अन्यत्र साधनवशात् किञ्चिन्न्यूना मायिक्य एव प्रायो भवन्ति । अन्या ऊर्मिराहित्यादयः दशसिद्धयः गुणहेतवः सत्त्वादिगुणहेतुका एवेति भागवतव्याख्यायां विश्वनाथोऽभिप्रैति ।

अत्र सर्वे व्याख्यातारः अणिमाद्यष्टसिद्धिभिः साकं अनूर्मिमत्त्वादिसिद्धिषु दशसिद्धीनां परिगणनं कृत्वा 'अष्टादशसिद्धयः' इति व्याख्यातवन्तः । अवशिष्टाः त्रिकालज्ञत्वदिसिद्धयः पञ्चैव इति परिगणय्य, ताश्च क्षुद्रसिद्धय इति कथित्वा बहिष्कृतवन्तः । अस्य किमपि कारणं न दत्तं तैः । 'अग्न्यादिप्रतिष्टम्भाः' एका सिद्धिरिति आज्ञानान् तैः परिगणितम् । यदि अग्न्यादिप्रतिष्टम्भाः आहत्य एका सिद्धिस्तर्हि अनूर्मिमत्वादिसिद्धयोऽष्टादश न भवन्ति । अग्निस्तम्भार्कस्तम्भादीनां पृथग्गणने एव अनूर्मिमत्वादि सिद्धयोऽष्टादश भवन्ति । अणिमाद्यष्टसिद्धयोऽन्याः, अनूर्मिमत्वाद्यष्टादशसिद्धय एवान्याः इति ज्ञेयम् । अन्ये व्याख्यातारः अणिमाद्यष्टसिद्धिभिः साकमनूर्मिमत्वादिदश सिद्धीः परिगणय्य आहत्याष्टादशसिद्धयः सम्पन्नाः' तर्हि अवशिष्टानां त्रिकालज्ञत्वादिसिद्धीनां का गतिः ? अतः ताः 'क्षुद्रसिद्धयः' इति परिगणय्य बहिष्कृतवन्तः । एवं व्याख्याने किमपि प्रमाणं नैव प्रदर्शितं तैः ।

श्रीमदाचार्यास्तु - त्रिकालज्ञत्व-परचित्ताद्यभिज्ञत्व-अग्निस्तम्भ-सूर्यस्तम्भ-जलस्तम्भ-विषस्तम्भ-शार्दूलादिस्तम्भ अपराजयाख्या अष्टसिद्धयः, अनूर्मिमत्वादिदशसिद्धिभिर्मिलित्वा अष्टादशसिद्धयः सिध्यन्ति' । एता ऋषिगन्धर्वादिषु योगिमानवेषु च योगाभ्यासबलेन लभ्यन्ते । एतासामष्टादशसिद्धीनां मूलभूता अणिमाद्यष्टसिद्धयः देवेषु विना प्रयत्नं जन्मत एव सम्भवन्ति । तस्माद् भागवतेऽष्टसिद्धीनां पृथङ्निरूपणमिति सप्रमाणं (प्राकाश्यग्रन्थाधारेण) निरूपितवन्तः ।

अपि च 'कति वा सिद्धयो ब्रूहि'[१०] इति उद्धवेन प्रश्ने कृते - 'सिद्धयोऽष्टादश प्रोक्ताः' इत्युक्त्वा श्रीकृष्णेन एकैकशः सिद्धीनां निरूपणं कृतम् । तत्र कुत्रापि 'त्रिकालज्ञत्वादिसिद्धयः क्षुद्रसिद्धयः' इति श्रीकृष्णेन न कथितम् । तस्मात् तथा कल्पनं न युक्तमित्यलमधिकेन ।

**END NOTES :**

१. भा.पु. ११.३
२. भागवतम् - ११.१५.३
३. भागवतम् - ११.५.४,५
४. भागवतम् - ११.१५.३
५. भाग.११.१५.४
६. भागवततात्पर्ये - ११.१५.६-८
७. भागवततात्पर्ये - ११.१५.६-८
८. भागवतम्. ११.१५.४
९. भागवतम्. ११.१५.३
१०. भागवतम्.११.१५.२

*****

# शास्त्रमुखम्

**डा. ई. एन्. श्रीनिवासः**
विजयामहाविद्यालयः, बेङ्गळूरु

विदितचरमिदं समेषां विदुषां यत् वाक्यशास्त्रम् इति प्रथितं पूर्वमीमांसाशास्त्रं भाट्टमतं प्राभाकरमतं (गुरुमतं) मिश्रमतं भर्तृमित्रमतश्चेति चतुर्धा विभक्तम् इति । तत्र भर्तृमित्रमतं केवलं नामावशेषम् । मिश्रमतस्य परम् अङ्गत्वनिरुक्तिग्रन्थः अध्ययनाध्यापनपरम्परागतो दृश्यते । जैमिनिमहर्षिप्रणीत-मीमांसासूत्राणां शबरमुनिप्रणीतभाष्यं व्याख्यात्रोः कुमारिलभट्ट-प्रभाकरयोः अभिप्रायभेदो वर्तते इत्यपि विदुषां ज्ञातमेव ।

कुमारिलभट्टः बृहट्टीका, मध्यमटीका, श्लोकवार्तिकं, तन्त्रवार्तिकं, टुपट्टीका चेति पञ्च ग्रन्थान् लिलेख । प्रभाकरस्तु बृहती[१] लघ्वी[२] चेति द्वौ गन्थौ रचयामास । शालिकनाथमिश्रः[३] कश्चित् प्रभाकरमतानुयायी ऋजुविमला[४], दीपशिखा[५], भाष्यपरिशिष्टा[६], प्रकरणपञ्चिका (प्रकरणग्रन्थः)चेति चतुरः ग्रन्थान् व्यरचयत् ।

**प्रकरणपञ्चिका** चतुर्दशैः प्रकरणैः शास्त्रमुख-नीतिपथ-नयवीथि-जातिनिर्णय-अमृतकला - प्रमाणपारायण-विमलाञ्जन-तत्त्वालोक-न्यायशुद्धि-मीमांसाजीवरक्षा-वाक्यर्थमातृका-विषयकरणीय-अङ्गपारायण- अतिदेशपारायणाख्यैः घटिता ।

तत्र **शास्त्रमुखाख्ये** प्रथमे प्रकरणे 'स्वाध्यायोऽध्येतव्यः'[७] इत्येतद्विधिविचारद्वारा मीमांसाशास्त्रम् आरम्भणीयं वा नवेति विचार्यते ।

स्वाध्यायविधिवाक्यार्थविचारे प्रयतामहे ।
प्रभाकरगुरोर्दृष्ट्या मीमांसारम्भसिद्धये ।।[८]

इति प्रतिजानीते शालिकनाथः आदावेव ।

**पूर्वपक्षः** - [९]मीमांसाशास्त्रम् अनारम्भणीयम् । तद्धि वाक्यार्थविचारभूतन्यायनिबन्धनम् । न च वेदवाक्यार्थो विचार्योऽस्ति, यो विचारस्य विषयभूतः । नाप्यसौ विचार्य निर्णीतः प्रयोजनमवकल्पते, अपुरुषार्थत्वात् । पुरुषार्थत्वे हि तस्य चोदनैव प्रमाणं स्यात् । न चाविवक्षितार्था सा प्रमाणं भवितुमर्हति ।

ननु शब्दानाम् औत्पत्तिकत्वात् अर्थपरत्वस्य (नित्यसिद्धम् अर्थपरत्वम्) अविवक्षितार्था न युक्ता। सत्यमेवम् । वेदेनैव अन्यपरत्वमवगमयता अविवक्षितार्थता आपद्यमाना च शक्या वारयितुम् । तथाहि—

'स्वाध्यायोऽध्येतव्यः' इत्यत्र परप्रेरणात्मकविध्यवरुद्धा भावना तव्यप्रत्ययवाच्या प्रतीयते । सा च स्वभावतो भाव्यं, करणम्, इतिकर्तव्यताञ्च अपेक्षते । तत्र च न तावदध्ययनमेव समानपदोपात्तं भाव्यतया सम्बन्धमर्हति अपुरुषार्थत्वात् । तस्मिन् हि भाव्यतया स्वीक्रियमाणे पुरुषप्रवृत्त्यनुपपत्तेः परप्रेरणात्मकविधिव्यापारभङ्गप्रसङ्गात् । नापि एकवाक्यतया समभिव्याह्रियमाणस्य स्वाध्यायस्य भाव्यतया सम्बन्धोऽवकल्पते, विध्यानर्थक्यप्रसङ्गात् । अन्तरेणापि हि विधिं प्रतीयते एवाध्ययनेन स्वाध्यायोऽवाप्यत इति ।

एतेनैवार्थावबोधस्यापि भाव्यतया सम्बन्धो निरस्तो वेदितव्यः । तथाहि- यद्यपि अधीतात् स्वाध्यायात् फलवत्कर्मावबोधो दृश्यत इति तस्यैव भाव्यता अवसीयते, तथाऽपि विनाऽपि विधिना अन्वयव्यतिरेकाभ्याम् अध्ययनस्य अर्थावबोधसाधनत्वावगमाद्विधिरनर्थक एव । न चाध्ययनेनैवार्थमवबुध्य अनुतिष्ठतां क्रतुफलभावनासिद्धिरिति नियमः सम्भवति । अक्रत्वर्थत्वादध्ययनस्य । तस्माद्विश्वजिन्न्यायेन स्वर्गे एव भाव्यतया कल्पयितव्ये प्राप्ते 'फलमात्रेयो निर्देशात्' इत्यार्थवादिकमधुघृतकुल्यादि-तृप्तपित्रादिप्रसादलभ्यसर्वकामफलावाप्तिरेव भाव्यतयाऽवसीयते ।

एवमार्थवदिके फले भाव्यतयाऽवसितेऽध्ययनं समानपदोपात्तं करणाकाङ्क्षापरिपूरकत्वेन सम्बध्यते। एवञ्च 'यदैकस्मादपूर्वं तदेतरत्तदर्थम्' इति न्यायेन स्वाध्यायशब्दवाच्योऽक्षरराशिरप्यध्ययननिर्वृत्त्यर्थ एवावसीयते । एवञ्च अन्यपरत्वादक्षराणां तेभ्योऽर्थप्रतिपत्तिरेवानुपपन्ना, व्युत्पत्तिविरहात् । वृद्धव्यवहारे ह्यनन्यपराण्येवाक्षराण्यर्थावबोधकतया व्युत्पन्नानि । व्युत्पत्त्यपेक्षश्च शब्दोऽर्थावबोधकः ।

आर्थी भावना -भाव्यम् - आर्थवादिकं फलम्
करणम् - अध्ययनम्
स्वाध्यायः = अक्षरराशिः (अन्यपरः)

यः पुनरन्यपरेभ्योऽप्यक्षरेभ्योऽर्थावगमः स सामान्यतोदृष्टनिबन्धनानन्यपरत्वभ्रान्त्या भ्रान्तिरेवेति मन्तव्यम् । अप्रतीयमानश्चार्थो न विचारस्य विषयः, नापि प्रयोजनमिति विचारस्तावन्नारब्धव्यः, तदनारम्भे च तदुपायभूतन्यायपरिज्ञानमप्यनुपयोगि । तदनुपयोगे च तन्निबन्धनं मीमांसाशास्त्रम् अनारम्भणीयम् ।

**सिद्धान्तः -**

'स्वाध्यायोऽध्येतव्यः' इति स्वाध्यायस्य कर्मत्वावगमात् स एव भाव्यतयाऽवसीयते ।

आर्थीभावना - भाव्यम् - स्वाध्यायः

करणम् - अध्ययनम् ।

न च स्वाध्यायस्य सक्तुवच्छेषित्वमनुपपन्नम्, फलवदर्थावबोधोपयोगित्वात् । यद्यपि चार्थावबोधोपयोगित्वम् अध्ययनात् प्राङ् नावगम्यते, तथापि पश्चाद्भाव्यपि भवत्येव प्रयोजनम् । भाविनापि चोपयोगेन शेषित्वं नानुपपन्नम्, अग्निवत्, उत्पन्नानां ह्यग्नीनां विनियोगावगमः नावगतनियोगानामुत्पत्तिः । आहवनीयादिशब्दानाम् अलौकिकार्थतया प्राग्व्युत्पत्त्यवगमादर्थानवगते होमादिषु विनियोगासम्भवात् । तथा चोक्तम् - 'भूतभाव्युपयोगं हि द्रव्यं संस्कारमर्हति ।'[१०]

ननु चार्थावबोधोपयोगितया संस्कारविधिरनर्थक एव इत्युक्तम् इति नानर्थकः नियमार्थतयाऽर्थवत्त्वात् । ननु च नियमो न सम्भवति, अक्रतुसंस्पर्शित्वादित्युक्तम् । तत्र सम्भवति स्वाभाविकार्थपरत्वानुसारेण क्रत्वनुप्रवेशे क्रतुसंस्पर्शिताया एवोचितत्वात् । यदि खल्वध्ययनविधेः क्रत्वनुप्रवेशिता नाश्रीयते, तदा शब्दानां वृद्धव्यवहारव्युत्पन्नानां स्वाभाविकार्थपरता हीयेत । जहत्स्वार्थत्वं च न न्याय्यमिति क्रतुफलभावनानुप्रवेशेनैव अध्यायसंस्कारो युक्तः । तत्र कर्मविधिष्वेवं नियमवर्णना अध्ययनाविर्भावितैरेव कर्मविधिभिरर्थमवबुध्य अनुतिष्ठां क्रतुफलभावनासिद्धिरिति । अर्थवादेषु त्वध्ययनाविर्भावितार्थवादप्ररोचिताः क्रियमाणाः क्रतवः फलभावनाय अलमिति । मन्त्रेषु पुनरध्ययनपरिगृहीतैरेव मन्त्रैः क्रतुषु पदार्थस्मरणं फलभावनाङ्गमिति ।

एवञ्च अनन्यपरत्वादक्षराणां फलवत्कर्मावबोधोत्पत्तेर्विचारस्य विषयप्रयोजनलाभाच्छास्त्रस्य आरम्भणीयत्वम्, विषयप्रयोजनलाभे च विचारस्याध्ययनानन्तरमुपनिपतितत्वाद् गुरुकुलस्थितेरर्थवत्वात् तन्निवृत्तिमध्ययनानन्तरप्राप्तां स्मरद् 'वेदमधीत्य स्नायात्' इति स्मृतिवचनं अपन्यायमूलं दर्शयन् अर्थावबोधपरतया स्वाध्यायस्य विवक्षितार्थतां मन्यमानः सूत्रकारो विचारस्य विषयं प्रयोजनं चाह 'अथातो धर्मजिज्ञासा[११] इति । एतच्च व्याख्यातं कुमारिलभट्टेन -

अथातो धर्मजिज्ञासासूत्रमाद्यमिदं कृतम् ।
धर्माख्यं विषयं वक्तुं मीमांसायाः प्रयोजनम् ।।[१२]

**परामृष्टाः ग्रन्थाः**


१. प्रकारणपञ्चिका रचयिता - शालिकनाथमिश्रः (न्यायसिद्धिव्याख्यानोपेता)
प्रकाशनसंस्था - काशीहिन्दुविश्वविद्यालयः, १९६१

२. मीमांसा-उद्धरण-कोशः सम्पादकः - धन्नालाल जवाहरलाल अग्रवाल
प्रकाशनसंस्था - वैदिकसंशोधनमण्डलम्, पुणे, १९८५

३. मीमांसापरिभाषा रचयिता - कृष्णयज्वा सम्पादकः - गङ्गाधरमिश्रः
प्रकाशनसंस्था - चौखम्बा ओरियण्टालिया, वाराणसि, १९८०

४. मीमांसान्यायप्रकाशः रचयिता - आपदेवः
सम्पादकः - महामहोपाध्यायवासुदेवशास्त्री अभ्यङ्करः
प्रकाशनसंस्था- भण्डार्कर् ओरियण्टल् रिसर्च-इन्स्टिट्यूट्, पुणे,१९७२

५. मीमांसादर्शनम् (शाबरभाष्योपेतम्) रचयिता - जैमिनिः
सम्पादकः - डा. उमाशङ्करशर्मा
प्रकाशनसंस्था - चौखाम्बा सुरभारती प्रकाशन, वाराणसी, १९८९

६. भाट्टदीपिका (प्रभावलीव्याख्योपेता) रचयिता - खण्डदेवः
सम्पादकः - एस् सुब्रह्मण्यशास्त्री
प्रकाशनसंस्था - श्रीसद्गुरुप्रकाशन, देहली, १९८७

७. अर्थसङ्ग्रहः (मीमांसार्थसङ्ग्रहकौमुदीव्याख्योपेता) रचयिता - लौगाक्षिभास्करः
सम्पादकः - डा. कामेश्वरनाथमिश्रः
प्रकाशनसंस्था - चौखाम्बा सुरभारतीप्रकाशन, वाराणसी, १९८३


**End Notes :**

१. निबन्धनटीका २. विवरणटीका ३. अष्टमशतकम्

४. बृहत्याः व्याख्यानम् ५. लघ्वीव्याख्यानम्

६. शाबरभाष्यस्य प्रथमपादस्य व्याख्यानम्

७. तै.आ.२.१५ ८. प्रकरणपञ्चिका - प्रथमप्रकरणम्

९. प्रकारणपञ्चिका - बनारस्विश्वविद्यायः, १९६१

१०. तन्त्रवा -२.१.४ ११. पू.मी.१.१.१

१२. श्लोकवार्तिकम् - १.१.११

*****

# भाषाध्ययने आकांक्षायाः स्थानम्

-सङ्गीता रमेशः
विद्यावारिधिशोधच्छात्रा, कर्नाटकसंस्कृतविश्वविद्यालयः

## भाषाविश्लेषणम् - आकङ्क्षाक्रमः

सकलव्यवहारेषु भाषा अत्यावश्यकी । विवक्षितार्थप्रतिपादनार्थं मनोभावनाभिव्यक्त्यर्थं व्यवहारार्थं च भाषायाः महत्तरस्थानं विद्यते । भाषायाः अध्ययनं विश्लेषणं च भारतदेशे आ बहोः कालात् प्रवृत्तम् । भारते विकसितानि व्याकरण-न्याय-मीमांसादर्शनानि भाषाविश्लेषणे बहु अवधानमदुः । भाषायाः अध्ययने आकांक्षायाः, योग्यतायाः, सन्निधेः तात्पर्यस्य च मुख्यं पात्रं वर्तते इति ते अवागच्छन् । तत्र ते यान् मौलिकानंशान् साक्षादकुर्वन् तान् ते बीजरूपेण प्राथमिके गुरुकुलाध्ययने न्यवेशयन् । अद्यापि, प्राचीनगुरुकुलाध्ययने अनुस्रियमाणाः काश्चन पद्धतयः आधुनिकविद्याभ्यासे नानुस्रियन्ते । तत्र आकाङ्क्षाक्रमः अन्यतमः ।

न केवलं संस्कृतभाषायां आकांक्षादीनामुपयोगः, किन्तु सकलभाषासु । बालकानां शब्दैः शाब्दबोधार्थं, पाठशालासु गुरोः शब्दैः शिष्यानां शब्दबोधार्थं, आपणेषु ग्राहकाणां शब्दैः शाब्दबोधार्थं, वृद्धव्यवहारेण बालकानां शाब्दबोधार्थं, कार्यालयेषु, मार्गेषु, एवं सर्वत्र शब्दैः शाब्दबोधार्थम् आकांक्षादिज्ञानमावश्यकम् ।

का इयमाकांक्षा ? कतिविधा च सा ? आकाङ्क्षाक्रमेण भाषाध्ययनं नाम किम् ? कस्तेन लाभः ? इति प्रश्नानामुत्तराणि मनसि निधाय लिखिता इयं शोधपत्रिका । अतः इयं शोधपत्रिका संस्कृतभाषासीमिता नैव ।

## आकाङ्क्षास्वरूपम्

अन्ते नानादर्शनेषु आकाङ्क्षास्वरूपं कथं न्यरूपीति सङ्ग्रहो दत्तः । तेषां विवराणानामभिप्रायः एवं सङ्ग्रहीतुं शक्यते ।

जगति अर्थाः सन्ति । अर्थान् जनाः नानाप्रमाणैः जानन्ति । तत्र शब्दप्रमाणमन्यतमम् । जनाः स्वावगतान् अर्थान् अन्यान् बोधयितुम्, अन्यैरवगतान् स्वयं ज्ञातुं च शब्दप्रमाणमाश्रयन्ते । यदा वक्ता वक्तुमारभते तदा सः क्रमेण पदानि प्रयुङ्क्ते । प्रतिपदं श्रवणे पदार्थस्य बोधस्तु जायते एव, तदनु सपदि तस्य पदार्थस्य सम्बन्धिनः अन्यपदार्थस्य जिज्ञासा भवति । सेयं जिज्ञासा आकाङ्क्षा इत्यपि व्यवह्रियते। उदाहरणाय, पठति इति पदं श्रुतं चेत् 'कः/का पठति?', 'किं पठति?', 'कुत्र

पठति?' इत्याद्याकाङ्क्षाः श्रोतुः मनसि जायन्ते । तदनु वक्ता 'बालकः/बालिका' 'कथाम्' 'गृहे' इत्यादिपदानां प्रयोगं करोति चेत् श्रोतुः ताः आकाङ्क्षाः शान्ताः भवन्ति ।

त इमाः वाक्यस्तरेऽनुभूयमानाः पदार्थमध्ये सम्भवन्त्यः आकाङ्क्षाः ।

एवं केवलं प्रातिपदिक-धात्वादीनां प्रकृतीनां श्रवणे जायमानाः जिज्ञासाः प्रत्ययप्रयोगे सति प्रत्ययार्थज्ञानेन शान्ता भवन्ति ।

तत्र पदप्राधान्येन नैयायिकाः एवम् वदन्ति 'यत्पदेन विना यस्य अननुभावकता भवेत्। सा आकाङ्क्षा '। तस्यायमाशयः - पदं पदान्तरेण सहैव शाब्दबोधं जनयति । एकस्यैव पदस्य उच्चारणे पदार्थस्य स्मरणं स्यात्, न तु, पदार्थसम्बन्धज्ञानरूपः शाब्दबोधः । तथा च यस्य पदस्य यत्पदेन विना शाब्दबोधजनकत्वं न सम्भवति, तत्पदस्य तत्पदेन सह ज्ञानमाकाङ्क्षा । पदस्तरे सा प्रकृतिप्रत्यययोः अव्यवहितपूर्वोत्तरत्वरूपा । वाक्यस्तरे पदानाम् अव्यवहितत्वमनन्तर्भाव्य केवलं पूर्वोत्तरत्वरूपा । यतो हि पदस्तरे घटम् (घट+अम्) इति बोधं जनयति; न तु अम्+घट इति । वाक्यस्तरे तु, बालः पठति, पठति बाल इत्युभयमपि बोधकम् ।

आकाङ्क्षायाः सम्बन्धः जन-पदार्थ-पदैः त्रिभिरपि वर्तते । यतः इयमाकाङ्क्षा समवायेन जनेषु वर्तते; अस्या विषयाः अर्थाः; अर्थानां बोधकानि पदानि; पदैः अर्थबोधने आकाङ्क्षा शान्ता भवति । अतः जनः जिज्ञासावान्; अर्थः जिज्ञासितः; पदं जिज्ञासितम् - इति त्रिधाऽपि व्यवहारः सम्भवति ।

सर्वमेतन्मनसि न निधाय विचार्यते चेत् तत्तद्दर्शनकाराः अन्यान्यस्य प्रामुख्यं ख्यापयन्तः भिन्नतया वदन्त इव भासन्ते । यथा 'प्रतिपत्तुः जिज्ञासा' 'अभिधानापर्यवसानात् अभिधेयापर्यवसानाद्वा पदार्थान्तरे पुरुषस्य वा जिज्ञासा' 'पदार्थानां परस्परजिज्ञासाविषयत्वयोग्यत्वम्' 'आनुपूर्वीविशेषः' 'यत्पदविरहप्रयुक्तः यत्पदस्यान्वयानुभावकत्वाभावः अव्यवहितपूर्वत्व-अव्यवहितोत्तरत्वान्यतर-सम्बन्धेन तत्पदविशिष्टत्वं तत्पदस्य आकांक्षा' इत्यादि । किन्तु सर्वेषामेषां पक्षाणां हार्दं त्वेकमेव ।

**आकाङ्क्षाक्रमेण पाठः - प्रयोजनानि**

प्रस्तावनायां गुरुकुलपद्धतौ आकाङ्क्षाक्रमेण पाठस्य उल्लेखः कृतः । तस्य सङ्क्षेपेण विवरणं सरल-सङ्कीर्णयोः उदाहरणयोः साहाय्येन दीयते ।

**उदाहरणम् १ -** रामः लङ्कायां बाणैः दुष्टं रावणं लीलया जघान ।

अस्य आकाङ्क्षाक्रमः एवं वर्तते - प्रथमतः प्रधानक्रियापदं स्वीकरणीयम् । तच्चात्र जघानेति । तदनु क्रमेण एवं प्रश्नाः उत्तराणि च देयानि -

कः जघान? - रामः जघान ।

रामः कं जघान? - रामः रावणं जघान ।

रामः कुत्र रावणं जघान? - रामः लङ्कायां रावणं जघान ।

रामः लङ्कायां कैः रावणं जघान? - रामः लङ्कायां बाणैः रावणं जघान ।

रामः लङ्कायां बाणैः रावणं कथं जघान? - रामः लङ्कायां बाणैः रावणं लीलया जघान ।

रामः लङ्कायां बाणैः कीदृशं रावणं लीलया जघान? - रामः लङ्कायां बाणैः दुष्टं रावणं लीलया जघान।

अत्र प्रतिप्रश्नं पूर्वं ज्ञातानि सर्वाणि पदानि प्रयोक्तव्यानि इत्यपि नियमः वर्तते । एतेन वाक्ये यावन्ति पदानि भवन्ति तावद्वारं प्रधानक्रियापदेन सह वाक्यस्यावृत्तिः भवति । तेन बालानां मनसि वाक्यं दृढं भवति । इदानीं सङ्कीर्णमुदाहरणं पश्यामः -

**उदाहरणम् २** - सीताम् अन्वेष्टुं महेन्द्रपर्वतात् उद्गतः हनूमान् आकाशमार्गे बहुभिः विघ्नैः परीक्षितः ।

प्रधानक्रियापदं - परीक्षितः ।

कः परीक्षितः? - हनूमान् परीक्षितः ।

हनूमान् कैः परीक्षितः? - हनूमान् विघ्नैः परीक्षितः ।

हनूमान् कुत्र विघ्नैः परीक्षितः? - हनूमान् आकाशमार्गे विघ्नैः परीक्षितः ।

हनूमान् आकाशमार्गे कतिभिः विघ्नैः परीक्षितः? - हनूमान् आकाशमार्गे बहुभिः विघ्नैः परीक्षितः ।

कीदृशः हनूमान् आकाशमार्गे बहुभिः विघ्नैः परीक्षितः? - उद्गतः हनूमान् ...... परीक्षितः ।

कस्मात् उद्गतः हनूमान् ...... परीक्षितः? - महेन्द्रपर्वतात् उद्गतः हनूमान् ...... परीक्षितः ।

किमर्थं/किं कर्तुं महेन्द्रपर्वतात् उद्गतः हनूमान् ...... परीक्षितः? - अन्वेष्टुं महेन्द्रपर्वतात् उद्गतः हनूमान् ...... परीक्षितः ।

काम् अन्वेष्टुं महेन्द्रपर्वतात् उद्गतः हनूमान् ...... परीक्षितः? - सीताम् अन्वेष्टुं महेन्द्रपर्वतात् उद्गतः हनूमान् ...... परीक्षितः ।

एवं यदि श्लोकादीनाम् उपपञ्चाशत् वाक्यानि अधीयन्ते तर्हि भाषा आत्मसात् भवति । अग्रे अशुद्धिरपि न्यूना भवति । वाक्यादर्थावगमनमपि सुशकं भवति ।

आंग्लभाषायाः उदाहरणमेकं निरूप्यते ।

A good student studied all the chapters the whole night to write the exam well.

Main verb- Studied

Who studied? A student studied.

A student studied what? A student studied chapters.

What kind of student studied chapters? A good student studied chapters.

How many chapters did a good student studied ? A good student studied all the chapters.

When did the good student studied all the chapters? A good student studied all the chapters the whole night.

Why did the good student study all the chapters the whole night? A good student studied all the chapters the whole night to write the exam.

A good student studied all……. To write the exam in what way(how)? A good student ……… to write the exam well.

एवं नानाभाषाणां वाक्येषु एतत्सर्वं दर्शयितुं शक्यम् । विस्तरभयात् नात्र दर्शितम् ।

## प्रतिक्रिया

अस्माभिः अनेन क्रमेण कन्नड-आङ्ग्ल-हिन्दीभाषाणां वाक्यानि स्वीकृत्य आधुनिकाः कतिचन महिलाः पाठिताः । तासां प्रतिक्रियाः संस्कृतेन अनूद्य अत्र दर्शिताः -

'नमस्ते! एषु दिनेषु व्याकरणबद्धवाक्यरचनविषये अवधानं न्यूनमिव जातम् । व्यवहारे लेखने च विभक्तीनाम् अशुद्धः प्रयोगः बहु दृश्यते । प्रश्नकरणाभ्यासोऽपि ह्रासं गतः । मया आकाङ्क्षाक्रमस्य यदा परिचयः प्राप्तः तदा सर्वासामेतासां समस्यानां परिहारः अत्र अस्तीति भातम् ।'

- **श्रीमती पद्मश्री मूर्ति,** आप्तसमालोचिका (Councellor)

'आकाङ्क्षाक्रमेण सुलभतया वाक्यघटकानां क्रियापद-विशेषण-विशेष्यादीनाम् अवगमः भवति । भाषाध्ययनं रोचकं भवति ।'

- **श्रीमती कमलाक्षी कुलकर्णी,** गृहिणी

'Dear Sir,

It has almost been 3 weeks since we have started to learn Sulabha Khatina Samskrutha from you. As a student and also as an educator I strongly recommend and appreciate the logic behind AAkANSHA PADDATI . It caters to the logical thinking in a language learning student rather than the rote way of learning.

By decoding such logics it becomes easier to learn any language. I am really enjoying the classes and would like to take it further.

Humbled by your support and Guidance in this regard.

Thanking you'

**Sandhya Bheemanna**
Founder Principal
The Happy Valley School.

### उपसंहारः

आकाङ्क्षायाम् उत्थिता उत्थाप्या इति अन्योऽपि प्रभेदः वर्तते । एवं दण्डान्वयः खण्डान्वयः इति पदयोजने भेदः वर्तते । तेषां विषये अत्र चर्चा न कृता । अद्यापि प्रस्तुताः उपयुक्ताः प्राचीनभारतसम्बन्धिनः अंशाः, विशेषतः भाषासम्बन्धिनः सन्ति, तत्र अयं क्रमः एकः इति दर्शयितुमयं प्रयत्नः विहितः । तथा अन्ते आकाङ्क्षासम्बन्धे नानादर्शनविचाराः अत्र सङ्गृहीताः ।

### दर्शनेषु आकाङ्क्षालक्षणानि

भिन्नभिन्नदर्शनरीत्या आकांक्षायाः स्वरूपनिरूपणे भिन्नता भवति । तच्च रामानुजताताचार्याणां शाब्दबोधमीमांसा इति ग्रन्थे वर्तते ।

### परिशीलितग्रन्थाः

१) सरल-कठिनसंस्कृतम्, प्रो. डा. तिरुमल पि. कुलकर्णी, २०१५, ऐतरेयशोधसंस्था, श्रीभण्डारकेरिमठः

२) Hindu Methodology of Education , गणेश हुपारिकर, (न ज्ञायते)

३) अम्बा कुलकर्णीमहोदयायाः अधोनिर्दिष्टशोधपत्रिकाः

१) Shaabdabodha theories and principles of information coding at IISc, Bangalore, in feb2017

२) Mathematical modeling of Aakaankshaa and Sannidhi for parsing Sanskrit, 2012, Delhi

४) शाब्दबोधमीमांसा, एन्. एस्. रामानुज ताताचार्यः, राष्ट्रीयसंस्कृतसंस्थानम्

५) तर्कताण्डवम्, श्रीव्यासतीर्थविरचितम्, प्रथमसम्पुटम्, द्वैतवेदान्तसंशोधनप्रतिष्ठानम्, २००३

६) तत्त्वचिन्तामणिः, श्रीमद्गंगेशोपाध्यायरचितम्,शब्दखण्डे प्रथमपरिच्छेदः, मथुरानाथविरचित 'रहस्य' नामकटीकासहितम्, चौखम्बासंस्कृतप्रतिष्ठानम्

७) कारिकावली, विश्वनाथपंचाननः, विश्वनाथपंचाननकृता कारिकावली न्यायमुक्तावलीसंवलिता, दिनकरी-रामरुद्रीव्याख्याभ्यां च सनाथीकृता, सम्पादकः- आत्माराम जेरे, चौखम्बा कृष्णदास अकादमी, वाराणसी

८) प्रमाणपद्धतिः, श्रीजयतीर्थविरचिता(टिप्पण्यष्टकसमेता), सम्पादकः- कृ.त.पाण्डुरंगि, Dvaita Vedanta Studies And Research Foundation.

**प्रो. डा. तिरुमल पि. कुलकर्णी**
प्रोफेसर्, पूर्णप्रज्ञविद्यापीठम्
मार्गदर्शकः

**संगीता रमेशः**
विद्यावारिधिशोधच्छात्रा,
कर्नाटकसंस्कृतविश्वविद्यालयः

*****

# ब्रह्मणः सगुणत्वसमर्थनम्

– डा. माधवाचार्यपाण्डुरङ्गी
सहायकसंशोधकः,
पूर्णप्रज्ञसंशोधनमन्दिरम्, बेङ्गलूरु

ब्रह्मणः सगुणत्वं निर्गुणत्वं वा सगुणत्वेऽपि त्रिगुणत्वम्, अष्टगुणत्वमनन्तगुणत्वं वा इत्ययं विषयः भारतीयेषु दर्शनेषु बहुधा चर्चितः । द्वैतवादः निर्गुणत्वं निराकृत्य सगुणत्वम्, अनन्तगुणपूर्णत्वं च ब्रह्मणः साधयति । अद्वैतवादस्तु ब्रह्मणः निर्गुणत्वं साधयति, तत्र च कारणं स्पष्टम्, अद्वैतवादे खलु जीवब्रह्मणोरभेदः परमसिद्धान्तः । यदि ब्रह्मणि गुणाः सत्याः स्युः तर्हि तादृग्ब्रह्मणा अतादृग्रूपवतः जीवस्य अभेदः न युज्यते । तस्मात् ब्रह्मणः निर्गुणत्वम् अद्वैतवादे समर्थनीयं भवति । अत एव सहस्राणि गुणप्रतिपादकवाक्यानि त्रिचतुरनिर्गुणत्वप्रतिपादक-वाक्यविरोधेन अतत्वावेदकानीति कल्प्यन्ते ।

अत्र यदि ब्रह्मणः निर्गुणत्वम्, किमर्थं तत्र गुणाः प्रतिपाद्यन्ते इति चेत् अद्वैतवाद एवं प्रतिवदति- सगुणवाक्यानि त्रिषु प्रकरणेषु पठ्यन्ते -

१. [१]उपासनाप्रकरणे,

२. निर्गुणप्रकरणे,

३. तटस्थप्रकरणे चेति

तत्र उपासनाप्रकरणे पठितानां वाक्यानाम् उपासनामात्रपरत्वं गुणविधाने तेषां तात्पर्यं नास्ति । निर्गुणप्रकरणे च यानि सगुणवाक्यानि तानि निषेधार्थं गुणान् अनुवदन्ति, न तु तेषां गुणेऽपि तात्पर्यम्, अपि च [२]'यः सर्वज्ञः सः सर्ववित्' इत्यादिषु तटस्थप्रकरणस्थवाक्येषु उपासनाविधायकं पदमनुवर्तते । अतः तान्यपि उपासनापराणि । इत्थं च कुत्रापि सगुणवाक्येषु गुणपरत्वं नास्तीति ब्रह्मणः निर्गुणत्वं हि तेषां सिद्धान्तः ।

परन्तु तदेतदविचाररमणीयम् । उपनिषत् किल परविद्यात्वेन प्रसिद्धा । परत्वं चोत्तमत्वं, उत्तमत्वं च फलापेक्षयैव वक्तव्यम् । फलं च चतुर्षु पुरुषार्थेषु मोक्ष एव अनुत्तमम् इत्यत्र न कस्यापि विप्रतिपत्तिः । स च मोक्षः भगवत्प्रसादैकलभ्यः [३]'यस्य प्रसादात् परमार्तिरूपात् अस्मात् संसारात् मुच्यते नापरेण' इति श्रुतेः । प्रसादश्च गुणोत्कर्षज्ञानसाध्यः [४]'न तादृशी प्रीतिरीड्यस्य विष्णोः, गुणोत्कर्षज्ञातरि यादृशी स्यात्' इति श्रुतेः । तच्च गुणोत्कर्षज्ञानं उपनिषद्भिर्जायते ।

तथा चोपनिषदां विष्णोर्गुणोत्कर्षोक्तावेव सिध्यति मोक्षप्रयोजनकत्वम् । तस्मिंश्च सति परविद्यात्वम् उपपद्यते । तस्मात् गुणवचने एव उपनिषदां महातात्पर्यं न तु निर्गुणब्रह्मप्रतिपादकत्वे ।

किञ्च ब्रह्म यदि निर्गुणं स्यात् तर्हि प्रमाणगम्यमेव न स्यात् । प्रत्यक्षानुमानशब्दाः प्रमाणानि तत्र चाक्षुषप्रत्यक्षं प्रत्युद्भूतरूपं कारणम् । ब्रह्मणि च रूपाभावात् न प्रत्यक्षम् तत्र प्रमाणम् । अनुमानमपि न तत्र प्रमाणम् । अनुमाने हेतुसाध्ययोः सम्बन्धः व्याप्तिः । न च असङ्गे ब्रह्मणि हेतुसम्बन्धः वक्तुं शक्यः अतः नानुमानं तत्र प्रवर्तते । नापि शब्दः । शब्दस्य हि शक्तिः, लक्षणा, गौणी चेति वृत्तित्रयम् । तत्र शक्त्या बोधने प्रवृत्तिनिमित्तमपेक्षितम् । न च (निर्धर्मके) ब्रह्मणि प्रवृत्तिनिमित्तमस्ति । शक्यसम्बन्धस्य अभावाच्च न लक्षणा । 'सिंहो देवदत्तः' इत्यत्र सादृश्यनिमित्तेन सिंहशब्दप्रयोगः गौण्याः उदाहरणम् । सादृश्यं च तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्वम् । न च निर्धर्मके ब्रह्मणि धर्माः सम्भवन्ति । तस्मात् न गौणी वृत्तिः । इत्थश्च निर्गुणे शब्दोऽपि न प्रवर्तते । अतः निर्गुणस्य प्रमाणागम्यत्वात् निर्गुणं ब्रह्मैव न सिध्येत् । एतदुपरि पुनः अद्वैतिनः आक्षिपन्ति—

**[५]"अगृहीत्वैव सम्बन्धम् अभिधानाभिधेययोः ।**
**हित्वा निद्रां प्रबुध्यन्ते प्रसुप्ते बोधिताः परैः ।**
**जाग्रद्वन्नहि सम्बन्धं प्रसुप्तौ वेति कश्चन ।।'**

इति वार्तिककाराणां वचनम् । वार्तिकस्यास्य अयमभिप्रायः - यथा सुषुप्तस्य नामग्रहणेन प्रबोधने शब्दात् निर्विकल्पकबोधः जायते । तद्वत् तत्त्वमस्यादिवाक्यैरेव ब्रह्मणः लक्षणया निर्विकल्पकबोधः जायते या चरमवृत्तिः इति तेन अङ्गीक्रियते । लाक्षणिकं हि पदं न शक्यसम्बन्दमात्रेण प्रत्यायकम् । गङ्गायां घोषः इत्युक्ते प्रवाहस्य सम्बन्धः यथा तीरे अस्ति । तथा मीनादावपि अस्ति । न चैतावता ग्रङ्गाशब्दात् मीनादीनां बोधः भवति । किन्तु वक्तुः तात्पर्यानुसारेण तीरस्यैव । एवं [६]'ब्रह्मविदाप्नोति परम्' इत्युक्ते किं तत् ब्रह्म ? इति शङ्का जायते । तत्परिहारश्च ब्रह्मस्वरूपनिरूपणेनैव भवति । स्वरूपप्रश्ने [७]'सत्यं ज्ञानमनन्तम्' इति गुणोक्तिः असङ्गता । अतः तात्पर्यानुसारेण ब्रह्मस्वरूपमेव तत्पदात् बुध्यते परन्तु अभिप्रेतोऽयं बोधः नैकजन्मसंसिद्धवासनावासितान्तःकरणानां बालानां न जायते । किन्तु अन्तःकरणशुद्धिमतामेव, तदिदं शब्दपरोक्षम् इत्युच्यते । एवं लक्षणावृत्या शब्दाद् ब्रह्मणः बोधः सम्भवत्येव, तत्कथमुक्तं ब्रह्मणः निगुर्णस्य प्रमाणानवगम्यत्वम् ।

अत्रोच्यते - यदुक्तं निर्गुणे शब्दः प्रमाणमिति तत् कस्य ? नास्माकं यतस्त्वयैवोक्तरीत्या अन्तःकरणानां तज्ज्ञानम् । ततश्च अशुद्धनाम् अस्माकं केन प्रमाणेन तद्वेद्यम् । तदनिश्चये कथं निर्गुणब्रह्मप्राप्त्यर्थं प्रवृत्तिः एवं च ब्रह्मणि किं प्रमाणम् ? इति शिष्येण पृष्टे गुरोः मौनं व्याख्यानं स्यात् ।

यत्तूक्तं सुप्तस्य वाक्यश्रवणात् निर्विकल्पकबोधः जायते इति तन्मन्दम्, शब्दस्य द्रव्यतया तदभिघातेनैव सुप्तस्य प्रबोधः । अत एव 'ध्वन्यात्मकेन भेरीशब्देनाऽपि सुप्तप्रबोधः दृश्यते, तस्मात् शब्दात् निर्विकल्पकबोधः जायते' इति अलौकिकं कल्पनम् । अतः न निर्गुणे किञ्चित् प्रमाणमस्ति।

यत्तूक्तं सगुणवाक्यमुपासनार्थम् इति तन्न युक्तम् । उपासनार्थत्वेऽपि तद्वाक्येन गुणसिद्धेः । [८]'**आत्मेत्येवोपासीत**' इति विधिवाक्यस्य उपासनायाः कार्यत्वे यथा महातात्पर्यं तथा ब्रह्मणः आत्मत्वेऽवान्तरतात्पर्यम्, यथा हि [९]'**खादिरे यूपे पशुं बध्नाति**' इति वाक्यं पशुबन्धनं बोधयति तद्वद् यूपस्य खादिरत्वमपि बोधयति । यदि तद्वाक्यस्य पशुबन्धनमात्रे तात्पर्यं तर्हि यूपस्य खादिरत्वं न सिध्येत् । तस्मात् तद्वाक्यस्य खादिरत्वेऽपि अवान्तरतात्पर्यं वक्तव्यम् । तदुक्तं स्मृतौ—

[१०]**उपासनायाः कार्यत्वे विष्णोरात्मत्व एव च । उभयत्राऽपि तात्पर्यम् आत्मोपासादिके विधौ ।।** न चैवं वाक्यभेदः दोषः । [११]'सम्भवत्येकवाक्यत्वे वाक्यभेदो हि दूषणम्' । अत्र च एकवाक्यत्वं असम्भवि, अतः वाक्यभेदः न दोषाय । तस्मात् सगुणवाक्यस्य उपासनापरत्वं न युक्तम् ।

किञ्च [१२]'साक्षी चेता केवलो निर्गुणश्च' इति या श्रुतिः निर्गुणत्वं विधत्ते सैव श्रुतिः साक्षित्वं चेतृत्वं च विधत्ते, एवं च यदि श्रुतिविहितं निर्गुणत्वम् अङ्गीक्रियते तर्हि तयैव श्रुत्या विहितं साक्षित्वं चेतृत्वं च कुतः नाङ्गीक्रियते । अत्रोक्तं अद्वैतसिद्धौ - 'साक्षी चेता इति पदैः लक्षिते ब्रह्मणि निर्गुणत्वं विधीयते । तेन न साक्षित्वादिगुणसिद्धिः परब्रह्मणि' इति ।

तदिदं निराकृतं, द्वैतद्युमणौ - यदि साक्ष्यादिपदानां लक्षणया ब्रह्मस्वरूपपरत्वं तर्हि तुल्यन्यायेन निर्गुणशब्दस्यापि गुणसंसर्गाभावपरत्वं त्याज्यं स्यात् । तथा च निर्गुणत्वसिद्धिरपि न स्यात् ।

किञ्च निर्गुणत्ववादिनाऽपि सत्यत्व-ज्ञान-आनन्दादिगुणाः ब्रह्माणि स्वीकृताः तर्हि गुणान्तरस्वीकारे कोऽयं प्रद्वेषः ।

तदुपरि अद्वैतसिद्धौ ननु आनन्दादिवाक्यसत्यकामादिवाक्ययोर्मानानन्तराविरोधे तदप्राप्तौ उपासनाविध्यश्रवणे निर्गुणश्रुतिविरोधे च तुल्येऽपि आनन्दादयस्तात्विका इति कथं व्यवस्थेति चेन्न आनन्दादीनां ब्रह्मरूपत्वेन निर्गुणश्रुतिविरोधाभावस्य व्यवस्थापकत्वात् । अथ यदि [१३]'ज्ञानात्मको भगवान् बलात्मको भगवान्' समस्तकल्याणगुणात्मकः' इति श्रुत्या सर्वेषां गुणानां ब्रह्माभेदः अभिधीयते । 'कामम् अभिधीयताम्' नास्माकं प्रद्वेषः परन्तु अभेदे गुणगुणिभावः पारिभाषिकः स्यात् ।

तस्य आक्षेपस्य समाधानं तरङ्गिण्यां निरूपितम् अस्ति । यदि ज्ञानानन्दात्मकत्वं भगवतोऽङ्गीक्रियते तर्हि ब्रह्माभिन्नयोः तयोरपि परस्परम् अभेदः स्यात् । ततश्च एकतरमात्रावशेषप्रसङ्गः । यद्येवं स्यात् तर्हि ब्रह्मभावमुक्तौ आनन्दसत्वे ज्ञानाभावः, ज्ञानसत्वे आनन्दाभावः स्यात् । तस्मात् निर्गुणत्ववादिना अत्र कश्चन परिहारः वक्तव्य एव । तेनैव सकलगुणात्मकत्वेऽपि गुणगुणिभावोपपादनस्य अन्यतरमात्रावशेषप्रसङ्गवारणस्य च शक्यत्वात् न परोक्तपारिभाषिकत्वप्रसङ्गः । तस्मात् श्रुत्युक्ताः सर्वे गुणाः भगवति स्वीकार्याः निर्गुणपदस्य च गुणसन्निधिपठितस्य प्राकृतगुणराहित्यम् अर्थः इत्येव स्वरसः पन्थाः । तथा च भगवान् सकलगुणपरिपूर्णः अनन्तगुणपरिपूर्णः इति अङ्गीकार्यः, भगवतः गुणेषु अवतारेषु च अत्यन्ताभेदाङ्गीकारात् । तत्र च श्रुतिः [१४]'नेह नानास्ति किञ्चन' इति । इह = ब्रह्मणि, किञ्चन = अवतार - अवयव - धर्मादिकं, नाना = भिन्नं (नानाभूतं) नास्ति 'नाना नास्ति' इत्युक्ते अवयवादीनां भेद एव निषिध्यते 'सविशेषणे हि' इति न्यायात् । अन्यथा धर्माणां स्वरूपत एव निषेधे नानेति पदं व्यर्थं स्यात् । न केवलं ब्रह्मणः अनन्तगुणपरिपूर्णत्वं किन्तु [१५]'सत्यः सो अस्य महिमा' [१६]'स्वाभाविकी ज्ञानबलक्रिया च' इत्यादिश्रुतिभिः ब्रह्मणः अनन्तकल्याणगुणानां सत्यत्वं नित्यत्वं च मुक्तकण्ठं जोघुष्यते ।

**अधष्टिप्पण्यः**

१. शाङ्करभाष्ये जन्माधिकरणे - १.१.१

२. मुण्डकोपनिषत् ४.९

३. नारायणश्रुतिः इति विष्णुतत्वनिर्णये श्रीमध्वाचार्यैः उदाहृतम्, पृ.२९४, पि.पि.वि.पि प्रकाशनम्।

४. सौपर्णश्रुतिः इति तत्त्वोद्योते नारोपन्तव्याख्याने उदाहृतम् - पृ.३७, पि.पि.एस्.एम्, प्रकाशनम्।

५. अद्वैतसिद्धौ उदाहृतम् न्यायामृतग्रन्थे -पृ.सं.२०३,तृतीयसम्पुटम्, के.टि.पि.,द्वैतवेदान्त फौण्डेशन् प्रकाशनम् ।

६. तै.उ. २.१.१

७. तै.उ. २.१

८. बृ.उ.३.४.७

९. न्यायसुधायां टीकायां उदाहृतम् - जिमासाधिकरणे -अ.१.पा.अ.१-पृ.सं. ८२८, विश्वमाध्वपरिषत् प्रकाशनम्

१०. न्यायामृते व्यासतीर्थैः उदाहृतम् तृतीयसम्पुटे पृ.१५३, के.टि.पि., द्वैतवेदान्त फौण्डेशन् प्रकाशनम्।

११. न्यायसुधा जिज्ञासाधिकरणे अ.१, प.१, अ.१, पृ.८४८

१२. श्वोताश्वतरोपनिषत् - ६.११

१३. ब्रह्मसूत्रभाष्ये उदाहृतं प्रमाणवचनम् ब्र.सू.भा. एकायनश्रुतिः -पृ.१६०

१४. क. उ. २.१.११

१५. श्वेताश्वतरोपनिषत् - ६.८

१६. बृ.उ. ६.४.१९

## उपयुक्तग्रन्थसूची


१. न्यायामृतम् (भाग.२)

२. न्यायसुधा

३. दिनकरी

४. शाङ्करभाष्यम्

५. सौपर्णश्रुतिः

६. मुण्डकोपनिषत्

७. सुरेश्वरवार्तिकम्

८. विष्णुतत्त्वविनिर्णयः

९. तत्वोद्योतः

१०. बृ.उपनिषत्

११. काठकोपनिषत्

१२. ब्रह्मसूत्रभाष्यम्


*****

# भाषाधिगमे कौशलानां पात्रम्

**आनन्दः सि.आर्.**
शोधच्छात्रः, पूर्णप्रज्ञसंशोधनमन्दिरम्,

वृक्षस्य संवर्धने यथा भूमेः, मृत्तिकायाः, पोषकांशानाम्, रोगनिरोधकानाम्, बीजस्यापि परिसस्यापि प्रभावो भवति तथैव भाषाभ्यासेऽपि बहव अंशाः प्रभावकारका भवन्ति । अत्यन्तं प्रधानतया भाषाध्ययने चतुर्णां कौशलानां प्राधान्यं भवति ।

अद्यत्वे पश्यामः बहुत्र भाषाबोधनकक्ष्याः चाल्यन्ते यत्र सम्प्रेषणकौशलप्रभावेन छात्राः भाषां प्रयुञ्जते । वाक्यानि रचयन्ति ।

वस्तुतस्तु कस्माच्चित् भाषाधिगमः परीक्षणीयश्चेत् तस्य मुखाद् व्यावहारिकानि सान्दर्भिकानि च वाक्यानि वाचनीयानि । तत्र सामर्थ्यं दृश्यते चेद् दृढं जायते यत् तेन जनेन अमुकभाषाऽधीतेति।

नेदमपवादत्वेन स्थास्यति संस्कृतभाषाध्ययने यतो हि संस्कृतमपि काचिद्भाषा । अनया भाषया भाष्यते, अभिव्यज्यते चेदेव अस्या अपि अलङ्कृतिः, शोभा नान्यथा ।

अस्याः भाषायाः अधिगमे चतुर्णां कौशलानां प्रधानां भूमिकाम् अत्र किञ्चिद् ज्ञास्यामः ।

भाषाध्ययनं काचित् सहजा क्रिया । जनितः शिशुः सहजतया अनुकरणं कृत्वा मातृभाषामधीते। भाषायाः अध्ययनं प्रयोगश्च यद्यपि सहजक्रिया तथाऽपि वैज्ञानिकरीत्या प्रशिक्षण-अभ्यासाभ्यां विना भाषासामर्थ्यसम्पादनं परिणामकरं न भवति ।

वस्तुतः भाषाशिक्षणम् इत्यस्य भाषाविदामभिप्रायः इत्थं सङ्ग्रहीतुं शक्यते ।

भाषाध्ययनं तथा भवेत् येन परोक्तमवश्यं यथार्थमवगन्तव्यम्, स्वेनापि समर्थतया प्रकटयितुं शक्यं स्यात्, निर्दुष्टं स्पष्टं निर्दोषं च पठनं लेखनं चापि साधनीयम् ।

**भाषाधिगमे चतुःकौशलानां पाधान्यम् -**

श्रवणम्, भाषणम्, पठनं लेखनश्चेति भाषाध्ययने चतुःकौशलानां प्राधान्यं वर्तत एव । तत्र सर्वस्यापि कौशलस्य सार्थकबोधनेन भाषाबोधनं फलितं भवति ।

समग्रस्वरूपस्य भाषाध्ययनस्य निमित्तं सर्वस्यापि कौशलस्य पृथक्पृथक्तया प्रावीण्यसम्पादनं सहकरोति ।

**(अ) श्रवणम् -**

भाषायाः मूलभूतं तथा आदिमं कौशलं भवति श्रवणम् । सदृढाः आरोग्यवन्तः सर्वे इदं सहजतया कुर्वन्ति । अपेक्षितम्, अनपेक्षितम्, ध्यानपूर्वकं, श्रद्धापूर्वकश्चेति नानाविधं श्रवणं तु भवत्येव निरन्तम् । अन्यैः उच्चारितानां ध्वनीनां श्रोत्रेन्द्रियद्वारा ग्रहणमात्रं श्रवणं न भवति । श्रवणं यदि अवधानपूर्वकं क्रियते, येन श्रोता वक्तुराशयम् अभिप्रायं वा ग्रहीतुं शक्नुयात् तर्हि एव तद्वास्तविकं श्रवणं भवति । श्रवणं नाम क्रिया यद्यपि सुलभा स्वाभाविकी च प्रक्रिया तथाऽपि न यान्त्रिकी क्रिया । इयं काचित् सोदिष्टा प्रज्ञापूरिता क्रमबद्धा च मानसिकी क्रिया ।

श्रवणक्रियायां शब्दतरङ्गाः यान्त्रिकतया श्रोत्रेन्द्रियद्वारा मस्तिष्कं प्राप्नुवन्ति । प्रज्ञापूर्वकश्रवणे तावत् इत्थमाकर्णिताः शब्दाः ध्वनयश्च अर्थत्वेन विषयत्वेन भावनात्वेन वा स्वीक्रियन्ते स्मर्यन्ते च । ध्यानपूर्वके श्रवणे मानसिकसिद्धता आसक्तिः अवधानम् अर्थग्रहणं स्मरणं चापि भवति ।

शिक्षणप्रक्रियायां श्रवणद्वारा छात्रस्य अध्ययनं बाहुल्येन भवति । श्रोता यदि ध्यानपूर्वके श्रवणे निष्क्रियो भवति तर्हि अपारं ज्ञानं समयं च नाशयति । अतः शिक्षणक्षेत्रे ध्यानपूर्वकस्य श्रवणस्य संस्कारः छात्रेषु रूढनीयः । तदर्थं तस्य महत्त्वं विदितं भवेत् शिक्षाप्रदातृषु ।

**(आ) भाषणम् -**

वागेव भाषायाः मूलं तथा भाषायाः प्राथमिकरूपम् ।

आधुनिके समाजे भाषणक्रिया अतिप्रधाना वर्तते । वाचं विना लोकस्य चिन्तनमेव दुस्तरं भाति । सर्वेऽपि जनाः स्वीयम् आशयं प्रकटीकर्तुं भाषन्त एव । भाषणे अभिप्रायावगमनम् अतिप्रधानं भवति । उच्चारितेषु शब्देषु शब्दप्रयोगकर्तुः आशय एव आविकष्कृतो न भवेत् तर्हि भाषितं सार्थकं न भवेत् । यतो हि भाषणे भाषणकर्तुः मतमत्यन्तं प्रधानम् ।

सम्पर्कमाध्यमानां प्राबल्यमये विश्वेऽस्मिन् समग्रं विश्वं ग्रामत्वेन परिवर्तितं दृश्यते । सम्पर्कसाधनानि तु प्रपञ्चस्य प्रतिकोणमपि सम्पर्कयितुं शक्तानि । विज्ञाने तन्त्रज्ञाने च तीव्रा प्रगतिर्दृश्यते । तत्रापि मानवानां सामाजिकः परस्परसम्पर्कः वाचा एव अत्यन्तं परिणामकर इति तु वास्तवः । अनेन भाषणकौशलस्य प्राधान्यं परिदृश्यते ।

इत्थमनिवार्यस्य वाक्कौशलस्य लब्धिः अनुकरणद्वारा यद्यपि स्वाभाविकतया भवति तथाऽपि बालस्य परिमितशब्दप्रयोगसाम्यमात्रेण सर्वाणि शैक्षिकसामर्थ्याणि अधिगन्तुं न शक्यन्ते । सहजतया

समुद्भूता वाक्, अभिव्यक्तेः समर्थसाधनत्वेन परिवर्तेत । तदर्थमेव विशिष्टं प्रशिक्षणम् अपेक्ष्यते । भाषणकौशलवृद्धिः स्वतन्त्रालोचनाय, स्वभावनाः सुसम्बद्धतया प्रकटीकर्तुम्, स्वान्तःसत्त्व-प्रकाशनाय, आधुनिकजीवने सम्यक् जीवनयापानाय, शैक्षिक-साहित्यक-सामाजिक-सांस्कृतिक-भावनात्मकविकासाय अत्यन्तम् आवश्यकी ।

**(इ) पठनम् -**

पठनं काचित् मानसिकी तथा शाब्दिकी क्रिया । मुद्रितानि पदानि वाक्यानि वा सावधानमवलोक्य अवगमनम्, लिपेः शब्दद्वारा अर्थबद्धतया प्रकटनं पठनमित्यभिधातुं शक्यते । पठनं शाब्दिकं यदि तर्हि उच्चैर्वाचनम्, शब्दं विना मनसा एव पठ्यते अवगम्यते च तर्हि मौनवाचनमिति कथ्यते । पठनक्रियायां मानसिकसिद्धता, एकाग्रता, आसक्तिः, प्रचोदनम्, अर्थग्रहणम्, कल्पना, स्मरणम् आलोचनकौशलश्च समन्वितं भवतीत्यतः पठनक्रिया न केवलं मानसिकी क्रिया अपि तु मनोवैज्ञानिकी क्रिया । वाक्यस्य वाक्यपुञ्जस्य वा साधूच्चारणमात्रेण कश्चन सम्यक् पठतीति नैव वक्तुं शक्यम् । अर्थावगमनं सुतराम् अपेक्ष्यत एव । पठनक्रियाया साङ्केतिकलिपीनां द्वारा तन्निबद्धस्य शब्दस्य साधूच्चारणपूर्वकं तदभिव्यज्यमानस्य अर्थस्यापि ग्रहणं भवेदेव । अर्थग्रहणमपि अत्र प्राधान्यमवश्यं वहति । ‘पठ-व्यक्तायां वाचि’ इति धातोर्निष्पन्नस्य ‘पठन’ शब्दस्य यद्यपि सुव्यक्तरूपेण वाचनमेवार्थस्तथाऽपि भाषाकौशलान्तर्गतस्य पठनस्य तु अर्थग्रहणपर्यन्तमपि अर्थोऽस्त्येव ।

निर्दिष्टया भाषया विषयप्रवेशं विधाय तदन्तर्गतम् अर्थम् भावनां विचारं वा गृह्णति जनः पठनक्रियायाम् । लिपीनामभिज्ञानम्, तदर्थकल्पनम्, पदानां वाक्यानां वा युगपदभिज्ञानेन सह सार्थकमुच्चारणम् अवगमनञ्च पठनक्रिया । लिपिः नेत्रद्वारा मनसि प्रविश्य भाषायाः द्वारा अर्थपूर्णध्वनिरूपेण निस्सरति यत् तदेव पठनम् । मुद्रितभाषायाः ज्ञानं विना पठनं नैव शक्यम् । श्रवणम्, भाषणम्, पदसम्पत्तिः, लेखनम्, वाक्यरचना, लेखनचिह्नावगमनम् इत्यादीनि कौशलानि पठनाय आवश्यकानि भवन्ति । वाचकः पठनद्वारा न केवलं विषयं गृह्णाति, ज्ञानम् आसादयति अपि तु सर्जनशीलपठनेन नावीन्यं सृजत्यपि । पठनेन विनूतनता अध्ययने आलोचने चापि सम्पद्यते । इत्थमालोचनशक्तिः पठनम्, पठनञ्च अलोचनशक्तिमिति परस्परं वर्धयतः । अत एव पठनं किञ्चन ज्ञानार्जनस्य तथा सर्जनशीलतायाः साधनमिति परिगणयितुं शक्यम् ।

**(ई) लेखनम् -**

भाषाध्ययने लेखनस्य किञ्चिद्विशिष्टं स्थानं वर्तते ।

भासते यत् लेखनेन विना भाषाणां शाश्वतास्तित्वं न सिद्ध्यति । आधुनिकतन्त्रज्ञानस्य प्रगतिः ज्ञानस्य सृष्ट्ये प्रसाराय च महद् योगदानमकल्पयत् । भाषायाः श्रवण-भाषण-पठनकौशलानीति त्रीण्यपि कौशलानि लेखने अन्तर्भवन्ति ।

निर्दिष्टस्य विषयस्य आलोचनस्य च निश्चितैः रेखाविन्यासैः अर्थबद्धतया क्रमबद्धतया च समायोज्य लेखनं यत् क्रियते तदुच्यते लेखनमिति । भाषणात् पठनं कष्टमिति मन्यते चेत्, पठनात् लेखनं दुष्करमिति भाति ।

हस्तलेखने प्रकटनात् पूर्वम् अधिकाधिकं कौशलम् अन्तर्गतं स्यात् । हस्तलेखने मनः, अङ्गुलयः रेखाविन्यासाश्च अन्तर्भवन्ति ।

हस्तलेखनाय कानिचित् कौशलानि प्रमुखतया आवश्यकानि भवन्ति । रेखाविन्यासाः वर्णविन्यासाः, भाषानियमाः तथा हस्तस्थाङ्गुलीनां स्नायुकौशलानि प्रधानतया आवश्यकानि भवन्ति । यद्यपि हस्तलेखनं प्रधानतया रेखाविन्यासानां व्यवस्था तथाऽपि अव्यवस्थिताः रेखाविन्यासाः न कथ्यन्ते लेखनमिति । निर्दिष्टां भावनामर्थञ्च या रेखाव्यवस्था व्यनक्ति तामेव लेखनमिति कथयन्ति ।

इत्थं भाषाध्ययने चतुःकौशलानामपि प्राधान्यं वर्तत एव ।

अत एव भाषाध्ययने अध्येतरि एतेषां कौशलानामपि प्रत्येकशः तथा सङ्घटितरूपेणापि संवर्धनाय प्रयासाः विधेयाः ।

**आधारग्रन्थसूची -**

१. कानाल, नलचक्रवती - संस्कृताध्यापनम्, श्रीवेङ्कटाम्बापब्लिकेशन्स्, तिरुपतिः ।
२. के. श्रीनिवासाचार्याः - संस्कृतभाषात्रिंशद्दिनेषु, बालाजीपब्लिशन्स्, चेन्नै, २००१
३. कम्भम्पाटि, साम्बशिवमूर्तिः - संस्कृतशिक्षणम्, २००६
४. झा, उदयशङ्करः - संस्कृतशिक्षणम्, चौखाम्बासुरभारतीप्रकाशन, वाराणसी, २०११
५. दहिया, यज्ञवीर - संस्कृतभाषादर्शनम्, भारतीयविद्याप्रकाशन, दिल्ली, २००१
६. नरेन्द्रः - संस्कृतस्य व्यवहारिकस्वरूपम्, श्री अरविन्दाश्रमः, पुदुच्चेरी, १९९६

७. मित्तलः, सन्तोष - भाषाशिक्षणे नवाचाराः, नवचेतनापब्लिकेशन्स्, जयपुरम्, २००६

८. मिश्रः, रमाकान्तः - शैक्षिकविधिः, चौखाम्बाविद्याभवन्, वाराणासी, २००६

९. विश्वासः एच्.आर्- कौशलबोधिनी, प्रकाशनम् - संस्कृतभारती, नवदेहली, प्रथममुद्रणम्- २००५, **ISBN 81-87276-25-8**

**शोधप्रबन्धः -**

१. सूर्यप्रसादः जि. संस्कृतच्छात्राणां शैक्षिकोपलब्धिः -

मानसिकयोग्यताभिवृत्तीनां विकासे शिक्षणमाध्यममभूतयोः संस्कृतमातृभाषायोः प्रभावस्य तौलनिकमध्य यनम्, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः, २०१०

**आङ्ग्लप्रबन्धाः**

1. Chanchalkumari - A comparative Study of Sanskrit Teachers Using Teaching Methods of various streams of Sanskrit, M.Ed., Dissertation, Sri LalBahadurShastri Rashtriya Sanskrit vidyapeeta, New Delhi. 2004-05

**आङ्ग्लग्रन्थाः -**

1. Borich, Gary D. - Effective Teaching Methods, Colombus, Ohio, Merrill Publishing Company, 1988

2. Harry Dhand - Techniques of Teaching, Ashish Publishing House, Neehilini, 1990

******

# वेदाङ्गानि

विनयकुमारः
शोधकः, अष्टादशीयोजना
पूर्णप्रज्ञसंशोधनमन्दिरम्

पुरुषस्य जन्मसाफल्यं पुरषार्थानां सम्पादनेन भवति । पुरुषार्थाः वेदाध्यनेन सम्पादिताः भवन्ति । वेदार्थावगमः न सुकरः । वेदाङ्गानाम् अध्यनेनैव वेदस्य ज्ञानं भवति ।

अङ्गशब्दस्य व्युत्पत्तिलभ्यो अर्थो भवति उपकारक इति । तद्यथा- अङ्ग्यन्ते ज्ञायन्ते अमीभिः इति अङ्गानि । अत्र अयमाशयः- यैरूपकरणैः यस्य कस्यापि वस्तुनः स्वरूपज्ञाने साहाय्यं प्राप्नोति तान्यङ्गानि भवन्ति । भाषा भावयोः द्वयोरपि दृष्ट्या वेदः स्वयमेव दुर्बोधः । दुरूहश्च विषयः । अतः वेदस्य ज्ञानार्थं षडङ्गानामध्ययनमावश्यकम् ।

वेदाङ्गानि षड् विद्यन्ते । यथा- शीक्षा, व्याकरणम्, छन्दः, निरुक्तम्, ज्योतिषम्, कल्पः इति । संगृहीतश्चात्र-

शिक्षा व्याकरणं छन्दो निरुक्तं ज्योतिषं तथा ।
कल्पश्चेति षडङ्गानि वेदस्याहुर्मनीषिणः ।।
[१]शिक्षा कल्पो व्याकरणं निरुक्तं छन्दसां चयः ।
ज्योतिषाम् अङ्कनं चैव वेदाङ्गानि षडेव तु ।।

### शिक्षादीनि वेदस्य षडङ्गानि :-

शिक्षादीनि वेदस्य षडङ्गानि इति प्रसिद्धविचारः । शिक्षा वेदस्ङ्क घ्राणम् । व्ङ्काकरणं मुखम् । छन्दः पादौ । निरुक्तं श्रोत्रे । ज्योतिषं चक्षुषी । कल्पः हस्तौ इति । तदुक्तं पाणिनीयशिक्षायाम्-

[२]छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ कथ्यते ।
ज्योतिषामयनं चक्षुः निरुक्तं श्रोत्रमुच्यते ।।

शिक्षाघ्राणन्तु वेदस्य मुखं व्याकरणं स्मृतम् ।
तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते ।। इति ।

### वेदाङ्गानां महत्वम्-

पुरुषजीवनस्य परमोद्देशो भवति मोक्षः । मोक्षस्तु भगवत्प्रसादात् । भगवत्प्रसादस्तु ज्ञानात् । ज्ञानं तु वेदात् । वेदस्य समीचीनज्ञानं वेदाङ्गाध्यनेन एव । तदुक्तं पतिंजलिना पास्पशाह्निके-

[3]ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदः अध्येयो ज्ञेयश्च । इति ।।

अतः षडङ्गसहितवेदाध्यनमावश्यकम् ।

**पुराणेषु वेदाङ्गानामुल्लेखः –**

वेदाङ्गानि अनेकपुराणेषु वर्णितानि सन्ति । तत्र व्याकरणं नारदपुराणस्य पूर्वभागे द्वितीय पादस्य एकपञ्चाशत्तमे अध्याये संक्षेपतया रमणीयतया च वर्णितं वर्तते । अग्निपुराणस्य ३४९ तम अध्यायात् ३५९ अध्यायपर्यन्तं दशाधिकाध्यायेषु उल्लेखोवर्तते । छन्दश्शास्त्रस्य तु गरुडपुराणे २०६ तम अध्यायात् २९२ तम अध्यायपर्यन्तं विचारो वर्तते । ज्योतिश्शास्त्रस्य तु नारदपुराणे उल्लेखो वर्तते । शिक्षायाः वर्णनमग्निपुराणे ३३६ तमे अध्याये । कल्पस्य भविष्यत्पुराणे विचारः निरूपितः वर्तते । एवमन्येष्वपि पुराणेषु एतेषां निरूपणं वर्तते ।

**शिक्षा**

**।। शिक्षा घ्राणं तु वेदस्य ।।**

वेदाङ्गेषु शीक्षायाः महत्त्वपूर्णं विशिष्टं च स्थानं वर्तते । शिक्षेयं वेदस्य घ्राणमिति कथितं वर्तते । यथा पुरुषस्य मुखं घ्राणेन विना विकृतं दृश्यते, तथैव वेदोऽपि घ्राणभूतशिक्षां विना ।

शिक्षायाः व्युत्पत्तिलभ्यमर्थं कथयन्, सायणाचार्यः- **'स्वरवर्णाद्युच्चारणप्रकारो यत्र शिक्ष्यते उपदिश्यते सा शिक्षा'** इति उक्तवान् । तैत्तरियोपनिषदि शिक्षायाः माहात्म्यम्-

[4]**शिक्षां व्याख्यास्यामः। वर्णस्वरः । मात्रा बलम् । साम सन्तानः ।**
**इत्युक्तश्शीक्षाध्यायः ।**

इति वर्णितं वर्तते । तत्र वर्णपदेन अकारादेः ग्रहणम् । स्वर इत्यनेन उदात्तादेः ग्रहणम् । मात्रया ह्रस्वदीर्घप्लुतानां ग्रहणम् । बलेन स्थानप्रयत्नौ गृह्येते । साम्ना निषादादिः सन्तानेन विकर्षणादिः गृह्यते । शिक्षायाः माहात्म्यं पाणिनिशिक्षायामुक्तम्-

[5]**मन्त्रो हीनः स्वरतोवर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह ।**
**स वाग्वज्रं यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात् ।।**

इति । अनेन ज्ञायते स्वरवर्णानां माहात्म्यं तदुपदेशकशिक्षायाः माहात्म्यम् ।

**प्रसिद्धशिक्षाग्रन्थाः –**

ऋग्वेदीयशिक्षाग्रन्थः= पाणिनीयशिक्षा ।

यजुर्वेदीयशिक्षाग्रन्थः- याज्ञवल्क्यशिक्षा, व्यासशिक्षा, वसिष्ठशिक्षा, भरद्वाजशिक्षा, माण्डव्यशिक्षा सामवेदशिक्षाग्रन्थः- नारदशिक्षा, शाकटायनशिक्षा इत्यादयः ।

अथर्ववेदशिक्षाग्रन्थः- माण्डूकीशिक्षा ।

## व्याकरणम्

## ।। मुखं व्याकरणं स्मृतम् ।।

वेदस्य मुखं व्याकरणम् । व्याकरणेन वैदिकशब्दानां व्युत्पत्तिकरणेन तेषामर्थबोधो क्रियते ।

**व्याकरणस्य क्रमिकविकासः -**

व्याकरणस्य क्रमिकविकासः शाकटायनेन ऋक्तन्त्रे प्रतिपादितम् । व्याकरणस्य कथनं पुरा ब्रह्मणा कृतम् । ब्रह्मणः सकाशात् बृहस्पतिः, बृहस्पतेः सकाशात् इन्द्रः, इन्द्रात् भरद्वाजः, भरद्वाजात् ऋषयः, ऋषिभ्यः ब्राह्मणाः व्याकरणमधिजग्मुः । व्याकरणसाहित्ये प्रसिद्धव्याकरणानि ऐन्द्रपाणिनीयादिव्याकरणादीनि ।

## छन्दः

## ।। छन्दः पादौ तु वेदस्य ।।

छदि आच्छादने इति धातोः निष्पन्नः छन्दश्शब्दः । छादयती आवृणोति मन्त्रप्रतिपाद्य यज्ञादीन् इति छन्दः । छन्दः यज्ञादि कर्मणि वैदिकानुष्ठानानि च असुराणां विघ्नेभ्यः रक्षति । छन्दसां माहात्म्यमित्थं वर्तते -

अविदित्वा ऋषिं छन्दो दैवतं योगमेव च ।
योऽध्यापयेत् जपेद्वापि पापीयान् जायते हि सः ।।

इति । अतः छन्दसः ज्ञानमत्यन्तमावश्यकम् इति ज्ञायते । सर्वानुक्रमण्यां च इदमुक्तम्-

[६]"यो ह वा अविदितार्षेयच्छन्दो दैवतब्राह्मणेन मन्त्रेण याजयति वा
अध्यापति वा स्थाणुं वर्च्छति गर्ते वा पात्यते च पापीयान् भवति ।।' इति

अतः यज्ञादिकर्मणि छन्दसः योजनं तत्पूर्वं छन्दसामध्यनमावश्यकमिति ज्ञायते । भरतमुनिना इदमुक्तम्-

'छन्दहीनो न शब्दोऽस्ति न छन्दः शब्दवर्जितम् ।' इति ।

कात्यायनमुनिः स्वीवे ऋग्यजुःपरिशिष्टे ग्रन्थे इदमुक्तवान् -

'छन्दोभूतमिदं सर्वं वाङ्मयं स्याद्विजानतः ।
नाच्छन्दसि न चापृष्ठे शब्दश्चेरति कश्चन ।।

अनेन वाक्येन छन्दसः माहात्म्यातिशयः अवगन्तुं शक्यते ।

**मुख्यछन्दांसि :-**

वेदेषु मुख्यतः सप्तछन्दांसि विद्यन्ते । यथा-

१. गायत्री- अत्र त्रयः पादाः । २४ अक्षराणि । प्रतिपादं च अष्टाक्षराणि भवन्ति ।

२. उष्णिक् - अत्र त्रयः पादाः । प्रथमद्वितीयपादयोः अष्टौ अष्टौ अक्षराणि । तृतीय पादे च द्वादशाक्षराणि भवन्ति । एवमाहत्य २८ अक्षराणि सन्ति ।

३. अनुष्टुप्- अत्र चत्वारः पादाः । प्रतिपादम् अष्टाक्षराणि । आहत्य ३२ अक्षराणि विद्यन्ते ।

४. बृहती - अत्रापि पादचतुष्टयम् । त्रिषु पादेषु अष्टौ अष्टौ अक्षराणि, अन्तिमे द्वादश । आहत्य ३६ अक्षराणि सन्ति ।

५. पंक्तिः - अत्र पञ्चपादाः सन्ति। प्रतिपादमष्टाक्षराणि विद्यन्ते।एवमाहत्य ४० अक्षराणि विद्यन्ते ।

६. त्रिष्टुप् - अत्र चत्वारः पादाः । प्रतिपादम् एकादशाक्षराणि । आहत्य ४४ अक्षराणि विद्यन्ते।

७. जगती- अत्र चत्वारः पादाः । प्रतिपादं द्वादशाक्षराणि । आहत्य ४८ अक्षराणि विद्यन्ते ।

## निरुक्तम्

**।। निरुक्तं श्रोत्रमुच्यते ।।**

निरुच्यते निश्शेषेण उपदिशते निर्वचनविधयाः तत्तदर्थबोधनाय पदजातं यत्र तन्निरुक्तम् । कठिणवैदिकशब्दानां व्युत्पत्तिबोधकं शास्त्रं निरुक्तमुच्यते । निरुक्तस्य रचयिता यास्कः । निघण्टोः व्याख्यानग्रन्थः निरुक्तमस्ति । परन्तु यास्कः **तदिदं विद्यास्थानं व्याकरणस्य कार्त्स्न्यं'** इति व्याकरणस्य पूरकशास्त्रं निरुक्तमिति वदति । व्याकरणे केवलं शब्दानां व्यत्पत्तिरेव निर्धार्यते किन्तु निरुक्ते व्युत्पत्त्या सह अर्थस्यापि निर्वचनं कृतमस्ति । निरुक्तं चतुर्दशप्रभेदमिति समालोचकाः वदन्ति । वेदस्य कठिणशब्दानां समावेशः यस्मिन् ग्रन्थे कृतः सः निघण्टुः इत्युच्यते । इति ।

'वृषो हि भगवान् धर्मः ख्यातो लोकेषु भारत ।

**निघण्टुकपदाख्याने विद्धि मां वृषमुत्तमम् ।।**

**कपिर्वराहश्रेष्ठश्च धर्मश्च वृष उच्यते ।**
**तस्मात् वृषाकपिं प्राहकाश्यपो मां प्रजापतिः ।।**

महाभारतस्य मोक्षपर्वणि निघण्टोः रचयिता प्रजापतिः कश्यप इति कथितं वर्तते । अनेन प्रजापतिः कश्यपः निघण्टोः कर्ता इति ज्ञायते ।

## ज्योतिषम्

**।। ज्योतिषामयनं चक्षुः।।**

ज्योतिषं वेदस्य चक्षुरिव वर्तते। ज्योतिश्शास्त्राधारेण सौरमण्डलस्य समयस्य च ज्ञानं भवति । तदेव आर्षज्योतिषे-

**वेदा हि यदर्थम् अभिप्रवृत्ताः कालानुपूर्वा विहिताश्च यज्ञाः ।**
**तस्मादिदं कालविधानशास्त्रं यो ज्योतिषं वेद स वेद यज्ञान् ।।**

इति डिण्डिमघोषेण उक्तं वर्तते । वेदाङ्गज्योतिषस्य कर्ता लगधः । अस्य प्राचीनटीकाकारः सोमाकरः । आर्षज्योतिषे वेदाङ्गज्योतिषस्य कर्ता लगध इत्येव कथितम् । यथा-

**प्रणम्य शिरसा कालमभिवाद्य सरस्वतीम् ।**
**कालज्ञानं प्रवक्ष्यामि लगधस्य महात्मनः ।।** इति ।

### ज्योतिषस्य वेदाङ्गत्वम्:-

वैदिकयज्ञविधानाय ज्योतिषस्य महन्महत्वं स्वीकृत्य ज्योतिषमार्ताण्डेन सुविख्यातेन भास्कराचार्येण स्पष्टमुद्धोषितं स्वीये सिद्धान्तशिरोमणौ यथा-

**'वेदास्तावत् यज्ञकर्मप्रवृत्ताः प्रोक्तास्ते तु कालाश्रयेण ।**
**शास्त्रादस्मात् कालबोधो यतः स्यात् वेदाङ्गत्वं ज्योतिषस्योक्तमस्मात् ।।**

इति ।। ज्योतिश्शास्त्रस्य माहात्म्यं स्वकीयशिक्षायामुद्घोषितवान् यथा- 'चक्षुर्विहीनः पुरुषः यथा स्वकार्यसम्पादने असमर्थः भवति । तद्वत् ज्योतिश्शास्त्रज्ञानेन विरहितः पुरुषः वैदिककर्मकाण्डेषु सर्वथा अन्ध एव तिष्ठति' इति ।। एवं रूपेण ज्योतिश्शास्त्रस्य माहात्म्यं वर्तते ।

## कल्पः

**।। हस्तौ कल्पोऽथ कथ्यते ।।**

कल्प्यते समर्थयते यागप्रयोगः अत्र इति कल्पः । वेदभाष्यकारस्य विष्णुमित्रस्य मतानुसारं कल्पोनाम वेदविहितानां कर्मणां अनुपूर्व्येण कल्पनाशास्त्रमिति । कल्पस्य विधिः नियमः न्यायः कर्म आदेशः इत्यादीनि पर्यायपदानि विद्यन्ते । अत्रायं निष्कर्षः विद्यते । येषां यज्ञयागादिविहितानां विवाहोपनयनादि कर्मणां च महत्वपूर्णं प्रतिपादनं वैदिकग्रन्थेषु कृतमस्ति, तेषां सूत्रग्रन्थानाम् अभिधानमस्ति कल्पः । कल्पसूत्राणि चतुर्धा विभज्यते । तद्यथा-

१. श्रौतसूत्रम् । २. गृह्यसूत्रम् । ३. धर्मसूत्रम् । ४. शुल्बसूत्रमिति ।

**श्रौतसूत्रम्**- श्रुतिप्रतिपादितदर्शपौर्णमाससोमयागादिमहत्वपूर्णयागानां वर्णनमत्र क्रियते । आश्वलायनशाङ्खायनकात्यायनादिश्रौतसूत्राणि अत्र प्रसिद्धानि ।

**गृह्यसूत्रम्**- अत्र गृह्यसम्बन्धियज्ञोत्सवानां विचारः वर्तते । मानवानां जन्मतः प्रारभ्यः मृत्युपर्यन्तं यावद्विधीयमानानां षोडशसंस्काराणां प्रतिपादनमत्र क्रियते । देवयज्ञपितृयज्ञादिविचारो अत्र वर्तते । आश्वलायनकौषीतकीत्यादीनि गृह्यसूत्राणि अत्र प्रसिद्धानि वर्तन्ते ।

**धर्मसूत्रम्**- प्राचीनभारतीयगृहस्थस्य दैनिकाचरणविधेः उल्लेखोऽत्र वर्तते । विवाहभेदः, शौचाशौचविचारः, सामाजिकव्यवस्था, वर्णाश्रमधर्मः, राजधर्मः, अपराधानां प्रायश्चित्तम्, सदाचारः इत्यादयः अत्र प्रतिपाद्यन्ते । वसिष्ठादिधर्मसूत्राणि अत्र प्रसिद्धानि ।

**शुल्वसूत्रम्**- अत्र प्राचीनभारतीयरेखागणितस्य ज्यामितिशास्त्रस्य च प्रसिद्धमुपपादनस्ति । यज्ञवेदिकायाः निर्माणमापनमत्रवर्णितम् । शुल्बस्यार्थो भवति रज्जुः । रज्जुनैव मापनविधिरत्र प्रतिपाद्यते । अधुना केवलं यजुर्वेदस्यैव शुल्वसूत्राणि विद्यन्ते । तत्र कात्यायन, बोधायन, आपस्तम्भादीनां शुल्वसूत्राणि प्रमुखानि ।

यः कोऽपि वेदाङ्गैः विना वेदस्य समीचीनमर्थं अधिगन्तुं न शक्नोति । वेदाङ्गैरेव वेदार्थं ज्ञातुं शक्यते । समीचीनार्थः यदि न भवति तदा तत्वज्ञानप्राप्तिः न भवति । यदा तु तत्वज्ञानं न भवति तदा परमपुरुषस्य प्रसादोऽपि न भवति । परमपुरुषस्य प्रसादस्तु मोक्षाय अत्यवश्यकं वर्तते । अतः ब्राह्मणेन निष्कारणो षडङ्गोवेदः अध्येयो ज्ञेयश्च इति ।

।। इति शम् ।।

End Notes :


१. पाणिनीयशिक्षा - रचयिता - पणिनिः
सम्पादकौ - डा. सत्यप्रकाशदुबे, आचार्यशम्बुदयालुपाण्डेय ।
प्रकाशनसंस्था - राजस्थानीग्रयन्तागार, जोधपुरः, २००४

२. पाणिनीयशिक्षा - रचयिता - पणिनिः
(४१,४२) सम्पादकौ - डा. सत्यप्रकाशदुबे, आचार्यशम्बुदयालुपाण्डेय ।
प्रकाशनसंस्था - राजस्थानीग्रयन्तागार, जोधपुरः, २००४

३. पास्पशाह्निकः - रचयिता - पतञ्जिलः

४. तैत्तरीयोपनित् (२.१) - सम्पादकौ - डा. ए.वि.नागसम्पिगे, वि.वि.उपाध्यायः ।
प्रकाशनसंस्था - पूर्णप्रज्ञसंशोधनमन्दिरम्, बङ्गळूरु, २०१०

५. पाणिनीयशिक्षा-५ - रचयिता - पणिनिः,
सम्पादकौ - डा. सत्यप्रकाशदुबे, आचार्यशम्बुदयालुपाण्डेय
प्रकाशनसंस्था - राजस्थानीग्रयन्तागार, जोधपुरः, २००४

६. सर्वानुक्रमणिका(१.१) - रचयिता - कात्यायः
सम्पादकः - ए.ए. म्याक् डोनेल् । १८८६

७. ऋग्यजुषपरिशिष्टम्

८. मोक्षधर्मपर्वः -(३४२/८६-८७) रचयिता - व्यासमहर्षिः
सम्पादकः - पि.एस्, शेषगिरिआचार्यः ।
प्रकाशनसंस्था - तत्वसंशोधनसंसत्, २०१९

९. सिद्धान्तशिरोमणिः - ९ । रचयिता - भास्कराचार्यः
सम्पादकः - पं. सत्यदेवशर्मा
प्रकाशनसंस्था - चौखम्बासुरभारती, २०११


*****

# श्रीकाशीश्रीनिवासचार्यकृतटीकासंवलितस्य सङ्ग्रहरामायणमहाकाव्यस्य युद्धकाण्डस्य च परिचयसङ्क्षेपः

- **श्रीकृष्णाचार्यः श्री. कोर्लहळ्ळि**
शोधच्छात्रः, कर्नाटकसंस्कृतविश्वविद्यालयः, बेङ्गळूरु

'यावत् स्थास्यन्ति गिरयः सरितश्च महीतले ।
तावद् रामायणकथा लोकेषु प्रचलिष्यति ।।'[१]

प्रसिद्धेयं गाथा चिरकालादूर्जिता विलसत्यतितराम् ।

श्रीत्रिविक्रमपण्डिताचार्यसुतेन श्रीनारायणपण्डिताचार्येण विरचितमिदं सङ्ग्रहरामायणाख्यं महाकाव्यम् । अधुना तदधिकृत्य विचिन्त्यतेऽत्र । नेदं श्रीवाल्मीकिकविनिबद्धं रामायणमात्रमनुसरति । परन्तु श्रीरामायणकथाप्रवाहं पुरस्करोति । इतिहासोऽयं श्रूयते—

'निर्दग्धेषु च लोकेषु वाजिरूपेण वै मया ।
श्रुत्वा जगाद च मुनीन् प्रति देवश्चतुर्मुखः ।।
वाल्मीकिना च यत्प्रोक्तं रामोपाख्यानमुत्तमम् ।
ब्रह्माऽभिहितं तच्च शतकोटिप्रविस्तरम् ।।
आहृत्य नारदायैव तेन वाल्मीकिना पुनः ।।'[२]

'चरितं रघुनाथस्य शतकोटिप्रविस्तरम् ।
एकैकमक्षरं प्रोक्तं महापातकनाशनम् ।।'[३]

एवं च श्रीहयग्रीवरूपिणा श्रीहरिणा निर्मितोऽयं श्रीरामयणग्रन्थः शतकोटिविस्तरात्मकः चतुर्मुखायोपदिष्टः । स च नारदादिमुनीन् प्रति उपदिदेश । सोऽपि महर्षिनारदः पृष्टवते वाल्मीकये प्रोवाचेति इतिहासः श्रूयते । वाल्मीकिरपि नारदं कुतो वा पप्रच्छ -

'कोन्वस्मिन् साम्प्रतं लोके गुणवान् कश्च वीर्यवान्' ।।[४]

इत्यादि रूपेण । तत्र कश्चन प्रसङ्गः सम्प्रवृत्तः - कदाचिद् तमसानदीं जगाम प्राचेतसो मुनिरवगाहनाय । कृतस्नानो आश्रमप्रदेशं गन्तुमुद्यतस्य मार्गे तस्य श्रवणपदवीम् आविवेश कस्यचन

विहगस्य आक्रन्दनशब्दः । शब्दपथिदत्तदृष्टिरयं मुनिः व्याधेन निहतसहचरिकं क्रौञ्चं सदयमाक्रन्दमानं ददर्श ।

विलक्षणकरुणालिङ्गितहृदयस्य समुजृम्भितान्तर्निगूढशोकरसस्य वा मुनेरास्याद् झटिति अपृथग्यत्नेनैव कण्ठं भित्वा निर्गमितोऽयं समुचितललितसन्निवेशाचारुणाकलितः शब्दराशिः —

'मा निषाद प्रतिष्ठां त्वम् अगमः शाश्वतीः समाः ।
यत्क्रौञ्चमिथुनादेकम् अवधीः काममोहितम् ।।'[५] इति ।

'ऋषिणां पुनराद्यानां वाचमर्थोऽनुधावति'[६] इत्यस्यानितरसाधरणनिदर्शनताम् आपायं श्लोकः । किमिदं प्रवृत्तमित्याश्चर्यकुतूहलनद्यवगाहनोत्थः पुनः पुनः आकलयामास उच्चचार च- 'मा निषाद प्रतिष्ठां त्वम्' इति । इदं प्रथमतः, प्रकृताप्रकृतार्थोप - बृंहितोऽनुष्टुप् छन्दसि निबद्धोऽयं श्लोकः प्रादुरभूत् । अनतिदूरस्थाः सम्मिलिताश्च तपोधनाः श्लोकमिममपमपूर्वं श्रावंश्रावं मुद्रितमनाः मुनिमिमं वारं वारं छन्दसि अस्मिन्नेव काव्यमेकं ग्रन्थितुं प्रार्थयामासुः । पुरस्कृतप्रार्थनोऽयं मुनिपुङ्गवः नारदं परिपप्रच्छ- 'कोन्वस्मिन् साम्प्रतं लोके' इत्यादि । परिज्ञातरामायणो नारदोऽपि रामचरितमाह। नारदः कथम् अज्ञासीद् रामायणमिति जिज्ञासायां परम्परायातं रामायणं प्राक्तनं कल्पनीयमेव । तदेव मूलरामायणमिति । श्रीमध्वाचार्यैश्च प्रमाणग्रन्थाानामुल्लेखप्रसङ्गे चाभिहितमित्थम् -

'ऋगादयश्च चत्वारः पञ्चरात्रं च भारतम् ।
मूलरामायणं ब्रह्मसूत्रं मानं स्वतः स्मृतम्' ।।[७] इति ।

एतदेव हयग्रीवप्रोक्तं रामायणम् इति ।
'रामायणमिति ख्यातं शतकोटिप्रविस्तरम्' ।।[८]

श्रीनारायणपण्डिताचार्यैः पुनरपूर्वोऽयं विचारः प्रकटितः । पिता यो, श्रीमध्वाचार्यस्य अन्तेवासी, ह्यनेककृतीनां रचयिता कविवाग्मितालिङ्गितहृदयः तत्त्वप्रदीपाख्यप्रौढकृतिगोगणेन समरञ्जित- सहृदयसज्जनलोकः त्रिष्वपि साहित्यप्रकारेष्वासादितत्रिविक्रमतास्वरूपोऽयं त्रिविक्रमपण्डितार्यो मूलरामायणार्णवे तिमिङ्गिलायमानो विरराज इति । तदुक्तमस्मिन्नेव महाकाव्ये-

'सूक्तिरत्नाकरे रम्ये मूलरामायणार्णवे ।
विहरन्तो महीयांसः प्रीयन्तां गुरवो मम ।।'[९]

अत्र पितृत्वेन च गुरुत्वव्यवहार इति निर्विवादम् । त्रिविक्रमार्यैः सह सप्ताष्टानि दिनानि वादं विधाय, पराजयतापादनमुखेनैव तज्जीवनविजयतापादकोऽयं प्रसङ्गः ।

श्रीमध्वाचार्यस्तु पौनः पुन्येन मूलरामायणमुल्लिखन् तदीयविचारजलधारया स्वीयकृतौ राममभिषिञ्चन् सज्जनमानसाङ्गणे शुशुभे । अश्रुतविषयामृतशीकरान् शिशीके । एतावता च निर्गलितोऽयमर्थः मूलारामायणस्य सङ्ग्रहोऽयं वाल्मीकिरामायणम् । चतुर्विंशत्सहस्राणां श्लोकानाम् आकरः । सप्तस्वपि काण्डेषु येयं रामकथा निरूपिता, नेयं श्रीरामस्य सम्पूर्णा कथा । यागरक्षणाय रामस्यानयनार्थं विश्वामित्रो यदायोध्यामाजगाम तदोनषोडशवर्षोऽयं राम इति ज्ञायते । ततः विश्वामित्रेण साकं रामलक्ष्मणयोर्वनं प्रतिगमनं, राक्षसानां वधः, जनकपुर्यां जानक्या सह श्रीरामस्य विवाहः, अयोध्यां प्रत्यागमनं रामपट्टाभिषेकाय च दशरथकृतव्यवसायः, वनगमनमिति बालकाण्डायोध्याकाण्डयोः समाप्तिः कृता एतावदावेदनाय च । ततश्च चतुर्दशवर्षीया कथा च निरूपितावशिष्टेषु च काण्डेषु । उत्तरकाण्डे च विविधाः कथाः निरूपिताः । श्रीरामस्तु मानवरूपेण भुवि चान्द्रमानमनुसृत्य एकादशसहस्रवर्षं, नक्षत्रमानरीत्या च त्रयोदशवर्षसहस्रं यावद्राज्यं शशास इति निश्चप्रचम् । वाल्मीकिविरचिते रामायणे च केवलमेकादशसहस्रवर्षीया कथा नोपलभ्यत इत्येतत्सत्यमेव । ततश्च ज्ञायते सा सर्वाऽपि कथा मूलरामायणे सुष्ठुनिरूपितेति । शतकोटिग्रन्थविस्तारश्च मूलरामायणस्य साधु सङ्गच्छते ।

चतुर्विंशत्सहस्रश्लोकेषु केवलं रामस्य न्यूनातिन्यूनं त्रयस्त्रिंशत् हायनीया कथा विस्तृता किल । प्राक्तनैः सर्वैरपि कविभिः वाल्मीकिविरचितरामायणमाधारीकृत्य, काव्यानि विभिन्नासु च भाषासु विरचितानि दृश्यन्ते । तेषु च येन केनापि कविना निर्णयाय प्रयत्नो न विहितः परिज्ञातमूलरामायणः सर्वशास्त्रवेत्ता च श्रीमध्वमुनिः श्रीनारायणाज्ञया सज्जनोपकाराय च स्वीयं श्रीरामायणकथानिर्णयम् अकार्षीत् । तेनैव निगदितं वाक्यं श्रुणुमः -

'इत्यशेषपुराणेभ्यः पञ्चरात्रेभ्य एव च ।
भारताच्चैव वेदेभ्यो महारामायणादपि ।।
परस्परविरोधस्य हानान्निर्णीय तत्त्वतः ।
युक्त्या बुद्धिबलाच्चैव विष्णोरेव प्रसादतः ।।
बहुकाल्पानुसारेण मयेयं सत्कथोदिता ।
नैकग्रन्थाश्रयात् तस्मात् नाऽशङ्क्याऽत्र विरुद्धता ।।

क्वचिन्मोहायासुराणां व्यत्यासः प्रतिलोमता ।
उक्ता ग्रन्थेषु तस्माद्धि निर्णयोऽयं कृतो मया' ।।
एवञ्च वक्ष्यमाणेषु नैवाऽशङ्क्या विरुद्धता ।
सर्वकल्पसमश्चायं पारम्पर्यक्रमः सदा' ।।
पुंव्यत्यासेन चोक्तिः स्यात् पुराणादिषु कुत्रचित् ।
कृष्णामाह यथा कृष्णो धनञ्जयशरैर्हतान् ।
शतं दुर्योधनादींस्ते दर्शयिष्य इति प्रभुः ।।[१०] इति ।

श्रीनारायणपण्डिताचार्यस्तु स्वकीयस्य सङ्ग्रहरामायणमहाकाव्यस्य विरचनार्थं स्फूर्तिम् अवाप अस्मादेव श्रीमहाभारततात्पर्यनिर्णयग्रन्थात् । तद्ग्रन्थसङ्ग्रहः किल 'श्रीसङ्ग्रहरामायणम्' ।।

**कृतिकारस्य परिचितिः —**

किञ्चिदिवात्र तद्वंशस्य इतिहारासोपवर्णनं नाप्रस्तुतायते । येयं कविसम्बद्धा कथात्रोपस्थापिता भवति, तस्याः मूलं भवति प्रमाणं तेनैव विरचितं श्रीमध्वविजयाख्यं महाकाव्यं । तत्र च स्ववंशीयचरितं नातिविस्तृतमुपवर्णितम् । तद्बलेनात्र सङ्क्षिप्यते कुलचरितम् । आसीत् कर्णाटकराज्यस्येदानीन्तनसीमा प्रान्ते कासरगोडुप्रदेशे सुब्रह्मण्यशास्त्रीति शङ्करसिद्धान्तधुरन्धरो काव्यरचनाप्रतिभाशाली च । देहान्तसमये च स्वपुत्रमद्वैतशास्त्रनिष्ठं त्रिविक्रमपण्डितम् आहूय रहसि सत्यार्थमुपदिदेश । अद्वैतभावना न मोक्षोपयोगिनी, स्मर विष्णुं सकलगुणगणभरितम् । श्रीकृष्णभक्तिरेका मोक्षदात्री, अत एव 'अनन्यभावनया सर्वोत्तमं हरिं भज' इति । प्राप्तोपदेशोऽपि श्रीत्रिविक्रमार्यः नाद्वैततत्त्वं मतं वा तत्याज । काव्यरचनाचातुर्यं परम्परागतमिव द्रव्यं विलसत्यस्मिन् । गच्छति काले श्रीमध्वाचार्यैः सह तत्त्ववादः प्रवृत्तोऽस्य । वादे पराजितोऽपि जीवनयात्रायां जित इवानन्दतुन्दिलो भूत्वा श्रीमध्वगुरुणामन्तेवासितामनुबभूव । व्यरचि च 'मध्वभाष्यस्य व्याख्या' । श्रीमध्वाचार्यस्य वाय्ववतारतां विजानन् गुरुभक्त्या 'वायुस्तुति' रचनामुखेनाभिव्यक्तिमकार्षित् ।

'उषाहरणाख्यं ' महाकाव्यं च तस्य महाकवित्वं स्फुटीचकार । पण्डितकुलललामभूतस्य अस्य श्रीत्रिविक्रमपण्डिताचार्यस्य पुत्रोऽयं 'नारायणपण्डिताचार्यः' । पण्डिततल्लजोऽयं महाकविरिति ख्यातिं भेजे, इत्येतत् कुलस्यास्य गौरवतां सूचयति । श्रीनारायणपण्डिताचार्यस्य

प्रतिभाम्बुधेराविर्भूतमिदं 'सङ्ग्रहरामायणाख्यं' महाकाव्यम् । कवेः देशकालकृतीनां विचारः सुविस्तृतोऽन्यत्र । तद्वंशपरिचयश्च आवश्यकमिति परिभाव्य परिदर्शितोऽप्युत्तरत्र ।

सङ्ग्रहरामायणम् अधिकृत्य महाकविना श्रीनारायणपण्डिताचार्येण षोडशसर्गात्मकमिदं महाकाव्यं सरससुन्दरं व्यरचि । श्रीवाल्मीकिविरचितं रामायणमवलम्ब्य सङ्ग्रहरूपेण रचितमपीदं सङ्ग्रहरामायणं श्रीमध्वाचार्यविरचितस्य रामायणस्य विस्तृतरूपमिति कथनं सुसङ्गतमिति प्रतिभाति । मूलरामायणमाधृत्य स्पष्टयति क्वचिद् विषयविशेषान् श्रीमध्वरामायणम् । तदनुकरोति इदं काव्यं निस्सङ्कोचम् । सप्तशतवर्षपुरातनी कृतिरियं तत्कालीनां प्रचलितरामायणकथास्थितिं च प्रकटयति । अर्वाचीनैः संशोधकैः येयं वाल्मीकिरामायणीया शुनककथा, शम्बूककथा, च प्रक्षिप्तेति परिकल्पिता सा चास्मिन् काव्ये दृग्विषयताङ्गतेति ऐहिसिकता प्रमाणिता भवति ।

सङ्ग्रहरामायणमाहाकाव्यमिदं सप्तशतवर्षेभ्यः प्राक् विरचितमित्येतद् काव्यस्यास्य महत्वं प्रकाशयति । कथानिरूपणमात्रं न प्रधानीकृतम् अत्र । सहृदयमनोल्लासकं काव्यतत्त्वं सरसतापादनमुखेन मोक्षपथप्रदर्शनमपि प्रत्यपाद्यत । रामस्य सीतायाः च कदापि वियोगो न कविसम्मतः । यतो मर्यादापुरुषोत्तमत्वेन प्रस्तुतोऽयं रामः साक्षात् विष्णुरेव । तत्पत्नी च सीता साक्षान्महालक्ष्मीः । द्वितीयमङ्गलश्लोकोऽयं विषयेऽस्मिन् प्रमाणीभूतः । मध्वमतानुयायी कविरित्यत्र नास्ति संशीतिलेशः । तत्त्वस्यास्य स्फुटीकरणाय च वाय्ववतारत्रयस्तोत्रमुल्लिलेख कविः । वायुरेव अवतारत्रयमवाप । तस्य वायोः प्रथमतनुः हनूमान् । द्वितीया तनुः भीमसेनः । तृतीया च तनुः पूर्णप्रज्ञ इति । शास्त्रसंशोधनकर्मणि निमग्नोऽयं श्रीमध्वाचार्यः तदवधि ये प्राक्तनग्रन्थाः येन केनापि नावमृष्टाः नावलोकिताश्च तादृशान् ग्रन्थविशेषान् विमृग्य व्यवहारपथमनैषीत् । इदमपूर्वं भाग्यं संस्कृतसाहित्यस्य इत्येवाकलयामः । तत्फलत्वेन च उपलब्धोऽयं ग्रन्थविशेषः तदवधि अनाविष्कृतं मूलरामायणमिति । तदुल्लिखत्यत्र कविः-

**'सूक्तिरत्नाकरे रम्ये मूलरामायणार्णवे ।**
**विहरन्तो महीयांसः प्रीयन्तां गुरवो मम ।।'**[११]

अर्थात् कवेः पिता श्रीत्रिविक्रमाचार्यः मूलरामायणार्णवे तिमिङ्गिलायमानो विरराज इति । क्रिस्तीये द्वादशशततमे ग्रन्थोऽयं व्यवहारविषयतां गत इति । तत्पुनः नोपलभ्यत इति खेदावहोऽयं विचारः । कविरपि मूलरामायणरसं यथेष्टं स्वादयाञ्चक्रे । तदस्मिन् काव्ये सहृदयानामनुभवम् अधिरोहति । वाल्मीकिना ग्रथितं रामायणं च पुरस्कारोति, सादरम् अभिवन्दते च । तदुक्तं-

'वाल्मीकेर्गौः पुनीयान्नो महीधरपदाश्रया ।
यद् दुग्धमुपजीवन्ति कवयस्तर्णका इव ।।[१२] इति ।

श्रीमध्वाचार्यः स्वकीयेषु ग्रन्थेषु वारं वारं ब्रह्मतर्कपञ्चरात्रादिकृतीनामुल्लेखमकार्षीत् । अयमपि श्रीनारायणपण्डिताचार्यः तानेव ग्रन्थान् उल्लिलेखेति तयोः गुरुशिष्यभावः प्रायः परिजृम्भते ।

**सङ्गृहकथामधिकृत्य -**

सङ्ग्रहरामायणमिति नामधेयं काव्यस्येयत्तां सूक्ष्मेक्षिकया अवीवचत । पूर्वोक्तमिव बह्वत्र श्रीमन्महाभारततात्पयनिर्णयकथामनुकरोति । श्रीवाल्मीकिरामायणकथा तु विशेषत आधारभूतेति निश्चितिः । परं तु यथा श्रीमन्महाभारततात्पर्यनिर्णये रामायणकथायाश्च पूर्वं पीठिकारूपेण यत्तत्वं विष्णुसर्वोत्तमत्वादिकं निजगाद तथा विपुलरूपेण नानूदितमत्र । सङ्ग्रहकाव्यत्वात् सङ्क्षेपितः । रामायणे साक्षाद् दशरथचरितमारब्धम् । तथा नोक्तमत्र । भगवतः सामार्थ्यमभिधाय भगवतः नारायणस्य रूपविशेषाणां निरूपणं विहितम् । जगत्सृष्टिप्रक्रिया चोल्लिखिता - यथा 'श्रीमन्महाभारततात्पर्यनिर्णये' उक्तं तथाऽत्रापि दृश्यते । वासुदेवादिरूपाणां कार्यमुक्त्वा मन्वन्तरकथा प्रारब्धा । सूर्यवंशीयेषु राजसु प्राचीनान् नृपाननुल्लिखन् साक्षाद् दशरथमाहात्र कविः । एवं कथा प्रकाशमागता ।

उत्तरकाण्डकथा विशिष्यते काव्येऽस्मिन् । तत्रापि श्रीरामराज्यं वैकुण्ठलोकमिव सर्वसुखसमृद्धमिति वर्ण्यते । अत्र च कविप्रतिभा परमोल्लासलसिता प्रतिभाति । उवणकाण्डे द्वितीयसर्गे एव विविधऋतूनां वर्णनं दरीदृायते । त्रयोदशसहस्रवर्षं यावद् श्रीरामराज्यम् आसीदिति निर्णयानुसारं कथितमस्ति । श्रीरामानुजानां राज्यभारविचारो विशिष्यतेऽत्र । गन्धर्वैः साकं भरतस्य युद्धोन्मादः, भरतविजयः, अनन्तरं भरतपुत्रस्य राज्यभारक्रमः, लक्ष्मणापुत्राणां राज्यभारवैभवं, चोपवर्णितमत्र । श्रीरामस्याचिन्त्याद्भुतकार्याणां प्रदर्शनं च सङ्क्षेपेण कथितमस्ति । श्रीरामावतारकार्यसमाप्त्यनन्तरं रामाज्ञां शिरसि निधाय रूपद्वयमाप्य, भक्ताग्रणी हनूमान् प्रदेशद्वयम् अध्युवास । किंपुरुषखण्डे च स्थित्वा श्रीरामगुणगणवर्णनेन सन्तोषसन्दोहं प्राप । हनूमांश्च अपूर्वप्रकारेण भगवदवताराणां स्तुतिमकार्षीत् काव्येऽस्मिन् ।

यानि च रूपविशेषाणि भागवतादिषु न प्रकटितानि तानि चात्र प्रदर्शितानीति विशेषः । भगवतः रामस्य गुणसन्दोहस्तवनं च अपूर्वं सत् भक्तमानसोल्लासदायकं प्रतिभाति । निरन्तरमगायत हनूमान्

किंपुरुषेषु । वाल्मीकिरामायणे यदिदं नोपलब्धं तदत्र विशिष्य निरूपितमस्ति । कविना महाकाव्यस्य काव्यसौन्दर्यं छन्दोवैविध्यं च प्रदर्शितमस्ति ।

**सङ्ग्रहरामायणे युद्धोकाण्डोन्मादः - कश्चन विचारः**

सप्तसु काण्डेषु प्रपञ्चिता या रामायणकथा कविपुङ्गवेन वाल्मीकिमहर्षिणा सैव कथात्राप्युपपादिता कविना नारायणपण्डिताचार्येण । इयांस्तु विशेषोऽवश्यमुल्लेखनीयोऽस्ति । अयं च नारायण-पण्डिताचार्यः न केवलं वाल्मीकिमनुससार । अपि तु परामर्शितानेकप्राचीनरामायणं, विज्ञात-मूलरामायणरहस्यं, परिशोधिताष्टादशपुराणं श्रीमध्वमुनिम् अपि विशेषतोन्वसार्षीत् । तदिदं महत्सौभाग्यमस्माकं तदनेन च कार्येणास्माकं सर्वेष्वपि काण्डेषु विशेषविषयाः समुपलभ्यन्ते । तदेतत् सर्वं सङ्कलय्य, विशिष्य सङ्ग्रहरामायरस्य युद्धकाण्डमधिश्रित्य विचिन्त्यते कश्चिद् विचारः । सीतां प्रति श्रीरामसन्देशं प्रदाय तस्याः सकाशाच्च सन्देशं तथा तयानुग्रहीतं चूडामणिं च स्वीकृत्य, श्रीरामप्रदेशमाजगाम हनूमान् स्वसखिभिः साकम् ।

अयमत्रोल्लेखनीयांशः । एकाकी सन् समुद्रोल्लङ्घनमकार्षीत् । ततश्च मध्ये समुद्भूतं भूताकारं विघ्नसन्दोहं च निवर्तयामास । तदनु लङ्किणीं निगृह्य तयानुमतः सन् प्रविवेश लङ्कामेकाकी कपिः । सीतामन्विष्य सुमेधसा तदनन्तरं वनमशोकं बभञ्ज । समागतान् राक्षसान् ब्रह्मादिवरदर्पिष्ठान् चूर्णीचकार । रावणमासाद्य सम्भाषणं च विधाय सीतासन्देशेन साकं श्रीरामम् उपससार । यदेतत् सर्वं एकेनैव निर्व्यूढं, तदनु एकाकी सन् प्रविशेत् श्रीरामगृहम् । विशुद्धबुद्धिः विशालमतिश्चायं न तथा चकार । सर्वैः साकं श्रीराममुपजगाम । चूडामणिं च रामपदयोर्निक्षिप्य साष्टाङ्गं प्रणिपत्य न किञ्चिदूचे । तस्थावेकत्र सविनयम् । महदिदमद्भुतम् । चूडामणिप्रत्यर्पणसमयेऽपि किञ्चिदपि वचनं न निःसृतं तन्मुखात् । तद्भिन्नानामस्मादृशानामेव व्यवहारो भवेत् तादृशप्रसङ्गे परन्तु यद्यदाचरितमस्माभिः, यच्च दुःखमन्वभूत् । यद्यच्च साहसमनुष्ठितं, यथा च सर्वं स्वसामर्थ्येनैव निरूढमिति सविस्तरमुपवर्ण्य तदनन्तरं मणेः प्रत्यर्पणं स्यात् । तदपि सर्वानन्यान् निष्प्रयोजकानिति निर्भत्स्य एकाकी भूत्वा मणेः समर्पणं कुर्यात् । तदेवं हनूमता बुद्धिमता न सम्पादितम् । श्रीरामकार्यं सर्वैः सह स्वीकृतं, ततः समेषां गौरवं समानं भवेत् इति धिया स्वभिन्नानां कार्याकारणेन सङ्कोचो न भवेदित्यालोच्य च सर्वैः साकमाजगाम हनूमान् श्रीरामम् । स्वीयपराक्रमं नोज्जगाद तत्र यतो श्रीरामपराक्रमस्य पुरतः स्वकीयो यत्किञ्चिदायत इति मत्वा । अपि च सखीनां पराक्रमशून्यतां ज्ञापयेदिति । ततो वरं मौनसमाश्रयणमिति मुनितां प्राप । कथनादपि बह्वर्थं सूचयामास तद्

मौनम् । सविनयं च चूडामणिं श्रीरामपादयोः प्रणतिपूर्वकं समर्पयामास इत्येतद् पराक्रमत्वे सत्यपि महात्मना तेन दूतानां स्वभावः कथं भवेदिति सूचितम् । हनुमतः क्रियेयं सकलकपीनां मार्गदर्शिका नीतिसूचिका सम्पन्ना । न कोऽपि कपिः अस्मिन् प्रसङ्गे किमप्युवाच । रामस्तु एतत्सर्वं समाकलय्य वानरानुद्दिश्य बभाषे च-

'पौरुषे पुरुषः कोऽन्यो विद्यते हनुमत्समः ।
रावणं यस्तृणीकृत्य सिन्धुमुल्लङ्घ्य लीलया ॥'[१३]

वाक्यमेतत् हनुमति श्रीरामस्य स्नेहं कपेः तस्य पौरुषं सर्वमपि प्रकटयामास । यदि हनूमान् स्वकृतकार्यमुद्दिश्य स्वयमेव प्रशंसनं विदध्यात् तर्हि महत्वं तस्यापगतं स्यात् । अत एव तूष्णीमास महाबलः ।

म.भा.ता.निर्णये यदुक्तं -

'ज्ञाने विरागे हरिभक्तिभावे धृतिस्थितिप्राणबलेषु योगे ।
बुद्धौ च नान्यो हनुमत्समानः पुमान् कदचित् क्व च कश्चनैव ॥'[१४]

एतस्तयानुकृतिरिव दृश्यते तत्र । उत्तरत्रापि श्रीरामवाक्यं तत्पराक्रमसूचकं निर्दिष्टमस्ति । एवमन्ये च बहवो विचाराः मूले व्याख्यायां च प्रदर्शिताः । एवं दिङ्मात्रमुपदर्श्य विरम्यतेऽधुना ।

इति शम्

**सङ्केताक्षरविवरणम् -**

वा.रा.बा.का.- श्रीवाल्मीकीरामायणम्, बालकाण्डः --
सं.ररा.बा.का.- सङ्ग्रहरामायणम्, बालकाण्डः
म.पु - श्रीमत्स्यपुराणम्
अ.रा - श्रीअध्यात्मरामायणम्
उ.रा.अ - श्रीउत्तररामचरितम् अङ्कः
म.भा.ता.नि - श्रीमन्महाभारततात्पर्यनिर्णयः
प्र.व्या.सं.पु - श्रीव्यासनकेरे प्रभञ्जनाचार्यसम्पादितपुस्तके

**END NOTES :**

१. वा.रा.बा.का. अ.२, श्लो.३६
२. म.पु. अ.५२, श्लो.७०,७१
३. वा.रा.आद्यन्ते पट्टमानः श्लोकः (प्र.व्या.सं.पु.५ पु.सङ्ख्या)
४. वा.रा.बा.का.अ.१,श्लो.२
५. वा.रा.बा.का.अ.२, श्लो.१४
६. उ.रा. अ.१, श्लो१०
७. म.भा.तानि. अ.१,श्ला.३०
८. म.पु.१.३.८ तथा अ.रा.१.३.८५
९. सं.रा.बा.का. अ.१,श्लो.६
१०. म.ता.नि. अ.९, श्लो. १२२-१२७
११. सं.रा.१ बा.का.अ.१, श्लो.६
१२. सं.रा.१. बा.का.१ अ.श्लो.७
१३. सं.रा.यु.का.अ.१, श्लो.२
१४. म.भा.ता.नि. अ.२, श्लो.१५०

*****

# सर्ववेदान्तप्रत्ययाधिकरणसारः

**- भीमसेन गुत्तल्, शोधच्छात्रः,**
**पूर्णप्रज्ञसंशोधनमन्दिरम्, बेङ्गलूरु**

अवततार च भगवान् व्यासः भूमण्डले वेदान् विभक्तुं एवं तन्निर्णयाय च सूत्राणि निर्मिमाय, तत्र चाध्यायचतुष्टयम्, प्रत्यध्यायं पादचतुष्टयोपेतम् । **तृतीयाध्यायः-** साधनविचारोऽयमध्यायः । मोक्षसाधनं च भगवत्प्रसादः । तत्साधनानि च विषयवैराग्यम्, भगवद्भक्तिः, तदुपासना, तत्साक्षात्कार इति चत्वारि । तानि च न समकक्ष्याणि । किन्त्वादौ वैराग्यं साध्यम्, तेन च भक्तिः । तेन च वैराग्येण भक्तिदायेन उपासा भवेत् । न ह्यन्यत्र रागवतः भक्तिरहितस्य आदरनैरन्तर्याभ्यामुपासनं नोपपद्यते । उपासनया च अतिदीर्घकालमनुष्ठितया प्रसन्नो भगवान् आत्मानं दर्शयतीति । तदेवाह आचार्यमध्वः अनुव्याख्याने -

वैराग्यतो भक्तिदायं तेनोपासा यदा भवेत् ।
आपरोक्ष्यं भवेद् विष्णोः ।[१]

तत्र च उपासनापादे आदिममधिकरणमिदम् दरीदृश्यते । ध्यानोपासनार्थिनां किं स्वस्वशाखाध्ययनं विहितं किं वा सर्वेऽपि वेदा इति संशीत्यां शाखाभेदस्य प्रसिद्धत्वात् स्वस्वशाखाध्ययनमेव विहितम् । अन्यथा तदनुपपत्तेः इति कृत्वा प्रथमपक्ष एव ज्यायान् इति प्राप्ते सत्याह

**ओम् सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात् ओम्**[२]

न केवलं स्वशाखाध्ययनं किन्तु यथाशक्ति सर्वेऽपि वेदा ज्ञातव्या एव। यथाश्रुतार्थग्रहणे देवा इन्द्रादय अद्यापि स्वोत्तमदेवानां निकटे वेदाध्ययनं कुर्वन्त सन्ति इत्यनुपपन्नं स्यात् । अनेन इदं विज्ञायते यदिदं सर्वाधिकारिकमिदं सूत्रम् । तत्र उपासकेषु अखिलवेदज्ञानं ब्रह्मण एव नान्येषाम्। वेदानामनन्तत्वात्, अनन्ता वै वेदा इति श्रुतेः अल्पप्रज्ञादिमत्वाच्च पुंसाम् । अत यथाशक्ति यथायोग्यं सर्वेऽपि वेदा अध्येतव्या ज्ञातव्याश्च। तदेवाह

यथा शक्त्यखिलान् वेदान् विज्ञायोपासनं भवेत् ।
तत्राखिलस्य विज्ञप्तिः सम्यग्ब्रह्मण एव हि ।
तदन्येषाम् यथायोगमखिलज्ञप्तिरिष्यते ।[३]

उपासनायोग्यतायै सर्ववेदज्ञानमावश्यकम् नाल्पज्ञस्य सा न भवति खलु ।

सर्वैश्च वेदैः परमो हि देवो जिज्ञास्योऽसौ नाल्पवेदैः प्रसिध्येत् । अत मुख्यार्थ एवायं शब्दः व्याख्यातव्य एवम् अस्मिन् जन्मनि सर्ववेदज्ञानासम्भवेऽपि तादृशं जन्म कल्पनीयमिति न च वाच्यम् । इदमत्र आकूतम् ध्येयाज्ञाने ध्यानायोगात् ध्यानोपासने वेदज्ञानस्य उपयोग वक्तव्यः । किन्तु सर्वेषां सर्ववेदज्ञानमसम्भावितम् इति तदनुपयुक्तम् । अन्यथा परस्परविरोधेन वेदाप्रामाण्यापत्ते । अत यथाशक्त्या एव इत्यर्थ एव करणीयः । यथाशक्ति वेदज्ञानं भगवदुपासनोपयुक्तं न सर्ववेदज्ञानम् इत्यत्र पुराणवाक्यान्यपि पठ्यन्ते ।

‘महत्वस्य परं पारं विदित्वैव जनार्दन।
स्तोष्यतामेति तुष्टत्वमिति नास्त्येव नारद।
किन्तु निश्चलया भक्त्या ह्यात्मज्ञानानुरुपत।
य स्तोष्यति सदा भक्तस्तुष्टस्तस्य सदा हरिः ।
इत्यादिवाक्यसन्दर्भात् यथायोग्याखिलज्ञता ।’[४] इति ।

अत्र च काचन शङ्का समुन्मिषति अध्ययनं किं अध्यापनविधिप्रयुक्तम् अध्ययनविधिप्रयुक्तम् अत्र पूर्वपक्ष अध्यापनविधिप्रयुक्तमेव नियोज्य रहितत्वाद् अध्ययनविधेः । विधिकार्येषु ममेदं कार्यमिति कार्यप्रत्येता नियोज्यः । तद्रहितस्य विषयाप्रयोजकत्वात् । न ह्यत्र ज्योतिष्टोमेन स्वर्गकामो यजेत इतिवत् नियोज्य न श्रूयते । मास्तु श्रवणम् अथापि विश्वजिता यजेत अमावास्यामपराह्णे इत्यादौ वेदे अश्रुतोऽपि नियोज्य कल्प्यते । तद्वदत्रापि तत्कल्पनेन सङ्गतिरुपपादनीया इत्यपि न । निर्नियोज्यकानां बहुलम् उपलम्भात् प्रयाजादिषु । तथा च स्वस्य कार्यत्वेन यत्र विषयानुष्ठानापेक्षा तादर्थ्येन च कर्त्राद्यपेक्षा तत्रैव नियोज्य कल्पनीयः । यदा तु विध्यन्तरानुष्ठापितेनैव विषयेण स्वात्मलाभं पश्यति तदा न नियोज्य कल्पनीय। प्रकृते च अध्यापनविध्यनुष्ठापितेनैव आत्मविषयेण अध्ययनविधिसिद्धे नियोज्यानपेक्षत्वात् न तत्कल्पनमुचितम् । न च अध्यापनविधिरपि नियोज्यरहित इति वाच्यः । अष्टवर्षं ब्राह्मणमुपनयीत तमध्यापयीत इत्यात्मनेपदश्रवणाद् उभयोरपि एककर्तृकताप्रतीतेः । अध्यापनं अध्ययनेन विना न भवति इति अत स्वसिद्धये अध्यापनविधिरेव अध्ययनप्रयोजकः । किञ्च अध्ययने सति विधिज्ञानम्, ततोऽध्ययनम् इति इतरेतराश्रयत्वादपि नायं पक्ष युक्त इति शङ्कायामाह अध्ययनविधिः नित्य अध्यापनविधिः अनित्यः । ‘योऽनधीत्य द्विजो वेदान्’ इति श्रुत्या अनध्ययने प्रत्यवायश्रवणात् नित्यः । त्रीणि कर्माणि जीविका इति वचनाद् अध्यापनम् अनित्यम् ।

अध्यापनविधिप्रयुक्तमध्ययनं तदैव स्यात् यदि तन्नित्यत्वे एव किन्तु अनित्यः सः । न हि नित्यम् अनित्येन प्रयुज्यते खलु । अध्यापनविधिप्रयुक्तत्वे अध्ययनस्य एकस्य माणवकस्य अध्यापनेन चरितार्थत्वे माणवकान्तरस्य अनध्यनप्रसङ्गः । य येन उपनीत स तेन अध्यापनीय इति चेत् तर्हि उपनायके परेते अध्ययनाभाव स्यात् । यत्पुन इतरेतराश्रयत्वमुक्तं तत् प्रातःसन्ध्यामपि उपासीत इत्यादावपि समानम् । अत अध्ययनविधिं वृद्धा कथञ्चिन्माणवकं बोधयन्ति इत्यवश्यम् अङ्गीकार्यम् ।

**पादटिप्पण्यः -**

१ अव्या अ३ पा ३ श्लो १

२. ब्र.सू. अ.३, पा.३ सू. १,

३. अव्या. श्लो.२५-२६

४. अव्या. अ.३,पा.३,श्लो.३०-३२

०-०-०

# बाणात् सुबन्धुः प्राक्तनः

**कृष्णप्रसादः**
**शोधच्छात्रः**

बाणस्तावत्स्वीये गद्यकाव्ये सुबन्धुं स्तवीतीति हेतोर्बाणः सुबन्धोरर्वाचीन इति ज्ञायते । परन्त्वधुनोपलब्धस्य सुबन्धुरचितत्वेन प्रसिद्धस्य वासवदत्तागद्यस्य परिशीलने तद्गतास्वारस्यस्यानुसन्धान एतादृशं गद्यं पण्डितप्रवर इति प्रथितेन बाणेन कथंतरां स्तूयत इति शङ्कोन्मिषति । अतोऽधुनोपलब्धवासवदत्ताया रचयिता सुबन्धुरन्य एव । बाणस्तुतसुबन्धुरन्य एव इति केषाञ्चनाभिप्रायः।

परन्तु स एवायं सुबन्धुर्बाणेन स्तुत इति निर्णेतुं प्रकृतेऽस्मिन् लेखे सुबन्धोस्तथा बाणस्य च गद्यशैलीमधिकृत्य कश्चन विमर्शः क्रियते येनाधुनोपलभ्यमानवासवदत्तारचयितैव सुबन्धुः स्तुत इति निर्णेतुं शक्येत । तयोर्गद्ययोरन्तर्गतानां विमर्शोपयुक्तानां निर्णयसहकारिणां वाक्यानां समूहो विस्तृतयाऽत्र प्रादर्शि । तथाहि

**सुबन्धुः**

१. पृथुरपि गोत्रसमुत्सारणाद्विस्तारितभूमण्डलः । Vasavadatta Rajasthan Oriental Research Institute, Jodhpur p. 6, 19.

२. यस्य च.. करतलताडनभीतैरिव मुक्ताहारैः पयोधरपरिसरो मुक्तः । V. p. 6. 19.

३. विधातुरतिपीडयतः हस्तपरामर्शजनितपरिक्लेशेनेव क्षीणतरतामुपगतेन मध्यभागेन अलङ्कृताम् । V.p.9.10.

४. दशनरत्नतुलादण्डेन नयनसेतुसमुद्धतबन्धेन यौवनमन्मथवारणवरण्डकेनेव नासावंशेन परिष्कृताम् । V.p. 10.16.

५. स्तम्भनचूर्णमिवेन्द्रियाणां.. कन्यकामपश्यत्स्वप्ने । V.p. 11. 9.

६. अथ तां प्रीतिविस्फारितेन पिबन्निव चक्षुषा। V.p, 11, 1.14

७. अत्रान्तरे भगवानपि मरीचिमाली एनं वृत्तान्तमिव कथयितुं मध्यमं लोकमवातरत् । V.p. 28.7

८. नायमुपदेशकालः पच्यन्त इवाङ्गानि क्वथ्यन्त इवेन्द्रियाणि । V.p. 13. 14.

९. विराटलक्ष्म्येवानन्दितकीचकशतया । V.p. 17, 1. 3.

१०. तयोश्च मध्यमोपान्तवयसि वर्तमानयोः कथमपि दैववशात् त्रिभुवनविलोभनीयाकृतिः.. वासवदत्ता नाम (तनया) बभूव । V. p. 21.12

११. अत्रान्तरेऽभिसारिका सार्थप्रेषितानां प्रियतमान्प्रति दूतीनां द्व्यर्थाः सप्रपञ्चा विकारभङ्गुराः प्रवादा बभूवुः । V. p. 33.16

१२ नरवाहनदत्त इव प्रियङ्गुश्यामासनाथः। V. p. 14.9

१३. त्रिभुवनविजयप्रशस्तिरोमावलीकनकपत्रेण.. मेखलादाम्नापरिकलितजघनस्थलां, उन्नतपयोधरभारान्तरितमुखदर्शनाप्राप्तिखेदेनेव गुरुनितम्बपयोधरकुम्भपीडाजनितायासेनेव पयोधरकलशयोः कथं मय्येव पातो भविष्यतीति चिन्तयेव.. विधातुरतिपीडयतो हस्तपरामर्शजनितपरिक्लेशेनेव क्षीणतरतामुपगतेन मध्यभागेनालङ्कृताम् । V. p. 9.5

१४. रागसागरविद्रुमशकलेनेवाधरपल्लवेनोपशोभमानां.. गतिप्रसररोधकश्रवणकृतकोपेनेवोपान्तलोहितेन धवलतयेव जगदशेषम् । V. p. 10.9

**बाणभट्टः**

१. पृथुरिव पृथिवीपरिशोधनावधानसङ्कलितसकलमहीभृत्समुत्सारणः ।
Harcacharita p. 208. 15. (Nirnayasgar, Bombay 1946)

२. निर्दयकरतलताडनभियेव क्वापि गते हृदये । H. p. 182. 13.

३. मन्ये च मातङ्गजातिस्पर्शदोषभयादस्पृशतेयमुत्पादिता प्रजापतिनाऽन्यथा कथमियमक्लिष्टतालावण्यस्य। न हि करतलस्पर्शक्लेशितानामवयवानामीदृशी भवति कान्तिः । Kdambari, p. 11. 22. (Peterson, Bombay, 1885)

४. आयतननदीसीमान्तसेतुबन्धेन ललाटतटशशिमणिशिलातलगलितेन कान्तिसलिलस्रोतसेव द्राघीयसानासावंशेन शोभमानम् । H.p. 22.6.

५. वशीकरणमन्त्रमिव मनसः, स्वस्थावेशचूर्णमिवेन्द्रियाणाम् । H.p. 23. 18.

६. अथ सरस्वतीप्रीतिविस्फारितेन चक्षुषा प्रत्यवादीत् । H.p. 36.1.11

७. श्रान्तरेसरस्वत्यवतरणवार्तामिव कथयितुं मध्यमं लोकं अवततारांशुमालिः । H.p. 14. 3.

८. दूरातीतः खलूपदेशकालः.. पच्यन्त इव मेऽङ्गानि । उत्क्वथ्यत इव हृदयम् । K.p. 156.6.

९. क्वचिद्विराटनगरीव कीचकशतावृता । K.p. 20.11.

१०. पश्चिमे वयसि वर्तमानस्य कथमपि पितुरहमेवैको विधिवशात्सूनुरभवम् । K. p. 25.4

११. आविर्भूतमदनरसानां चान्योन्यतः सपरिहासाः सविश्रम्भाः सेर्ष्याः सोत्प्रासाः साभ्यसूयाः सविलासाः समन्मथाः सस्पृहाश्च तत्क्षणं रमणीयाः प्रसस्रुरालापाः । Kp, 84. 12

१२. नरवाहनदत्तचरितमिवान्तःसंवर्धितप्रियदर्शनराजदारिकागन्धर्वदत्तोत्कण्ठम् । K. p. 91.1

१३. प्रजापतिकरदृढनिष्पीडितमध्यभागगलितजघनशिलातलप्रतिघाताल्लावण्यजलस्रोत इव द्विधागतमूरुद्वयं दधानां.., उन्नतकुचान्तरितमुखदर्शनदुःखेनेव क्षीयमाणमध्यभागां, त्रिभुवनविजयप्रशस्तिवर्णावलीमिव लिखितां मन्मथेन रोमराजिमञ्जरीं बिभ्राणाम् । K. p. 187. 3

१४. रागसागरस्य तरङ्गाभ्यामिवोद्गताभ्यां विद्रुमलतालोहिताभ्यामधराभ्यां.. गतिप्रसर-निरोधीश्रवणकोपादिव किञ्चिदारक्तपाङ्गेन निजमुखलक्ष्मीनिवासदुग्धोदधिना लोचनयुगलेन लोचनमयमिव जीवलोकं कर्तुमुद्यताम् । K. p. 187.18

यद्यपि 'कुकवयः कोकिला इव वाचालाः, श्वान इव, कवयः शरभा इव कविश्चोरः' इति नैर्भर्येण कृतिचोरनिन्दनकृता बाणेन सुबन्धुवाक्यान्येव स्वीकृत्य किञ्चिदिव व्यत्यस्य विषयवर्णनमकारीति कृतिचौर्यं स्वस्मिन्नेवाऽपतितमिवाऽभाति । तथाऽपि नेदं कृतिचौर्यमिति कथ्यते यतः सुबन्धुर्बाणेन संस्तुतः स्मृतश्च प्रत्युताधमर्ण एव ।

**कृष्णार्पणमस्तु**

# सिद्धान्तकौमुदी-व्याख्यायां सुखबोधिन्यां वासरूपसूत्रविचारः

**शिवगुहन्. एस्**
शोधच्छात्रः
पूर्णप्रज्ञसंशोधनमन्दिरम्
बेङ्गलूरु

येनाक्षरसमाम्नायमधिगम्य महेश्वरात् ।
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः ।।
वाक्यकारं वररुचिं भाष्यकारं पतञ्जलिम् ।
पाणिनिं सूत्रकारं च प्रणतोऽस्मि मुनित्रयम् ।।

पाणिनीयव्याकरणे प्रत्ययाः बहुविधाः सन्तीति सर्वे जानन्त्येव, तत्र धातोः विधीयमानेषु प्रत्ययेषु कृत्प्रत्ययाः इति केचन प्रत्ययाः सन्ति, प्रत्ययः, परश्च इत्यनयोः सूत्रयोः प्रत्ययः परत्र एव भवतीति अवगन्तुं शक्यते। तत्र तृतीयाध्याये धातोः इत्यधिकारः भवति, तत्र प्रथमपादात् कृत्प्रत्ययाः विधीयन्ते, कर्तरि कृत् , कृत्याः, ण्वुल्तृचौ इत्येवं रूपेण। पुनश्च एते प्रत्ययाः कर्तरि, कर्मणि भावे च अर्थे भवन्ति, तथा एतेषां भाषायां प्रामुख्यं सर्वदा भवत्येव। अस्मिन् कृदन्तप्रकरणे मुख्यं परिभाषासूत्रमस्ति वाऽसरूपोऽस्त्रियामिति। अनेन सूत्रेण एव बहूनां समानार्थकप्रत्यायानां निर्वाहः क्रियते आचार्येण पाणिनिना। अस्मिन् प्रकरणे सुखबोधिनीव्याख्यायां विद्यमानाः विशेषांशाः अत्र विचार्यन्ते।

तत्र पाणिनीयव्याकरणानुसारिग्रन्थेषु मुख्यः भवति श्रीभट्टोजीदीक्षित-विरचित-वैयाकरणसिद्धान्तकौमुदी। महत्त्वपूर्णसिद्धान्तकौमुद्याः बह्व्यः व्याख्याः विद्यन्ते यथा बालमनोरमा, प्रौढमनोरमा, तत्त्वबोधिनी, शब्देन्दुशेखरः इत्याद्याः, तथैव व्याख्यान्तरम् उपलभ्यते,सुखबोधिनीनाम्नी मातृकारूपेण। अस्याः व्याख्यायाः रचयिता भवति श्रीनीलकण्ठवाजपेयी। एषा व्याख्या विशिष्टा तथा अप्रकाशिता चास्ति, अस्याः रचयिता तत्त्वबोधिनीकाराणां श्रीज्ञानेन्द्रसरस्वती आचार्याणां शिष्यः, तथा च भाष्यतत्त्वविवेकः, तत्त्वबोधिनीगूढार्थदीपिका इत्यादिव्याकरणग्रन्थांश्च व्यरचयत्।

।। वाऽसरूपोऽस्त्रियाम् ।।[1]

कृदन्तप्रकरणे अतीव मुख्यभूतं सूत्रम् विद्यते वासरूपसूत्रम्। इदञ्च सूत्रं परिभाषा सूत्रम्। परिभाषा नाम का? इति पृष्टे उत्तरं भवति अनियमे नियमकारिणी परिभाषा इति । अर्थात् व्याकरणे सूत्राणां बहुविधत्वे एकस्मिन् लक्ष्ये सञ्चारबलात् अनेकसूत्राणि प्रवर्तितुं शक्यन्ते । परम् अनेकसूत्रप्रवर्तने इष्टरूपसिद्धिः क्वचित् न लभ्यते तत्र कश्चित् नियमः आवश्यकः भवति अत एव परिभाषासूत्राणि भवन्ति तथैव व्याकरणपरिभाषाः अपि भवन्ति । अत्र एतेषां विवरणं तथा लक्ष्ये निर्वाहः साधुरूपेण कथं सञ्चारः इत्यादि विषयान् ज्ञातुं शिष्टव्याख्यानमेव[2] शरणमिति श्रीमन्नागेशभट्टैः स्वीय परिभाषेन्दुशेखरग्रन्थे सम्यक् प्रदर्शितम् । अस्य सूत्रस्य अर्थविवरणं बहुभिः आचार्यैः कथं कृतम्, अत्र सुखबोधिन्यां वैशिष्ट्यं च पश्यामः।

काशिकायां सूत्रस्य विवरणम् एवम् -अस्मिन् धात्वधिकारेऽस्मानरूपः प्रत्ययोऽपवादो वा बाधको भवति स्त्र्यधिकारविहितप्रत्ययं वर्जयित्वा। ण्वुल्तृचौ ३.१.१३३ उत्सर्गौ, इगुपधज्ञाप्रीकिरः कः ३.१.१३५ इत्यपवादः, तद्विषये ण्वुल्तृचौ ३.१.१३३ अपि भवतः। विक्षेपकः, विक्षेप्ता, विक्षिपः। असरूप इति किम्? कर्मण्यण् ३.२.१ इत्युत्सर्गः, आतोऽनुपसर्गे कः ३.२.३ इत्यपवादः, सनित्यं बाधको भवति। गोदः। कम्बलदः। न अनबन्धकृतमसारूप्यम्। अस्त्रियाम् इति किम्? स्त्रियां क्तिन् ३.३.९४ इत्युत्सर्गः, अ प्रत्ययात् ३.३.१०२ इत्यपवदः, स बाधक एव भवति। चिकीर्षा जिहीर्षा।

वैयाकरणसिद्धान्तकौमुद्याम् अर्थविवरणम् एवम्- परिभाषेयम् । अस्मिन् धात्वधिकारेऽसरूपोऽपवादप्रत्यय उत्सर्गस्य बाधको वा स्यात् स्त्र्यधिकारोक्तं विना ।

बालमनोरमायाम् अर्थविवरणम् एवम् - वाऽसरूपोऽरिउआयाम्।असरूप इति छेदः। परिभाषेयमिति। अधिकारत्वे स्वरितत्वकल्पनागौरवादिति भावः। असरूप इति लिङ्गनिर्देशः। यत्र असरूपप्रत्ययो विधास्यते तत्र वेत्युपतिष्ठते । वेत्यतः प्राक् 'बाधक' इति शेषः। असरूपो वा बाधको भवतीति यावत्। कस्य बाधको वेत्याकाङ्क्षायामुत्सर्गस्येत्यर्थाल्लभ्यते।

---

१. पाणिनीयसूत्रम् ३-१-९४

२. व्याख्यानतो विशेषापत्तिर्न हि सन्देहादलक्षणम् (परिभाषेन्दुशेखरः)

फलितमाह - अस्मिन् धात्वधिकारे इत्यादिना । स्त्रीशब्दः स्वर्यते। तदाह - स्त्र्यधिकारोक्तं विनेति । स्त्रियां क्तिन् इति वक्ष्यमाणस्त्र्यधिकारस्थमपवादं विनेत्यर्थः।

स्त्र्यधिकारस्थस्तु असरूपः प्रत्यय उत्सर्गस्य नित्यमेव बाधक इतिभावः। 'ण्वुल्तृचौ' इत्युपसर्गः।इगुपधज्ञाप्रीकिरः कः इत्यपवादः। तद्विषये ण्वुल्तृचवावपि भवतः। विक्षिपः। विक्षेपकः। विक्षेप्ता। असरूप इति किम्। 'कर्मण्यण्' इत्युत्सर्गः। 'आतोऽनुपसर्गे कः' इत्यपवादः। स तु सरूपत्वान्नित्यं बाधक एव। गोदः। कम्बलदः।नानुबन्धकृतमसारूप्यमिति वचनादनुबन्धो न सारूप्यप्रतिबन्धकः। अस्त्रियां किम्।'स्त्रियां क्तिन्' इत्युत्सर्गः । 'अ'प्रत्ययादिति प्रत्ययान्तद्विहितोऽकारप्रत्ययः, तस्याऽपवादो बाधक एव भवति। चिकीर्षा। व्यावक्रोशी व्याक्रुष्टिरित्यत्र तुकर्म व्यतिहारे णच् स्त्रियामिति णच् क्तिनो बाधको वा भवत्येव।अस्त्रियामिति निषेधस्तु नास्ति,तस्यणचः स्त्रियामित्यधिकारोक्तत्वाऽभावात्।

तत्त्वबोधिन्याम् अर्थविवरणम् एवम् - वासरूपो ऽस्त्रियाम्। अपवादेन नित्यं बाधे प्राप्ते क्वचिदुपसर्गस्यापि प्रवृत्त्यर्थमिदं सूत्रम्। अत एव अचो यत्, ऋहलोर्ण्यत् इत्याद्यपवादविषयेतव्यदादयोऽपि प्रयुज्यन्ते - भव्यम्, भवितव्यम्। कार्यं, कर्तव्यं,करणीयम्। वाच्यम्, वक्तव्यमित्यादि । **परिभाषेति । अधिकारसूत्रमिति ।** स्वीकृते तु स्त्र्यधिकारेण विच्छेदाद्वासरूपसूत्राऽप्रवृत्त्याआसित्वा भुङ्क्तेआस्यते भोक्तुमित्यादिरूपाणि न सिध्यन्ति। इह हि भोजनार्थत्वादासनस्य पूर्वकालता गम्यते, क्त्वाप्रत्ययश्च तुमर्थाधिकाराद्भावे भवति, लकारोऽपि तत्रैवेति समानविषयत्वाद् उभयोर्बाध्यबाधकभावः स्यात् । किंच वर्णात्कार इत्युत्सर्गः, सचरादिफः इत्यनेन बाध्येत । न चेष्टापत्तिः। रकारादीनि नामानि शृण्वतो मम पार्वति इत्यादिप्रयोगविरोधात्। अमुमेवार्थं मनसि निधाय हरदत्तादिभिः परिभाषेयमित्युक्तम्। एतेनशकि लिह् चेति ज्ञापकाद्वासरूपविधेरनित्यत्वेन स्त्र्यधिकारादुत्तरेषु क्तल्युट्तुमुन्खलर्थेषु वासरूपविधिर्नास्तीति सिद्धान्तः सङ्गच्छत इति दिक्। वासरूपेत्यत्राऽसरूप इति च्छेदः । अन्यथा लाघवे विशेषाऽभावेनाऽसंदेहायसरूपो वेति ब्रूयादित्याशयेनाह- **असरूप इति ।** असरूप इति किम् । कर्मण्यण् इत्युसर्गः । आतोऽनुपसर्गे कः इत्यपवादः । स तूत्सर्गस्य नित्यं बाधको यथा स्यात्। गोदः । कम्बलदः । न च कृतेऽप्यसरूपग्रहणे अण्कयोरप्यसरूपत्वान्नेष्टसिद्धिरिति वाच्यं,नाऽनुबन्धकृतमसारूप्यमिति सिद्धान्तात्।

अस्त्रियामित्यत्र स्त्रीशब्दः स्वर्यते । स्वरितेन चाधिकारावगतिरित्याशयेनाह - **स्त्र्यधिकारोक्तं विनेति ।** तेन स्त्रियां क्तिन् इत्युत्सर्गमप्रत्ययादित्यपवादो नित्यं बाधते । चिकीर्षा । जिहीर्षा । नन्वस्त्रियामित्यत्र स्त्रीशब्दस्य स्वरितत्वं प्रतिज्ञाय स्वरितेनाऽधिकारावगतिरित्यादिव्याख्यां विहाय स्त्रियामभिधेयायां वासरूपविधिर्नेति, स्त्रियामित्येवं शब्दमुच्चार्य विहिते वासरूपविधिर्नेति वा व्याख्यायतामिति चेत् । अत्राहुः- स्त्रियां वाच्यायामिति पक्षे लव्या लवितव्येति यतो विषये तव्यो न स्यात्, द्वयोरपि इह स्त्रीवाचकत्वात्।स्त्रियामिति शब्दोच्चारणपक्षे तु व्यावक्रोशी व्यावक्रुष्टिरिति कर्मव्यतिहारे णचो विषये क्तिन् स्यात् । द्वयोरपि स्त्रियामित्युच्चार्य विधानात् । ततश्च स्त्र्यधिकारोक्तं विनेति व्याख्यैव ज्यायसीति दिक् ।

सुखबोधिनीव्याख्यायाम् अर्थविवरणम् एवम्- अपवादेन नित्यं बाधे प्राप्ते तद्विषये उत्सर्गस्यापि प्रवृत्त्यर्थमिदं सूत्रम् । तेन भव्यं भवितव्यमित्यादि सिध्यति ।

नन्विदमधिकारसूत्रम् उत विधायकम् । नाऽद्यः । आसित्वा भुङ्क्ते आस्यते भोक्तुमित्याद्यसिध्यापत्तेः आसनस्य भोजनार्थत्वात् पूर्वकालत्वावगमेन क्त्वा प्रत्ययस्य भावे तुमर्थाधिकारात् प्रवृत्तत्वेऽपि न लकारस्यापि समानविषयत्वात् तत्रैव प्रवृत्त्या द्वयोरपि बाध्यत्वबाधकभावप्रसङ्गात् । स्त्र्यधिकारेण विच्छेदात् तदग्रे वासरूपविध्यप्रवृत्तेः। न द्वितीयः। तत्तद्विधिसूत्रैरेव विधिसम्भवे पुनर्विध्यनावश्यकत्वात् अपवादविषयत्वप्रवृत्तिः। संकोचत्वमात्रपरिहारार्थस्य विध्यर्थत्वाभ्युपगमस्य अन्याय्यत्वाच्चेत्यत आह- **परिभाषेयमिति ।** इत्थञ्च वर्णात्कार इत्यादावस्योपस्थानाद्रादिषु प्रत्ययप्रवृत्तावपि कारप्रवृत्त्या रकारादिसिद्धिरित्याहुः।। अत एव स्त्र्यधिकारादूर्ध्वं ल्युट् तुमुन् खलर्थेषु वासरूपविधिः शकि लिङ् चेति चकारेण अनित्यत्वज्ञापनात् न प्रवर्तत इति सिद्धान्तोऽपि सङ्गच्छते ।

अत्र च असरूप इति छेदः । अन्यथा लाघवविशेषाभावेन असन्देहाय सरूपो वेति ब्रूयात् इत्याशयेनाह- **असरूप इति ।।** तेन- सरूपः आतोऽनुपसर्गे क इति कप्रत्ययः कर्मण्यणो नित्यं बाधकः । छेद इति यथा तदुक्तम् - असरूपस्य वावचनमुत्सर्गस्य बाधकविषये अनिवृत्त्यर्थमिति । अत्र च केनासरूप इत्यपेक्षायां सर्वस्यापि कृतो येन

केनचित् सारूप्यमव्यभिचारीति सामर्थ्यात् स्वविधानवेळायां यस्मिन् विषये यः प्राप्तः स एव बुद्धिस्थत्वात् प्रतियोगीति गम्यते । स च उत्सर्ग इति तदपेक्षया भिन्नरूपोऽपवादः प्रत्यय एव असरूपो विवक्षित इत्याह अपवादप्रत्यय इति ।

यद्यप्यपवादापेक्षया असरूप उत्सर्गोऽपि शक्यते वक्तुम् न च तस्यापि विकल्पे दोषः कश्चित् तथाऽपि प्रतियोग्यपेक्षमसरूपपदं स्वभावात् अपवादप्रत्ययमेव गोचरयतीति कैयटहरदत्तादिभिरुक्तत्वात् तथोक्तमिति भावः ।

स्यादेतत् । असारूप्यमुपदेशगतं प्रयोगगतं वा । नाद्यः । गोदः कम्बळद इत्यादौ कविषये कर्मण्यण् प्रसङ्गात् । अण्-कयोरुपदेशे भिन्नरूपत्वात् ।

न द्वितीयः । अपचत् श्वः कर्तेत्यादौ लङ्लुटोर्विषये लुङ्लृटोः प्रसङ्गात् प्रयोगे भिन्नरूपत्वात् वासरूपविधिनापि निवारयितुमशक्यः । हशश्वतोर्लिङ् चेति चकारेण लादेशेषु वासरूपपरिभाषाया अप्रवृत्तेर्ज्ञापितत्वात् अन्यथा लिङ्विषये वासरूपन्यायेन लुङ् प्रवृत्तौ किं चकारेण । एवं ग्रामणीः ग्रामनाय इत्यादौ क्विबादीनां प्रयोगे रूपवत्त्वाभावात् क्विबादिविषये अणादीनामप्रवृत्तिप्रसङ्गश्चेति चेत् ।

अत्राहुः नानुबन्धकृतमसारूप्यमिति परिभाषया काणोर्भिन्नरूपत्वाभावात् उपदेश-गतासारूप्यमित्याश्रितेऽपि न कविषये अण्प्रवृत्तिरिति नित्यमेव बाधकस्सम्पद्यत इति ।

नन्वनेन प्रत्ययोत्पत्तिर्विकल्प्यते उत बाधकत्वम् ? नाद्यः अपवादाभावपक्षे केवलायाः प्रकृतेः प्रयोगात् । न च अपवादाप्रवृत्तौ उत्सर्गप्रवृत्तिः न्याय्यैवेति शङ्क्यम् । दक्षस्यापत्यम् इत्यादौ तद्धितस्थले समर्थानामिति इञि विकल्पिते अणः अप्रवृत्तिदर्शनेनात्राप्युत्सर्गाप्रवृत्तेः। तथा च क्विबादिलोपे अग्निचिदित्यादिप्रकृत्या कर्त्राद्यभिधानमिव तद्विरहेऽपि तद्विधानं स्यात् । नचेष्टापत्तिः न केवला प्रकृतिः प्रयोक्तव्या नापि केवलप्रत्यय इति नियमेन तस्याः अनभ्युपगमात् ।

किञ्च उत्पत्तिविकल्पे नहि केवलायाः प्रकृतेः प्रयोगः फलति केवलाच्च प्रकृतिः स्वार्थमप्यभिधातुम् असमर्था।। किं पुनः कर्त्रादिकमभिधास्यति । प्रकृतिप्रत्ययसमुदाये हि प्रयुज्यमाने अन्वयव्यतिरेकाभ्यां अयं प्रकृत्यर्थः अयं प्रत्ययार्थः इति व्यवस्थाप्यते । यस्याश्च प्रकृतेः प्रत्यया नोत्पद्यन्ते ततोऽर्थसामान्यस्यानवगतिर्दृष्टा । तद्धिते

त्वौत्सर्गिकाणभावेऽपि स्वादिप्रत्ययो विद्यते । इह तु न तथेति सामर्थ्यात् बहिरङ्गमपि बाधकत्वं विकल्प्यत इति सिद्धान्तः । तदाह । उत्सर्गस्य बाधको वा स्यादिति ।

न च शास्त्रयोरेव परस्परं बाध्यबाधकभावो न कार्ययोः निदानोच्छेदेन निदानिनश्छेद-दर्शनात् । अत एव प्रदीपे अनुच्छिन्ने प्रकाशस्यानुच्छेद इति वाच्यम्। शास्त्रबाधे विकल्पिते तद्द्वारा कार्यविकल्पपर्यवसानात् । साधनधर्मस्य बाधकत्वस्य सिद्ध्यै प्रत्यय उपचारात् अतश्च प्रत्ययो बोधक इत्युक्तं युक्तमेवेत्याहुः।।

ननु अस्त्रियामित्यत्र स्त्रियामभिधेयायां नेति विवक्षितम् उत स्त्रियामित्युच्चार्य यो विधीयते तत्र नेति ।

नाद्यः । लव्यं लवितव्यमिति यद्विषये तस्याप्रसङ्गात् ।

न द्वितीयः कर्मव्यतीहारेण च स्त्रियामिति णच्-प्रत्ययविषये व्यावक्रोशी व्यावक्रुष्टिरित्यादौ च क्तिन्प्रसङ्गात् । द्वयोरपि स्त्रियां क्तिन्नित्युत्सर्गमित्युच्चार्य विधानादित्यतः प्रकारान्तरमाश्रित्याह- **स्त्र्यधिकारोक्तं विनेति ।।** अस्त्रियामित्यत्र स्त्रीशब्दस्य स्वरितत्वेन अधिकारो वा गतिरिति भावः । स्त्रियां क्तिन्नित्युत्सर्गस्य अप्रत्ययादित्येतन्नित्यबाधको यथा स्यादित्येतदर्थमस्त्रियामित्युक्तम् । तेन चिकीर्षा जिहीर्षा इत्यादिसिद्धिः ।

अत्रेदं तत्वम् । प्रागुक्तानुपपत्तिपरिहाराय अस्य सूत्रस्य परिभाषात्वादेवमर्थो वर्णनीयः। अस्मिन् धात्वधिकारे यत्रासरूपोऽपवादप्रत्ययो विधीयते तत्रैवेति पदं इको गुणवृद्धीत्यादि-ष्विवोपतिष्ठते । स्त्र्यधिकारे तु नेति ततश्च उत्सर्गस्य पक्षे प्रवृत्तिः सिद्ध्यतीति संक्षेपः ।

अपरे तु असरूपः उत्सर्गस्य अपवादविषये वा भवतीति व्याख्याने न कश्चित्क्लेश इत्याहुः।।

इत्येवं मुख्यभूतस्य वासरूपसूत्रस्य विषये बहुभिः आचार्यैः अर्थविवरणं कृतं, तत्र असरूपविषये नानुबन्धकृतमसारूप्यम् इत्येषा परिभाषा अपि विद्यते । तस्याः परिभाषायाः अर्थः सारतया सुखबोधिनीकारैः प्रतिपादितम् । एवमेव सूत्रस्य अर्थविवरणं वस्तुतः कथं स्यादिति अत्रेदं तत्वम् इत्युक्त्वा निर्दिशन्ति । एतादृशसरलव्याख्या अचिरात्

प्रकाशमेष्यति चेद् विदुषां वैयाकरणबालानाम् अतीव उपकाराय भविष्यति इति अस्माकं महान् सन्तोषः ।

इत्येवं रूपेण सुखबोधिनीव्याख्यायामस्यां बहवः विषयाः सरलतया विचार्यन्ते, अस्य ग्रन्थस्य लोकार्पणम् अचिरादेव भविष्यति, एवञ्च पत्रमिदम् पूर्णप्रज्ञसंशोधनमन्दिरद्वारा प्रज्ञा शोधपत्रिकायां प्रकाश्यते इति महान् सन्तोषः यतो हि बहुविदुषां बालानां च दृष्टिपथं गमिष्यति ।

यदत्र सौष्ठवं किञ्चित् तद्गुरोरेव मे नहि।
यदत्रासौष्ठवं किञ्चित्तन्ममैव गुरोर्नहि ।।

।। इति शम् ।।

**उपयुक्तग्रन्थसूची -**

१ - वैयाकरणसिद्धान्तकौमुदी - मोतिलाल बनारसीदास- २००४
२ - सुखबोधिनी कृदन्तप्रकरणम् - Adyar D. VI. 368
३ - काशिका - चौखम्बा प्रकाशन।
४ - अष्टाध्यायी - वक्रतुण्डप्रकाशनम् , शृङ्गेरी।
५ - अष्टाध्यायी - संस्कृतभारती, बेङ्गलूरु।

000

# शब्दकौमुदीग्रन्थस्य सिद्धन्ताकौमुद्या सह तोलनम्

**जी.कार्त्तिकेयन्**
शोधच्छात्रः
पूर्णाप्रज्ञसंशोधनमन्दिरम्
बेङ्गलूरु

सिद्धान्तकौमुद्यां यथा प्रक्रियानुसारेण संज्ञापरिभाषादि प्रकरणेषु सूत्राणि, सूत्रार्थोदाहारणप्रत्युदाहारणपुरस्सरं व्याख्यातानि, तथैव अत्रापि प्रतिपाद्यन्ते । परन्तु कौमुद्यां विसर्गसन्धिप्रकरणं, स्वादिसन्धिप्रकरणमिति विभज्य तत्प्रकरणविषयाकानि सूत्राणिउपस्थापितानि, प्रकृतग्रन्थे एतत्प्रकरणद्वयोक्तसूत्राणि विसर्गसन्धिप्रकरणे एकस्मिन्नेव उपस्थाप्यन्ते । ग्रन्थकारयो: अनयोः क्वचिदेव मतभेदः दृश्यते । प्रायः उदाहरणान्यपि कौमुदीस्थान्येव अत्र आद्रियन्ते । प्रायः सूत्रावतरणमपि समानमेव भवति , क्वचिदेव सूत्रपौर्वापर्यभेदः दृश्यते । प्रायः कौमुद्यां प्रयुक्ता एव कारिका अत्रापि उल्लिख्यन्ते । उदाहरणतया युष्मदस्मच्छब्दनिरूपणावसरे

श्रीशस्त्वावतुमापीह दत्तात्ते मेऽपि शर्म सः ।
स्वामी ते मेऽपि स हरिः पातु वामपि नौ विभुः ।
सुखं वां नौ ददात्वीशः पतिर्वामपि नौ हरिः ।
सोऽव्याद्वो नः शिवं वो नो दद्यात्सेव्योऽत्र वः स नः ।। २ ।। इति ।

तथा कारकप्रकरणे गतिबुद्धिप्रत्यवासानार्थशब्दकर्माकर्मकाणामणि कर्ता स णौ (१/४/५२) इति सूत्र निरूपणावसरे शत्रूनगमयत् स्वर्गं वेदार्थं स्वानवेदायत् । आशयच्चामृतं देवान् वेदमध्यापयद्विधिम् ।। आसयत् सलिले पृथ्वीं यः स मे श्रीहरिर्गतिः । इत्याद्यः कारिकाः कौमुद्यां प्रयुक्ताःएव अत्रापि ग्रन्थे उल्लिख्यन्ते ।

क्वचित् कौमुद्यां प्रयुक्ताः अत्र त्यज्यन्ते । उदाहरणतया हल्सन्धिप्रकरणे शि तुक (८/३/३१)(कौ.सं.१३३)इति सूत्रनिरूपणावसरे 'सञ्छम्भुः' इत्यादिरूपनिरूपणावसरे कौमुद्याम् उल्लिखिता ञछौ ञचछा ञचशा ञशाविति चतुष्टयम् । रुपाणामिह तुक्छत्वचलोपानां विकल्पनात् । इति कारिका, अत्र त्यक्ता ।

क्वचित् कौमुद्याम् अनादृताः अपि अत्र उल्लिख्यन्ते । उदाहरणतया प्रकृतग्रन्थे युष्मदस्मच्छब्दरूपनिरूपणावसरे युष्मदस्मदोषष्ठीचतुर्थीद्वितीयास्थयोर्वांनावौ (८/१/१२०) इत्यादि सूत्रविषयक दलप्रयोजन निरूपणविषये अपादादौ किम् ?

'रुद्रो विश्वेश्वरो देवो युष्माकं कुलदेवता ।
स एष नाथो भगवान् युष्माकं शत्रुमर्दनः ।।

इति कारिका प्रतिपादिता । इयं कौमुद्यां न पठिता ।

तथा कारकप्रकरणे अकथितञ्च (१/४/५१) इति सूत्रनिरूपणावसरे,प्रकृतग्रन्थे सूत्रार्थं प्रतिपाद्य, एतेषामेव धातूनां विषये सूत्रमिदं प्रवर्तते इति नियामकं वार्तिकं पठ्यते दुहियाचिरुधिप्रच्छिभिक्षिचिञामुपयोगनिमित्तमपूर्वविधौ । ब्रुविशसिगुणे च यत् सचते तदकीर्तितमाचारितं कविना । नीवह्योर्हरतेश्चापि गत्यर्थानां तथैव च । द्विकर्मकेषु ग्रहणं द्रष्टव्यमिति निश्चयः ।। इति । इदमेव वार्त्तिकं भाष्यादौ पठितम् । कौमुद्यां तु एतद्वार्त्तिकं संगृह्य दुह्याच्पच्दण्ड्रुधिप्रच्छिचिब्रूशासुजिमथ्मुषाम् । कर्मयुक्स्यादकथितं तथा स्यान्नीहृकृष्वहाम् । इत्येवं श्लोकरूपेण पठ्यते ।अस्य उदाहरणानि प्रकृतग्रन्थे यो दुदोह सुगां क्षीरं ययाचे विनयं कुरून् । रुरोध दैत्यान् पातालं पप्रच्छच्छञ्च वाञ्छितम् । बलिं बिभिक्षे वसुधां वेदान् धर्मानपाचिनोत् । तानब्रूत स्वस्य भक्तान् पार्थिवान् भक्तिमन्वशात्।। द्वारकामानयद् वधून् सिन्धुं मन्दरमावहत् । पुरञ्जह्ने रुक्मिणीञ्च त्रिलोकीमजयद्रिपून् ।। सुधाममुष्णाद् दितिजानदण्डयदरीनसून् । चकर्ष कंसं विपिनं तं ब्रह्मश्रीहरिं भजे ।।इत्येवं पद्यरूपेण प्रतिपाद्यन्ते, कौमुद्यां तु न तथा ।

**शब्दकौमुदीसिद्धान्तकौमुद्योः मध्ये विद्यमानाः मतभेदाः**

ग्रन्थकारयोः अनयोः क्वचिदेव मतभेदःभवति इति पूर्वमेव उक्तम् । तत्र केचन अत्र निरुप्यन्ते । उदः स्थास्तम्भोः पूर्वस्य (८/४/६१)(कौ,सं-११८)इति सूत्रं हल्सन्धि प्रकरणे पठितम् । तत्र कौमुद्याम् उदः परयोः स्थास्तम्भोः पूर्सवर्णः स्यात् । आदेः परस्य (१/१/५४)। उत्थानम्, उत्तम्भनम् । अत्र अघोषस्य महाप्राणस्य सस्य तादृश एव थकार: । तस्य झरो झरीति पाक्षिको लोपः ।लोपाभावपक्षे तु थकारस्यैव श्रवणम् । न तु खरि च(८/४/५५) इति चर्त्वम् । चर्त्वं प्रति थकारस्यासिद्धत्वात् इत्येवमुक्त्वा उत्थानम्, उत्थ्थानम् इति एकथकारेण, द्विथकारेण च रूपद्वयं साधितम्।

प्रकृतग्रन्थे तु उदः परयोः स्था स्तम्भोः पूर्वसवर्णः स्यात् । आदेः परस्य (१/१/५४) सस्य तः। अन्ये त्वघोष महाप्राण बाह्यप्रयत्न साम्यत् थमिच्छन्ति। तत्र थद्वयं , न च पूर्वस्य खरिच (८/४/५५) इति चर्त्वं , तस्मिन् कर्त्तव्ये पूर्वसवर्णस्य असिद्धत्त्वादिति हरदत्तमिश्राः । तस्य झरो झरि.... (८/४/६५) इति वा लोपः इत्युच्यते । काशिकायामत्र उत्थाता इत्युदाहृतम् । तस्याः व्याख्यायां हरदत्तमिश्रविरचितायां पदमञ्जर्यां सकारस्य पूर्वसवर्णः तकारः । अन्ये तु बाह्यप्रयत्नसाम्यात् थकारमिच्छन्ति । तत्र थकारद्वयस्य श्रवणम् । न च पूर्वस्य चर्त्वं, तत्र कर्तव्ये अस्य पूर्वसवर्णस्य असिद्धत्वात् इति । तथा च अत्र प्रकृत ग्रन्थकाराः काशिकामतम् अवलम्ब्य सकारस्य पूर्वसवर्णत्वेन तकारमेव अङ्गीकुर्वन्ति । परन्तु कौमुदीमतं न खण्डयन्ति, पदमञ्जर्युपोद्बलकेन काशिकामतमपि निरूपयन्ति । एवञ्च प्रकृत ग्रन्थकारानुरोधेन उत्थानम्, उत्त्थानम् इति एकतकारद्वितकाराभ्यां रूपद्वयम् ।

तथा ङ्णोः कुक्टुक् शरि (८/३/२८)(कौ.सं-१३०)इति सूत्रं हल्सन्धिप्रकरणे पठितम् । प्राङ्ख्षष्ठः इति रूपनिरूपणावसरे कौमुद्यां वा- चयो द्वितीयाःशरि पौष्करसादेरिति वाच्यम्। पौष्करसादिराचार्यः प्राङ्ख्षष्ठः, प्राङ्क्षष्ठः, प्राङ्षष्ठः इति वैकल्पिक कुगागमभूतस्य ककारस्य वैकल्पिकखकारेण,खकाराभावपक्षे ककारेण, कुगागमाभावपक्षे च रूपत्रयं साधितम् । परन्तु प्रकृतग्रन्थे तु पदान्तयोः ङकार णकारयोः कुक्टुकौ आगमौ वा स्तः शरि । वा - खयो द्वितीयाः शरि पौष्करसादेरिति वाच्यम् इत्युक्त्वा पूर्वोक्तानि रूपाणि साध्यन्ते । कौमुद्यां चयो द्वितीया इति, प्रकृतग्रन्थे खयो द्वितीया इति च वार्तिकगत प्रत्याहारे भेदःदृश्यते । पदमञ्जर्यामपि खयो द्वितीयाः पौष्करसादेः.. इत्येव नादिन्याक्रोशे पुत्रस्य (८/४/४८) इति सूत्रे उक्तं दृश्यते ।भाष्यकाशिकादिषु चयो द्वितीयाः..इत्येव वार्त्तिकस्वरूपं पठितम् । पदमञ्जरीकारमतमवलम्ब्य एव प्रकृतग्रन्थे खयो द्वितीयाः..इति वार्त्तिकस्वरूपं पठ्यते ।

तथा व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः (८/२/३६)(कौ.सं-२९४) इति सूत्रम् अजन्तस्त्रीलिङ्गप्रकरणे पठितम् । तत्र निट्सु इति रूपनिरूपणावसरे कौमुद्यां सुपि 'डः सि धुट्' (८/३/२९) इति पक्षे धुट्, चर्त्वं, तस्य असिद्धत्वात् 'चयो द्वितीया इति टतयोः टथौ न। न पदान्ताट्टोः.. (८/४/४२)इति ष्टुत्वं न । निट्त्सु,निट्सु इत्युक्तम् । प्रकृतग्रन्थे तु डः सि धुट् (८/३/२९), वा चर्त्वम् । खयो द्वितीया इति

पक्षे टतयोष्टथौ । न मुने इति योगविभागेन चर्त्वस्यासिद्धत्वन्नेति हरदत्तमिश्राः । न पदन्तादिति ष्टुत्वन्न । निट्त्सु, निट्थ्सु इति प्रतिपादितम् । अत्र धुट्त्वपक्षे पदमञ्जर्युपोद्बलकेन चर्त्त्वस्य असिद्धत्वाभावं निरूप्य वा- 'खयो द्वितीया..' इति चर्त्वेन निष्पन्नस्य धुटः तकारस्य थकारेण निट्थ्सु इति रूपं साध्यते । कौमुद्यान्तु चर्त्वस्य असिद्धत्वम् आश्रित्य थत्व अप्रवृत्या निट्त्सु इत्येव रूपं साधितं दृश्यते ।

अस्मिन्नेव सूत्रे कौमुद्यां केचित्तु व्रश्चादि सूत्रे ' दादे र्धातोः..' (८/२/३२) इति सूत्रात्,धातोः इत्यनुवर्तयन्ति, तन्मते जश्त्वेन जकारे, निज्भ्यां, निज्भिः ।' चोः कुः' (८/२/३०) इति कुत्वन्तु न भवति, जश्त्वस्य असिद्धत्वात् । जश्त्वं,श्चुत्वं, चर्त्वं, निच्शु, निच्छु इति मतान्तरमपि निरूप्यते । अस्य मतस्य खण्डनं न क्रियते । परन्तु प्रकृतग्रन्थे केचित्तु व्रश्चेत्यत्र दादेर्धातोरित्यतो धातोरित्यनुकर्षणादसति षत्वे जश्त्वञ्जः निज्भ्यां । निच् सु जश्त्वस्यासिद्धत्वात् चोः कुः (८/२/३०) इति कुत्वन्नेत्याहुः । नात्राप्तोक्तिरस्ति इति मतान्तरं निरूप्य भाष्यादिप्रामाण्याभावात् तस्य खण्डनमपि क्रियते ।

तथा, औतोम्शसोः (६/१/९३) (कौ.सं-२८५)इति सूत्रम् अजन्तपुँल्लिङ्गप्रकरणे पठितम् । अत्र कौमुद्यां गोशब्दरूपाणि निरूप्य ओकारान्ताद्विहितं सर्वनामस्थानम् इति व्याख्यानान्नेह - हे भानो, हे भानवः ।उः शम्भुः स्मृतः येन स स्मृतौः, स्मृतावौ, स्मृतावः । स्मृतां, स्मृतावौ, स्मृताः इति स्मृतो शब्दः व्युत्पादितः । प्रकृतग्रन्थे तु केचित्तु उःशम्भुःस्मृतः येन सःस्मृतौः, स्मृतावौ, स्मृतावः । स्मृतां, स्मृतावौ, स्मृताः इत्यादि । ओकारान्ताद्विहितम् इति व्याख्यानात् हे भानो हे भानवः इत्याहुः । तत्तु आकरेषु न दृश्यते इति कौमुदीकारप्रतिपादितः स्मृतो शब्दः भाष्यप्रामाण्याभावात् प्रकृतग्रन्थकारैः निराक्रियते ।

अस्माभिःसर्वैर्ज्ञातमेव 'यत् कौमुद्यां यानि वार्त्तिकस्वरूपाणि पठितानि तानि सर्वाणि प्रायः अर्थतः संगृह्य प्रतिपादितानि' इति । प्रायः तथैव प्रकृतग्रन्थेऽपि क्रियते ।क्वचिच्च भाष्यकाशिकादौ यथा पठितं, तथाऽपि उपस्थाप्यते । प्रायः कौमुद्यां यया आनुपूर्व्या वार्त्तिकस्वरूपाणि पठितानि तयैव आनुपूर्व्याअत्रापि पठ्चन्ते । तथापि क्वचित् वार्त्तिकस्वरूपेषु आनुपूर्व्यां भेदो दृश्यते । उदाहरणतया कौमुद्यां हल्सन्धिप्रकरणे शश्छोऽटि (८/४/६३) । इति सूत्रे वा - छत्वममीति वाच्यम् इति वार्त्तिकस्वरूपं पठित्वा

तच्छ्लोकेन, तच्छ्लोकेन इत्यादि साधितम् । प्रकृतग्रन्थे तु वा-शश्छोऽमीति च वक्तव्यम्इति वार्त्तिकस्वरूपं पठित्वा तच्छ्लोकेन, तच्छ्म्श्रुणा इत्यादि साध्यते । तथा विसर्गसन्धिप्रकरणे  इदुदुपधस्य चाप्रत्ययस्य । (८/३/४१) इति सूत्रेकौमुद्यां वा - एकादेशशास्त्रनिमित्तकस्य न षत्वम् । कस्कादिषु भ्रातुष्पुत्रशब्दस्य पाठात् । इति वार्त्तिकस्वरूपं पठितम् । अत्र प्रकृतग्रन्थे तु वा - कस्कादिषु भ्रातुष्पुत्रशब्द-पाठाल्लिङ्गादेकादेशशास्त्रनिमित्तकादुतः परस्य न षः इति वार्त्तिकस्वरूपं पठ्यते । तथा विसर्गसन्धिप्रकरणे रोऽसुपि (कौ.सं-१७२) (८/२/६९) इति सूत्रे कौमुद्यां वा - अहरादीनां पत्यादिषु वा रेफः इति वार्त्तिकस्वरूपं पठितम् । प्रकृतग्रन्थे तु वा - अहरादीनां पत्यादिषु वा रेफविसर्गापवादः इति वार्त्तिकस्वरूपं पठितम् ।

क्वचित् कौमुद्यामपठितान्यपि वार्तिकानि अत्र पठ्यन्ते । उदाहरणतया स्त्रीप्रत्ययप्रकरणे बह्वादिभ्यश्च । (४/१/४५) इति सूत्रं पठितम् । अत्र प्रकृतग्रन्थे वा-इतः प्राण्यङ्गादिति वार्तिकं पठित्वाअङ्गुली, अङ्गुलिः इत्युदाहरणे पठिते । इदं वार्तिकं कौमुद्यां न पठितम् ।

बहुषु स्थलेषु प्रकृतग्रन्थकौमुदीग्रन्थयोः सूत्रपौर्वापर्यभेदोऽपि भवति । क्वचित् कौमुद्यां समाने एव प्रकरणे उत्तरत्र पठितानि प्रकृतग्रन्थे पूर्वत्र पठ्यन्ते , पूर्वत्र पठितानि च उत्तरत्र पठ्यन्ते । उदाहरणतया स्त्रीप्रत्ययप्रकरणे सूर्यतिष्यागस्त्यमत्स्यानां य उपधायाः (६/४/१४९)इति सूत्रंकौमुद्यां षिद्गौरादिभ्यश्च (४/१/४२)(कौ.सं-४९८) इति सूत्रादनन्तरं पठितम् । प्रकृतग्रन्थे तु पूर्वमेव पुंयोगादाख्यायाम्  (४/१/४८) इति सूत्रादनन्तरं पठ्यते । हलन्तपुंलिङ्गप्रकरणे न संयोगाद्वमन्तात्  (६/४/१२) इति सूत्रं कौमुद्यां हलि च (८/२/७७) (कौ.स-३५४) इति सूत्रादनन्तरं यज्वन् शब्दरूप निरूपणावसरे पठितम् । प्रकृत ग्रन्थे तु तस्मिन्नेव प्रकरणे उत्तरत्र अहन्  (८/२/६८) इति सूत्रादनन्तरं पठ्यते । एवमेव अत्वसन्तस्य चाधातोः (६/४/१४)इतिसूत्रं हलन्तपुंलिङ्ग प्रकरणे नाञ्चेः पूजायाम् (६/४/३०) (कौ.सं-४२५) इत्यस्मादानन्तरं पठितम् । अत्र तु मन्त्रे श्वेतवहोक्थशस्पुरोडाशो ण्विन्  (३/२/७१) इति सूत्रादनन्तरं पठ्यते ।

क्वचित्तु कौमुद्यामेकस्मिन् प्रकरणे पठितानि प्रकृतग्रन्थे अन्यस्मिन् प्रकरणे पठ्यन्ते । कौमुद्यां स्त्रियाञ्च  (७/१/९६) (कौ.स-३०५) ऋन्नेभ्यो ङीप्  (४/१/५) (कौ.स-

३०६) इति सूत्रे अजन्तस्त्रीलिङ्गप्रकरणे पठिते । प्रकृतग्रन्थे तुअजन्तपुँल्लिङ्गप्रकरणे क्रोष्टु शब्दनिरूपणानन्तरं पठिते । तथा नेयङुवङ्स्थानावस्त्री (१/४/४) ङिति ह्रस्वश्च (१/४/६)वाँमि (१/४/५) इदुद्भ्याम् (७/३/११७) इति चत्वारि सूत्राणि कौमुद्याम् अजन्तस्त्रीलिङ्गप्रकरणे पठितानि ।प्रकृतग्रन्थेतुअजन्तपुँल्लिङ्गप्रकरणे श्रियमिच्छन् श्रीरिवाचरन् वा इति विग्रहे श्रीः इति पुँल्लिङ्गशब्दरूपनिरूपणावसरे पठितानि । तथा मन्त्रे श्वेतवहोक्थशस्पुरोडाशो ण्विन् (३/२/७१) इति सूत्रं कौमुद्यां वैदिकप्रकरणे जनसनखनक्रमगमो विट् (३/२/३७) (कौ.सं-३४१३) इति सूत्रादनन्तरं पठितम् । प्रकृतग्रन्थे तु हलन्तपुंलिङ्ग प्रकरणे सप्रसारणाच्च (६/१/१०८) इति सूत्रादानतरं पठितम् । अवयाः श्वेतवाः पुरोडाश्च (८/२/६७) इति सूत्रं कौमुद्यां वैदिकप्रकरणे अवे यजः (३/२/७२) (कौ.सं-३४१६) इत्यस्मादनन्तरं पठितम् । प्रकृतग्रन्थे तु हलन्तपुंलिङ्ग प्रकरणे अत्वसन्तस्य चाधातोः (६/४/१४) इति सूत्रादनतरं पठ्यते ।

कौमुद्यां प्रतिपादितानि कानिचन सूत्राणि अत्र न दृश्यन्ते । प्रायः अधिकारसूत्राणि यानि कौमुद्यां पठितानि तानि अत्र न उल्लिख्यन्ते । उदाहरणतया स्त्रीप्रत्ययप्रकरणे स्त्रियाम् (४/१/३) इति, कारकप्रकरणे कारके (१/४/२३) अनभिहिते(२/३/१) कर्मप्रवचनीयाः (१/४/८६)इत्यादीनि, अव्ययीभावसमासप्रकरणे प्राक्कडारात् समासः (२/१/३), अव्ययीभावः (२/४/१८)इत्येते , तत्पुरुषसमासप्रकरणेतत्पुरुषः (२/१/२२) इत्येवं प्रतिप्रकरणं पठितानि अधिकारसूत्राणि प्रकृतग्रन्थे न पठ्यन्ते । तथा च अव्ययप्रकरणपर्यन्तम् अल्पान्येव सूत्राणि न दृश्यन्ते । तदन्तरं प्रतिप्रकरणं प्रायः पञ्चषाणि सूत्राणि कौमुद्यां पठितानि अत्र न दृश्यन्ते, उदाहरणतया अव्ययीभावप्रकरणे समर्थः पदविधिः (२/१/१), प्राक्कडारात् समासः (२/१/३), अव्ययीभावः (२/१/५), सुप्प्रतिना मात्रार्थे (२/१/९), अक्षशलाकासंख्याः परिणा (२/१/१०), विभाषा (२/१/११), अनुर्यत्समया (२/१/१५), अन्यपदार्थे च संज्ञयाम् (२/१/२१), समासान्ताः (५/४/६८) इति नव सूत्राणि कौमुद्यां पठितानि अत्र न दृश्यन्ते ।

क्वचित् कौमुद्यां प्रतिपादितमपि सूत्रं भाष्ये प्रत्याख्यातत्त्वात्, प्रकृतग्रन्थे प्रत्याख्यायते । अजन्तस्त्रीलिङ्गप्रकरणे कौमुद्यां विभाषा दिक्समासे बहुव्रीहौ (७/३/११५) (कौ.स-२९२) इत्यस्मादनन्तरं विभाषाद्वितीयातृतीयाभ्याम् (७/३/११५) इति सूत्रं प्रतिपाद्य

इदं सूत्रं त्यक्तुं शक्यं, तीयस्य ङित्सूपसंख्यानात् इति पठितम् । प्रकृतग्रन्थे तु भाष्ये हि उपसङ्ख्यानस्य व्यापकत्वात् विभाषाद्वितीयातृतीयाभ्याम् (७/३/११५) इत्येकं प्रत्याख्यातम् इति पठित्वा सूत्रमेतत् न प्रतिपाद्यते ।

एवञ्च ग्रन्थयोः अनयोः तोलनपूर्वकअध्ययनेन शास्त्रबालैरस्माभिःविवेचनात्मकं विशेषज्ञानंप्राप्तुं शक्यते इत्यत्र निस्ति संशयः इति शम् ।

## Bibliography/ सहायकग्रन्थसूची


१ श्रीमद्विद्वद्वरहरदत्तमिश्रविरचिता काशिका व्याख्या ।
सम्पादकौ - डां जयशंकर लाल त्रिपाठी, डां सुधाकर मालवीयः ।

२ श्रीमद्विद्वद्वरवामनजयादित्यविरचिता पाणिनीयसूत्रवृत्तिः काशिका ।
सटिप्पनप्रकाशहिन्दीव्याख्योपेता
व्याख्याकारः - श्रीनारायणमिश्रः
प्रकाशकः - चौखम्बा प्राकाशन् (२०११)

३ श्रीमद्भट्टोजिदीक्षितविरचिता वैय्याकरणसिद्धान्तकौमुदी बालमनोरमातत्वबोधिनीसहिता
संशोधकौ -गिरिधरशर्मा चतुर्वेदी, परमेश्वरानन्द शर्मा विद्याभास्करः
प्रकाशकः- मोतीलाल् बनारसिदास् (२००४)


***

# प्रत्यक्षज्ञानविषये काण्टन्यायमतयोः समीक्षा

- श्रीनिधिप्याटि
शोधकः, षड्दर्शनकोशः,
पूर्णप्रज्ञसंशोधनमन्दिरम्, बेङ्गलूरु

काण्टः स्वकाले लब्धप्रचाराणां ज्ञानविकास-प्रत्यक्षमात्रप्रामाण्यवाद-संशयालुतावाद-रहस्यवादादीनां मध्ये यथासम्भवं समन्वयं सम्पादयितुं प्रायतत । अव्यभिचारि अत्यावश्यकं च ज्ञानं यथार्थं ज्ञानमिति काण्टाभिमतं ज्ञानस्य लक्षणम् । तादृशं ज्ञानमस्तीति तार्किकाणां (Rationalist) मतम् अङ्गीकुर्वन् काण्टः तत् केवलं भौतिकशास्त्र-गणितशास्त्रीयप्रतिपादनेषु सीमितमित्यभिप्रैति । विश्वतत्वनिर्णये, मततत्वमीमांसायां , मनस्तत्वशास्त्रे च न तर्कस्य पर्वेशः । तथा च प्रत्यक्षज्ञानविषये किं वा अभिप्रैति काण्टः, किं वा तार्किकाणां मतमिति विवेचनमेव अत्र क्रियते ।

अत्र विटिगिनस्टीनोपज्ञं वाक्यंस्मर्यते ''यतःवयं सकलमपि प्रत्यक्षं व्यमोहकमिति नावगच्छेम अतः प्रत्यक्षस्य विषये केचनैवंशाः अस्माकं व्यामोहकाः इति चिन्तयेम'' । अनेन बहवः प्रत्यक्षप्रमाणविचारमनुरुन्ध्य बहुधा विवदन्ते इति ज्ञातुं शक्नुमः । अत्र मया काण्टेन प्रतिपादिदें 'प्रत्यक्षज्ञानाय इन्द्रियसमूह बुद्ध्योर्मिथः सहकारकरक्रिया आवश्यकीति' नियमे न्यायमतसंवादं प्रदर्श्य, तत्र युक्त्यनुसन्धानं करोमि । भारतीयदर्शनेष्वपि प्रत्यक्षप्रमाणविषये नैके वादाः सन्ति । तत्रापि न्यायबौद्धमतयोः विषयेऽस्मिन् वैमत्यं वर्तते।

**बौद्धमते प्रत्यक्षम्**

सांव्यावहारिकं प्रमाणज्ञानं द्विविधम
मानं द्विविधं विषयं द्वैविध्यात् शक्त्यशक्तिनः ।
अर्थक्रियायां केशादिर्नार्थोऽनर्थाधिमोक्षतः । [1]

मेयस्य द्वैविध्यात् मानं द्विविधम् । लोके तु प्रत्यक्षानुमानवेद्यादपरं प्रमेयं नास्ति। शब्दादीनामर्थप्रतिबन्ध एव नास्ति । यत्तु प्रमेयाव्यभिचारि तत्प्रमाणम् । मेयाभावे

प्रमेयाव्यभिचारित्वं कथं स्यात् ? स्वलक्षणं सामान्यलक्षणञ्चेति द्विविधं वस्तुतत्त्वम् । अत्र स्वलक्षण विषयं प्रत्यक्षम् । सामान्यलक्षणविषयमनुमानमिति प्रतिपाद्यते । यच्चान्यसदृशं सत् उपलभ्यते तत्सामान्यं सर्वव्यक्तिसाधारणत्वात्, यदसदृशं सत् उपलभ्यते तत्स्वलक्षणं सर्वतो व्यावृत्तत्वात् । अथ यदि कल्प्यमानमन्यसदृशं तत्सामान्यम् अथासदृशं तत्स्वलक्षणमेव । किञ्च यदा वस्तुतत्त्वं साक्षाज्ज्ञानजननं प्रति शक्तत्वेन प्रतीयते तदाऽसौ स्वेन रूपेण लक्ष्यमाणत्वात् स्वलक्षणम् । यदा तु पारम्पर्येण ज्ञानजनने शक्तं भवति तदा सामान्यरूपेणेति सामान्यलक्षणम् । भ्रमविषयस्यशाब्दादुपलब्धस्य च नार्थनिश्चायकशक्तिः साक्षाद्वा पारम्पर्येण विद्यत इति स न प्रमेयः । उक्तं च

सदृशासदृशत्वाच्च विषयाविषयतत्वतः । शब्दस्यन्यनिमित्तानां भावे धीसदसत्त्वतः । शब्दस्य यः विषयः स सामान्यलक्षणम् । यस्त्वविषङ्कः स स्व लक्षणम् । अयमर्थः शब्दस्यैव विषयः सामान्यम् । न तु यो यो शब्दस्य तु विषयः स सामान्यमेव । एवमविषयोऽपि न स्वलक्षणमेव । अपि तु अवियय एव स्वलक्षणम् । यतः शब्दविषयोऽपि कश्चिदर्थः । शब्दाविषयोऽपि कश्चिदनर्थः । एवं विषयादन्येषां निमित्तानां भावे गुणसङ्ख्यासङ्केतादिविषया धीः यत्र प्रवर्तते स सामान्यलक्षणमेव । यत्र तु विषयव्यतिरिक्तनिमित्ताभावे तु बुद्धिर्भवति सः स्वलक्षणमेव । यत् परमार्थसत् तत् स्वलक्षणमेव । यच्च संवृतसत् तत् सामान्यलक्षणम् । अर्थक्रियासमर्थमेव परमार्थसत् । असमर्थं च सांवृतम् । एवं यदसदृशं शब्दाविषयः अन्यनिमित्तभावेऽपि तज्ज्ञानाभावश्च तत् परमार्थसत् स्वलक्षणम् । यच्च सदृशं शब्दविषयः अन्यनिमित्तभावेपि बुद्धिविषयः तत् संवृत्तिसत्यं सामान्यलक्षणम् एवं प्रमेयद्वयमनुसृतयं प्रमाणमपि द्विविधमेव भवति ।

प्रत्यक्षपरोक्षाभ्यां मेयस्यान्यस्य सम्भवः ।
तस्मात् प्रमेयद्वित्वेन प्रमाणद्वित्वमिष्यते ।[२]

सम्यग्ज्ञानं द्विविधं प्रत्यक्षमनुमानं चेति ।

स्वलक्षणे च प्रत्यक्षमविकल्पतया विना ।
विकल्पेन न सामान्यग्रहस्तस्मिंस्ततोऽनुमा ।[३]

प्रत्यक्षं स्वविषय नियतमर्थं दर्शयति । अनुमानं तु लिङ्गसम्बद्धं नियतमर्थं दर्शयति

नियतार्थप्रदर्शकत्वात् द्वेऽपि प्रमाणे । यथा प्रत्यक्षमनुमानं वा स्वोपदर्शितार्थप्रापकं न तथा संशयादिकं, नियतार्थस्यैवाभावात् । 'इह कूपे जलम्' इति ज्ञानं न प्रत्यक्षं तत्र जलस्य परोक्षत्वात् ,नानुमानं लिङ्गाभावात् न संशयः कोटिद्वयाभावात् न विपर्ययः विपरीतार्थाभावात्, एतदपि प्रमाणान्तरं किल ? इत्यत्राऽह नेदं प्रमाणमेव नियतार्थाप्रदर्शकत्वात् । यद्यपीदं संशयलक्षणरहितं तथाऽपि संशयविकल्पं जनयत् संशयजातीयमेव । इह कूपे जलं स्यात् कदाचित् इत्यर्थकत्वान्न प्रमाणम् । यत्र तु इह कूपे जलम् इति ज्ञानानन्तरं प्रवृत्तेन कदाचिज्जलं प्राप्यते तत्र जलप्रापकं ज्ञानान्तरमेवाङ्गीक्रियते ।

**प्रत्यक्षलक्षणम् प्रत्यक्षम्**

कल्पनापोढं प्रत्यक्षेणैव सिद्ध्यति प्रत्यात्मवेद्याः सर्वेषां विकल्पो नामसंश्रयः ।। प्रत्यक्षं कल्पनापोढमभ्रान्तम् इति प्रत्यक्षलक्षणं बौद्धैरङ्गीकृतम् । कल्पनारहितं भ्रान्तिरहितं ज्ञानमेव प्रत्यक्षमित्यर्थः । विशेषणादिसम्बद्धवस्तुविषयकप्रतीतिरेव कल्पना उच्यते। एवं पूर्वोक्तकल्पनया अपोढं-रहितं(विकल्परहितं) अभ्रान्तञ्च यज्ज्ञानं तत् प्रत्यक्षम् ।कल्पनापोढमित्यनेन सविकल्पकं न प्रत्यक्षमिति,अभ्रान्तमित्यनेन द्विचन्द्रादिपेत्ययः न प्रत्यक्षमिति विप्रतिपततिनिरासार्थमेव लक्षणद्वयम् । अभिलापसंसर्गयोग्यपेतिभासप्रतीतिः कल्पना । अभिलप्यतेऽनेनेति अभिलापः शब्दः । यस्यां प्रतीतौ भासमानःअभिधेयाकारःशब्दसंसर्गयोग्यः सा प्रतीतेः कल्पना । प्रत्यक्षं कल्पनापोढमिति कथं ज्ञायते ? भ्रान्तत्वन्तु प्रत्यक्षेणान्यथादर्शनात् ज्ञायते । अर्थक्रिययाऽभ्रान्तततत्वमपि ।

१. न तावदनुमानं तस्य प्रत्यक्षपूर्वकत्वात् । प्रत्यक्षमेव वक्तव्यम् । प्रत्यक्षं तावत् नीलो घटः इत्यद्याकारमेव सर्वानुभवसिद्धम् । तच्च नीलादिविकल्पसहितमेवेति सविकल्पकं कथं वा प्रत्यक्षस्य निर्विकल्पकत्वे प्रमाणं स्यात् ?

२. किञ्चेन्द्रियार्थसन्निकर्षे प्रथममालोनात्मकं निर्विकल्पमेवार्थज्ञानमुपजायत इत्यङ्गीकारेपि द्वितियादिक्षणे स्मरणादिसामग्रीवशात् सविकल्पकज्ञानोत्पत्तिरिति च। तदपि इन्द्रियव्यापारकालीनमेवेति प्रत्यक्षमेव भवति । तत्र कल्पनापोढत्वं नास्तीत्यव्याप्तरेव प्रत्यक्षलक्षणे ।

निर्विकल्पकप्रत्यक्षे स्वसंवेदनप्रत्यक्षमेव प्रमाणम् । निर्विकल्पक प्रत्यक्षस्य निर्विकल्पकत्वं तेनैव प्रत्यक्षेणानुभूयत इत्यर्थः । यदुक्तं द्वितीयक्षणोत्पन्नं नीलो घटः इत्यादिकं तत्तु विकल्पजन्यमेव । विकल्पः खलु ज्ञाने नामादिकं विषयीकरोति । स च विकल्पः मानस व्यापारः । एवं निर्विकल्पके चक्षुर्जन्यत्वं नामाद्यविषकत्वं चास्ति सविकल्पके च विकल्पजन्यत्वं नामाद्याश्रयत्वं चेति विरुद्धधर्माध्यासेन तयोर्भेदः अस्त्येव । यदप्युक्तं प्रत्यक्षं सर्वदा नामादिविषयक मेवोपजायत इति तन्नेत्याह -

संहृत्य सर्वतश्चिन्तां स्तिमितेनान्तरात्मना ।
स्थितोऽपि चक्षुषा रूपमीक्षते साक्षजा मतिः ।। [५]

संहृतविकल्पावस्थायां चक्षुषा रूपज्ञानं यदुत्पद्यते तदेव निर्विकल्पकं प्रत्यक्षम् एतदनन्तरं हि विकल्पोऽनुवर्तते । तत्र च पूर्वसंस्कार एव कारणम् । न स र्विकल्पकविषयः स्वलक्षणम् तदाह-

पुनर्विकल्पयन् किञ्चिदासीन्मे कल्पनेदृशी
वेत्ति चेति न पूर्वोक्तावस्थायामिन्द्रियाद् गतौ ।।[६]

तथा च बौद्धाः विशेषतः दिङ्नाग-धर्मकीर्तिप्रभृतयः प्रत्यक्षे नामादीप्रतिभासं नाङ्गीकुर्वन्ति । तत्र च एषा युक्तिः । इन्द्रियवस्तुनोः सन्निकर्षेण खलु प्रत्यक्षम्। नहि वस्तु नामादिविशिष्टं दृश्यते । तथा च वस्तुसन्निकर्षे सति आकारः,वर्ण एव भासते , न तु तस्य नामादिकंम् । तद्यथा चक्षुरिन्द्रियेण रूपज्ञानमेव जायते न तु रसादिज्ञानं, सन्निकर्षाभावात् । तथा च लोके आम्रफलस्य प्रत्यक्षमिति उच्यते, वस्तुतः तन्न प्रत्यक्षं, इन्द्रियार्थसन्निकर्षेण तु तद्वस्तुनः,तदाकारस्यैव ज्ञानं भवति । तेन च तद्वस्तु एतदाकारवर्णविशिष्टमित्येव ज्ञानं भवति , न तु आम्रफलमिति । न हि शब्दाद्या वस्तुशरीरसम्बद्धाः। ततश्च द्वितीयादिक्षणे मनसः व्यापारेण पूर्वसंस्कारेण आम्रफलमिति ज्ञानमुदेति । तत्तु इन्द्रियाऽजन्यमिति न प्रत्यक्षमिति मतसारः ।

नैयायिकास्तु नमाद्युपेतं ज्ञानं न प्रत्यक्षमिति मतं नाङ्गीकुर्वन्ति । इन्द्रियार्थसन्निकर्षे सति ज्ञानमुत्पद्यते नैयायिकैरङ्गीक्रियते । परन्तु आदौ निर्विकल्पं ज्ञानं,ततः द्वितीयक्षणे सविकल्पज्ञानमुत्पद्यते इत्यभिप्रयन्ति । बौद्धैरिव सविकल्पस्य प्रत्यक्षत्वं न निराकुर्वन्ति ।

तथा च प्रत्यक्षे सोपानद्वयं निर्विकल्पमादिमं, सविकल्पंद्वितीयम् । निर्विकल्पं सविल्पप्रत्यक्षे कारणं भवति । नहि निर्विकल्पं सविकल्पस्य प्रत्यक्षत्वं घातयति । केवलं निर्विकल्पं प्रत्यक्षे निश्चयात्मकत्वं न प्रभवतीति तेषां वादः । बौद्धाः पुनः प्रत्यक्षजनन-क्रमवादममनङ्गीकुर्वाणाः निर्विकल्पके विद्यमानमेव प्रत्यक्षत्वं सविकल्पके भासते, न तु वस्तुतः तत्र प्रत्यक्षत्वं वर्तत इत्यभिप्रयन्ति । तस्य उत्तररूपेण नव्यन्याग्रणीः उदयनयाचार्यः वस्तुतः सविकल्पके एव विद्यमानं प्रत्यक्षत्वं निर्विकल्पके भासते इत्यभिप्रैति । तथा च बौद्धनैयायिकयोः विवादस्तु वस्तुतः निर्विकल्पस्यास्तित्वविषये नास्ति, अपि च निर्विकल्पकग्रहे ज्ञानत्वस्यास्तित्वविषये एव विवाद इति पर्यवस्यति ।

बौद्धनैयायिकावुभावपि प्रत्यक्षस्य ज्ञानत्वमङ्गीकुर्वन्ति । निर्विकल्पस्य ज्ञानत्वनिराकरणे नैयायिकानां न कापि महती हानिः, यतोहि तेषां निर्विकल्पं सविकल्पप्रत्यक्षविषये सोपानमेव । अथ च सन्निकर्षसमानन्तरमेव निर्विकल्पेन न कोपि वास्तविकव्यत्यासः भवति , अपि च स्मरणादिसहकारवशाद्वा जायमानं प्रत्यक्षमेव ज्ञानजनकं भवति । वस्तुतः तदेव प्रत्यक्षम् । परन्तु बौद्धैः पुनः निर्विकल्पस्य ज्ञानत्वं साधनयीमेव, यतो हि तेषां मते निर्विकल्पानन्तरं प्रत्यक्षव्यापार एव समाप्तो भवति । बौद्धैस्तु प्रत्यक्षपूर्वावस्थातः कश्चन व्यत्यासः अत्र प्रदर्शनीय एव । नैयायिकानां मते तु इदं फलमित्यादिरूपेण वस्तुज्ञानमेव फलम् । बौद्धैरपि स्वलक्षणमेव निर्विकल्पस्य विषयमुच्यते । तत्र निर्विकल्पकप्रत्यक्षे स्वसंवेदनप्रत्यक्षमेव प्रमाणम् । निर्विकल्पकप्रत्यक्षस्य निर्विकल्पकत्वं तेनैव प्रत्यक्षेणानुभूयते इत्यभिप्रयन्ति । तथाच इन्द्रियग्रहणस्य स्वसंवेदनमेव फलमिति तेषामभिप्रायः । परन्तु प्रत्यक्षस्य फलविषये दत्तमुत्तरं समाधानकरं नास्ति । किं वा फलमित्यस्योत्तं स्वलक्षणस्य स्वसंवेदनमिति दत्तं, परन्तु केन प्रकारेण स्वलक्षणं ग्रह्यते इति समस्या अवशिष्यते एव । बौद्धास्तु निर्विकल्पके कमपि व्यावर्तकं वा प्रकारं वा नाङ्गीकुर्वन्ति । अलं नाम्ना, इदम् एतदित्यादिशब्दैरपि वयं प्रकारता न सम्पादयितुं शक्यते । तथा च वस्तुसाक्षात्कारः फलमिति न ते वक्तुं शक्नुयुः । यतो हि येन केनापि प्रकारेण वस्तुनः ग्रहे ,तत्प्रत्यक्षं नास्ति तेषां मते, यदि केनापि प्रकारेण ग्रहःनास्ति, तर्हि तस्य साक्षात्कारत्वमेव न घटते । प्रत्यक्षलक्षणांशे सम्यक्त्वसम्पादने यतमानाः ते फलांशे लब्धक्लेशाः अभवन् । तथा च नामजात्याद्यपेतं कस्यचित् वस्तुनः ज्ञानमित्येव विरुद्धमिति सिध्यति ।

नवीननैयायिकास्तु सविकल्पप्रत्यक्षार्थं प्रचीनैरिव आदिमक्षणे निर्विकल्पप्रत्यक्षम् अनिवार्यं न मन्यन्ते । आदिमक्षणे एव विना निर्विकल्पं, सविकल्पकप्रत्यक्षं भवितुं अर्हः इति तेषां मतम् । तद्यथा प्रतिदिनं कार्यालयगमनवेलायां मया वृक्षः दृश्यते । परन्तु तस्य सन्निकर्षे आदौ आकारवर्णादीनां ग्रहणं,ततश्च वृक्षप्रत्यक्षमिति क्रमः न वर्तते , संस्कारवशात् साक्षात् जात्यादिविशिष्टवृक्षसविकल्पप्रत्यक्षमेव भवति । तथा निर्विकप्रत्यक्षं नानिवार्यमिति सिद्धम् । इदन्तु नवीननैयायिकान् पूर्वोक्तविरोधरूपदोषकलङ्करहितान् करोति । तथा च **इन्द्रियाणि एककाले परस्परसहकारेण व्यापारं कुर्वन्तः साक्षत्कारसाधानानि भवन्तीति** विषये नवीनन्याय-काण्टमतयोः समानाभिप्राय एव वर्तते ।

ननु कदाचित् पूर्वदृष्टमेव एकं पुरुषं पश्यामि ,तथापि स क इति अधिगन्तु न प्रभवामि, अथ पुनः अकस्मात् स्मरणेन स देवदत्तः इति अधिगच्छामि। दृष्टान्तेस्मिन् बौद्धाः वदेयुः, आदिमं निर्विकल्पकवत्, द्वीतीयं सविकल्पवत् स्यात् खलु । अत्र अवधेयांशः इत्थं वर्तते , यदा वयं मरौ वारि पश्यामः, ततः समीपगमने मरुभूमिरेव दृश्यते , उभापि दृष्टान्तौ तुल्यावेव । आदिमे झटिते स्मरणसमनन्तरमेव अन्यथादृष्टस्य पुनरन्यथा दर्शनं भवति । अत्र पुनः यथा समीपं गम्यते तथा प्रत्यक्षे पटुतायाः कारणेन समीचीनं प्रत्यक्षं भवति । अस्मिन् कारणं प्रत्यक्षस्य स्वरूपमेव, यत् कदाचित् दोषवशात् अन्यदन्याकारेण दर्शयति , न तु तेन निर्विकल्पकं साधयितुं शक्यम् ।

**अन्तिमाभिप्रायः**

बौद्धानां प्रत्यक्षनिरूपणक्रमे मनसः प्रवेश एव नास्ति । मनसः प्रवेशाभावे सविकल्पप्रत्यक्षमेव असम्भावितम् । निर्विकल्पे प्रत्यक्षत्वं नास्ति। काण्टेनाप्ययमेव अभिप्रयः प्रकटितः। न्यायशास्त्रीयसिद्धान्तस्य विषयेस्मिन् काण्टसिद्धान्तेन सादृश्यं दृश्यते।

## End Notes :-

१. प्र.वा. द्वि.परि. १ २. न्या. बि. मु.र. ३
३. प्र.वा. द्विपरि. ७५ ४. न्या.वि.सू. ४
५. प्र.वा. द्वि.परि. १२३ ६. प्र.वा. द्वि.परि. १२४